# श्रीमन्नारायणीयम्

## ॐ नमोनारायणाय



गोविन्दा पुण्डरीकाक्षा रक्षमाम् शरणागतम्

ॐ

॥ समर्पणम् ॥



॥ गुरु गिरिजा मामि ॥

Dedicated at the lotus feet of my Guru Girija Mami

நமஸ்காரம் மாமி

ராஜம் க்ருஷ்ணன்

## TABLE OF CONTENTS

नारायणीयस्य प्रारम्भ ध्यान स्लोकाः .................................... 9

नारायण कवचं ............................................................ 11

प्रथम-दशकम्-1 .......................................................... 18

द्वितीय-दशकम्-2 ........................................................ 20

तृतीय-दशकम् -3 ......................................................... 22

चतुर्थ-दशकम्-4 .......................................................... 25

पञ्चम-दशकम्-5 .......................................................... 27

षष्ठ-दशकम्-6 ............................................................ 29

सप्तम-दशकम्-7 .......................................................... 31

अष्टम-दशकम्-8 .......................................................... 34

नवम-दशकम्-9 ............................................................ 36

दशम-दशकम्-10 .......................................................... 38

एकादश-दशकम्-11 ...................................................... 41

द्वादश-दशकम्-12 ........................................................ 42

त्रयोदश-दशकम्-13 ...................................................... 45

चतुर्दश-दशकम्-14 ....................................................... 47

पञ्चदश-दशकम्-15 ....................................................... 48

षोडश-दशकम्-16 ......................................................... 51

सप्तदश-दशकम्-17 ........................................................ 53
अष्टादश-दशकम्-18 ...................................................... 56
एकोनविंशतितम-दशकम्-19 ............................................ 58
विंशतितम-दशकम्-20 .................................................... 60
एकविंशतितम-दशकम्-21 ................................................ 63
द्वाविंशतितम-दशकम् 22 .................................................. 65
त्रयोविंशतितम-दशकं-23 ................................................. 68
चतुर्विंशतितम-दशकम् 24 ................................................ 70
पञ्चवंशतितम-दशकम्-25 ................................................. 73
षड्विंशतितम-दशकम् - 26 ................................................. 75
सप्तविंशतितम-दशकम् – 27 .............................................. 77
अष्टविंशतितम-दशकम्-28 ................................................ 80
श्रीमहालक्ष्म्याष्टकम् ........................................................ 80
एकोनत्रिंशत्तम-दशकम्-29 ............................................... 82
त्रिंशत्तम-दशकम् 30 ....................................................... 84
एकत्रिम्शत्तम-दशकम्-31 ................................................. 87
द्वात्रिम्शत्तमदशकम् -32 .................................................. 89
त्रयस्-त्रिंशत्तम-दशकम् -33 ............................................. 90
चतुस्-त्रिंशत्तम-दशकम्-34 .............................................. 93
पञ्चत्रिंशत्तम-दशकम् 35 ................................................. 95

षड्विंशत्तम-दशकम् 36 .................................................. 97
सप्त-त्रिम्शत्तम-दशकम् -37 .......................................... 100
अष्टत्रिंशत्तम-दशकम् -38 ............................................ 102
एकोन-चत्वारिंशत्तम-दशकम् -39 .................................. 105
श्रीमहिषासुरमर्दिनि स्तोत्रम् ............................................ 106
चत्वारिंशत्तम-दशकम् -40 ............................................ 108
एकचत्वारिंशत्तम-दशकम्-41 ........................................ 109
द्विचत्वारिंशत्तम-दशकम् -42 ........................................ 110
त्रयश्चत्वारिंशत्तम-दशकम् -43 ...................................... 112
चतुश्-चत्वारिंशत्तम-दशकम्-44 .................................... 114
पञ्च-चत्वारिंशत्तम-दशकम् -45 .................................... 115
षड्चत्वारिंशत्तम-दशकम् -46 ........................................ 118
सप्तचत्वारिंशत्तम-दशकम् -47 ...................................... 120
अष्टचत्वारिंशत्तम-दशकम् -48 ...................................... 121
एकोनपञ्चाशत्तम-दशकम् -49 ...................................... 122
पञ्चाशत्तम-दशकम् -50 ................................................ 124
एकपञ्चाशत्तम-दशकम्-51 .......................................... 126
श्रीमद्भगवद्गीता - 15 .................................................... 128
द्विपञ्चाशत्तम-दशकम्-52 ............................................ 131
त्रिपञ्चाशत्तम-दशकम्-53 ............................................ 134

चतुष्पञ्चाशत्तम-दशकम्-54 ........................................ 135

पञ्चपञ्चाशत्तम-दशकम्-55 ........................................ 137

षट्पञ्चाशत्तम-दशकम् -56 ........................................ 139

सप्तपञ्चाशत्तम-दशकम् -57 ........................................ 140

अष्टपञ्चाशत्तम-दशकम् -58 ........................................ 141

एकोनषष्टितम-दशकम् -59 ........................................ 144

षष्टितम-दशकम्-60 ........................................ 145

एकषष्टितम-दशकम्-61 ........................................ 147

द्विषष्तितम दशकम्  -62........................................ 149

त्रिषष्टितम दशकम् -63 ........................................ 151

चतुःषष्टितम दशकम् -64 ........................................ 154

पञ्चषष्टितम दशकम् -65........................................ 155

षष्ट षष्टितम दशकम् -66 ........................................ 157

सप्त षष्टितम दशकम् -67........................................ 159

अष्ट षष्टितम दशकम् -68 ........................................ 160

एकोन सप्ततितमदशकम् -69........................................ 163

सप्ततितम दशकम् -70 ........................................ 165

एक सप्ततितम दशकम् -71........................................ 167

द्विसप्ततितम दशकम् -72 ........................................ 169

त्रिसप्ततितम दशकम् -73 ........................................ 171

चतुस्- सप्ततितम दशकम् -74 ........................................ 173

पञ्च सप्ततितम दशकम् -75 ........................................ 175

षट् सप्ततितम दशकम् -76 ........................................ 177

सप्त सप्ततितम दशकम् -77 ........................................ 180

अष्टसप्ततितम दशकम् -78 ........................................ 183

एकोनाशीतितम दशकम् -79 ........................................ 184

अशीतितम दशकम् -80 ........................................ 186

एकाशीतितम दशकम् -81 ........................................ 188

द्वयशीतितम दशकम् -82 ........................................ 191

त्र्यशीतितम दशकम् -83 ........................................ 193

चतुर शीतितम दशकम् -84 ........................................ 195

पञ्चा शीतितम दशकम् -85 ........................................ 197

षड शीतितम दशकम् -86 ........................................ 199

सप्तशीतितम दशकम् -87 ........................................ 202

अष्ट शीतितम दशकम् -88 ........................................ 203

एकेन नवतितम दशकम् -89 ........................................ 206

नवतितम दशकम् -90 ........................................ 208

एकनवतितम दशकम् 91 ........................................ 211

द्विनवतितम दशकम् - 92 ........................................ 213

त्रीनवतितम दशकम् -93 ........................................ 215

चतुर्नवतितम दशकम् -94 ............................................. 218

पञ्च नवतितम दशकम् -95 ............................................. 220

षण्णवतितम दशकम् -96............................................. 222

सप्त नवतितम दशकम् -97 ............................................. 225

अष्टनवतितम दशकम् -98 ............................................. 227

एकोन शततम दशकम् -99 ............................................. 230

शततम दशकम् -100 ................................................... 232

समापन स्लोकम् ......................................................... 235

गुरुवातपुरीश पञ्चरत्नम् .................................................. 236

गुरुवायुरप्पन् नमस्कारम् ................................................ 237

श्रीगुरुवायुपुरेश मङ्गळम् ................................................ 238

नारायणीयम् आर्ति ...................................................... 239

श्रीविष्णुसहस्रनामम् ..................................................... 241

महिषासुरमर्दिनिस्तोत्रम् .................................................. 262

चिलङ्गे केट्टि ओडी ओडी वैयो ......................................... 266

गौरी कल्याणम् .......................................................... 267

नैवेध्यम् .................................................................. 268

## नारायणीयस्य प्रारम्भ ध्यान स्लोकाः

श्रीगुरुभ्यो नमः

अगजानन-पद्मार्कं, गजाननमहर्निशम्।

अनेकदं तं भक्तानां, एकदन्तं उपास्महे॥ १॥

श्रीमहागणपतये नमः॥

गुरवे सर्व-लोकानां, भिषजे भव-रोगिणाम्।

निधये सर्व-विद्यानां, श्रीदक्षिणामूर्तये नमः॥ २॥

अस्मद्-गुरुचरणारविन्दाभ्यां नमः॥

ज्ञानानन्द-मयं देवं, निर्मल-स्पटिकाकृतिम्।

आधारं सर्व-विद्यानां, हयग्रीवं उपास्महे॥ ३॥

श्रीहयग्रीवमूर्तये नमः॥

सरस्वति नमस्तुभ्यं, वरदे काम-रूपिणि।

विद्यारम्भं करिष्यामि, सिद्धिर् भवतु मे सदा॥ ४॥

श्रीमहासरस्वत्यै नमः॥

उमा-कोमळ-हस्ताब्ज, संभावित-ललाटकम्।

हिरण्य-कुण्डलं वन्दे, कुमारं पुष्करस्रजम्॥ ५॥

वेट्रिवेल् मुरुगनुक्कु हर हरो हर॥

भूतनाथ सदानन्द, सर्व भूत दयापरा।

रक्ष रक्ष महाबाहो, शास्त्रे तुभ्यम् नमो नमः॥

स्वामिये शरणम् अय्यप्पा ॥ ६ ॥

कोमळं कूजयन् वेणुं, श्यामळोऽयं कुमारकः।
वेदवेद्यं परंब्रह्म, भासतां पुरतो मम ॥ ७ ॥

सायङ्काले वनान्ते, कुसुमित-समये सैक**ते** चन्द्रिका**या**म्
त्रैलोक्याकर्षणाङ्गं, सुरवर-गणिका मोह**ना**पाङ्ग-मू**र्ति**म्।
सेव्यं शृङ्गार-भावैः, नवरसभरि**तैः** गोपक**न्या**-सह**स्रैः**
वन्देऽहं रासकेली, रतं अतिसुभगं वश्य-गो**पा**लकृष्णम्॥ ८॥

आनीलश्लक्ष्णकेशं, ज्वलित मकरसत्, कुण्ड**लं** मन्द**हा**स
स्यन्दार्द्रम् कौस्तुभ**श्री**, परिगत, वनमालोरु-हाराभि**रा**मम्।
श्रीवत्साङ्कं सुबाहुं, मृदुल-सदुदरं काञ्चनच्छाय**चे**लम्
चारुस्निग्धोरुं अम्भोरुह, ललितपदम् भावयेऽ**हं** भव**न्त**म् ॥ ९ ॥

श्रीकृष्ण गोविन्द हरे मुरारे श्रीनाथ नारायण वासुदेव। ३X

मोक्षाब्धि-सारमय, भागवताख्य-द**ध्नोः**
        नारायणीय-नवनीतमहो गृहीत्वा।
मायामयौघ-परितप्त, जनाय योऽगात्
        नारायणा, अवनि सुराय नमोस्तु तस्मै ॥ १० ॥

गङ्गा गीता च, गायत्र्यपि च, तुलसि**का** गोपिकाचन्दनं तत्
सालग्रामाभिपूजा, परपुरुष तथैकाद**शी**, नामव**र्णा**: ।

एतान्यष्टाप्य-यत्नान्, अयिकलिसमये त्वत्-प्रसाद्-प्रवृध्या

क्षिप्रं मुक्ति-प्रधानीत्यभिदधु-ऋषयः, तेषु **मां** सज्ज**ये**थाः॥ श्रीहरये नमः॥

## नारायण कवचं

---

सच्चिदानन्द रूपाय, वि**श्वो**त्पत्यादि हेतवे।

तापत्रय विनाशाय, श्रीकृष्णाय वयम् नुमः॥ २ x

राजोवाच ।

यया गुप्तः सहस्राक्षः, सवाहान्-रिपु-सैनिकान्।

क्रीडन्निव विनिर्-जित्य, त्रिलोक्या बुभुजे श्रियम्॥ १॥

भगवंस्तन्-ममाख्याहि, वर्म नारायणात्मकम्।

यथाऽऽततायिनः शत्रून्, येन गुप्तोऽजयन्मृधे॥ २॥

श्रीशुक उवाच ।

वृतः पुरोहितस्त्वाष्ट्रो, महेन्द्रायानु-पृच्छते ।

नारायणाख्यं वर्माह, तदि-हैकमनाः श्रृणु॥ ३॥

विश्वरूप उवाच ।

धौताङ्घ्रिपाणि-राचम्य, सपवित्र उदङ्-मुखः ।

कृतस्वाङ्ग-करन्यासो, मन्त्राभ्यां वाग्यतः शुचिः॥४॥

नारायणमयं वर्म, सन्नह्-येद्-भय आगते ।

पादयोर्-जानुनोरूर्वोः, उदरे हृद्यथोरसि॥५ ॥

मुखे शिरस्यानु-पूर्व्याद्, ओम्कारादीनि विन्यसेत्।
ॐ नमो नारायणायेति, विपर्यय-मथापि वा॥६ ॥

करन्यासं ततः कुर्याद्, द्वादशाक्षर-विद्यया ।
प्रणवादिय-कारान्तम्, अङ्गुल्यङ्गुष्ठ-पर्वसु ॥ ७॥

न्यसेद्-धृदय ॐकारं, विकारमनु मूर्धनि ।
षकारं तु भ्रुवोर्-मध्ये, णकारं शिखया दिशेत् ॥८॥

वेकारं नेत्रयोर्-युञ्ज्यान्, नकारं सर्वसन्धिषु ।
मकारमस्त्र-मुद्दिश्य, मन्त्रमूर्तिर्-भवेद्-बुधः॥९॥

सविसर्गं फडन्तं तत्, सर्व-दिक्षु विनिर्-दिशेत्।
ॐ विष्णवे नम इति ॥ १०॥

आत्मानं परमं ध्यायेद्, ध्येयं षट्-शक्तिभिर्-युतम् ।
विद्यातेजस्-तपोमूर्तिम्, इमं मन्त्रमुदा-हरेत्॥ ११॥

ॐ हरिर्-विदध्यान्मम सर्वरक्षां
        न्यस्ताङ्घ्रि-पद्मः पतगेन्द्र-पृष्ठे ।
दरारि-चर्मासि-गदेषुचाप
        पाशान्द-धानोऽष्ट-गुणोऽष्टबाहुः ॥ १२॥

जलेषु मां रक्षतु मत्स्य-मूर्तिः
        यादोगणेभ्यो वरुणस्य पाशात्।

स्थलेषु मायावटु-वामनोऽव्यात्

त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३॥

दुर्गेष्वटव्याजि-मुखादिषु प्रभुः

पायान्-नृसिंहोऽसुर-यूथपारिः ।

विमुञ्चतो यस्य महाट्टहासं

दिशो विनेदुर्-न्यपतंश्च गर्भाः ॥ १४॥

रक्षत्वसौ माध्वनि यज्ञ-कल्पः

स्वदंष्ट्रयोन्नीतधरो वराहः ।

रामोऽद्रि-कूटेष्वथ विप्रवासे

सलक्ष्मणोऽव्याद्-भरताग्र-जोऽस्मान् ॥१५॥

मामुग्र-धर्मादखिलात्-प्रमादान्

नारायणः पातु नरश्च हासात्।

दत्तस्-त्वयोगादथ योगनाथः

पायाद्-गुणेशः कपिलः कर्मबन्धात्॥ १६ ॥

सनत्कुमारोऽवतु कामदेवाद्

धयशीर्षा मां पथि देवहेलनात्।

देवर्षिवर्यः पुरुषार्चनान्तरात्

कूर्मो हरिर्मां निरयाद-शेषात् ॥ १७॥

धन्वन्तरिर्-भगवान्पात्व-पथ्याद्

द्वन्द्वाद्-भयादृषभो निर्जितात्मा ।

यज्ञश्च लोकादव-ताज्जनान्ताद्

बलो गणात्-क्रोधवशाद-हीन्द्रः॥ १८॥

द्वैपायनो भगवानप्रबोधाद्

बुद्धस्तु पाखण्ड-गणा-प्रमादात्।

कल्किः कलेः काल-मलात्प्रपातु

धर्मावनायोरु-कृतावतारः ॥ १९॥

मां केशवो गदया प्रातरव्याद्

गोविन्द आसङ्गव-मात्तवेणुः ।

नारायणः प्राह्ण उदात्त-शक्तिः

मध्यन्दिने विष्णुररीन्द्रपाणिः ॥ २०॥

देवोऽपराह्णे मधुहोग्र-धन्वा

सायं त्रिधामावतु माधवो माम्।

दोषे हृषीकेश उतार्ध-रात्रे

निशीथ एकोऽवतु पद्मनाभः ॥ २१॥

श्रीवत्स-धामापर-रात्र ईशः

प्रत्यूष ईशोऽसिधरो जनार्दनः ।

दामोदरोऽव्यादनु-सन्ध्यं प्रभाते

विश्वेश्वरो भगवान् कालमूर्तिः ॥ २२॥

चक्रं युगान्तानल-तिग्मनेमि

भ्रमत्-समन्ताद्-भगवत्-प्रयुक्तम्।

दन्दग्धि दन्दग्ध्यरि-सैन्यमाशु

कक्षं यथा वातसखो हुताशः ॥ २३॥

गदेऽश-निस्पर्शन-विस्फुलिङ्गे

निष्पिण्ढि निष्पिण्ढ्य-जितप्रियासि ।

कूष्माण्ड-वैनायक-यक्षरक्षो

भूतग्रहांश्चूर्णय चूर्णयारीन्॥ २४॥

त्वं यातुधान-प्रमथ-प्रेतमातृ

पिशाच-विप्रग्रह-घोरदृष्टीन्।

दरेन्द्र विद्रावय कृष्ण-पूरितो

भीमस्वनोऽरेर्-हृदयानि कम्पयन्॥ २५॥

त्वं तिग्म-धारासि-वरारि-सैन्यम्

ईश-प्रयुक्तो मम छिन्धि छिन्धि ।

चक्षूंषि चर्मञ्छत-चन्द्र छादय

द्विषाम-घोनां हर पाप-चक्षुषाम्॥ २६॥

यन्नो भयं ग्रहेभ्योऽभूत्, केतुभ्यो नृभ्य एव च ।

सरी-सृपेभ्यो दंष्ट्रिभ्यो, भूतेभ्योंऽहोभ्य एव वा॥ २७॥

सर्वाण्येतानि भगवन्, नामरूपास्त्र-कीर्तनात्।

प्रयान्तु संक्षयं सद्यः, ये नः श्रेयः-प्रतीपकाः॥ २८॥

गरुडो भगवान् स्तोत्र-स्तोभश्-छन्दोमयः प्रभुः ।

रक्षत्वशेष-कृच्छ्रेभ्यो, विष्वक्सेनः स्वनामभिः ॥ २९॥

सर्वापद्-भ्यो हरेर्नाम, रूपयाना-युधानि नः।

बुद्धीन्द्रियमनः प्राणान्, पान्तु पार्षद्-भूषणाः ॥३०॥

यथा हि भगवानेव, वस्तुतः सद्सच्च यत्।

सत्येनानेन नः सर्वे, यान्तु नाश-मुपद्रवाः॥३१॥

यथैकात्म्यानु-भावानां, विकल्प-रहितः स्वयम्।

भूषणायुध-लिङ्गाख्या, धत्ते शक्तीः स्वमायया॥ ३२ ॥

तेनैव सत्य-मानेन, सर्वज्ञो भगवान्-हरिः ।

पातु सर्वैः स्वरूपैर्नः, सदा सर्वत्र सर्वगः॥ ३३॥

विदिक्षु दिक्षूर्-ध्वमधः समन्ताद्

अन्तर्-बहिर्-भगवान्-नारसिंहः ।

प्रहापयं-ल्लोकभयं स्वनेन 1

स्वतेजसा ग्रस्त-समस्त-तेजाः॥ ३४॥

मघवन्-निद-माख्यातं, वर्म नारायणात्मकम्।

विजेष्यस्-यञ्जसा येन, दंशितोऽसुरयूथपान्॥ ३५॥

एतद्धारय-माणस्तु, यं यं पश्यति चक्षुषा ।

पदा वा संस्पृशेत्-सद्यः, साध्व-सात्स विमुच्यते ॥ ३६॥

न कुतश्चिद्-भयं तस्य, विद्यां धारयतो भवेत्।

राज-दस्युग्रहादिभ्यः, व्याघ्रादिभ्यश्च कर्हिचित्॥ ३७॥

इमां विद्यां पुरा कश्चित्, कौशिको धारयन् द्विजः ।

योग-धारणया स्वाङ्गं, जहौ स मरु-धन्वनि॥ ३८॥

तस्योपरि विमानेन, गन्धर्व-पतिरेकदा ।

ययौ चित्ररथः स्त्रीभिः, वृतो यत्र द्विजक्षयः॥ ३९॥

गगनान्-न्यपतत्सद्यः, सविमानो ह्यवाक्शिराः ।

स वालखिल्य-वचनाद्, अस्थीन्-यादाय विस्मितः।

प्रास्य प्राची-सरस्वत्यां, स्नात्वा धाम स्वमन्वगात्॥ ४०॥

श्रीशुक उवाच ।

य इदं श्रृणुयात्काले, यो धारयति चादृतः ।

तं नमस्यन्ति भूतानि, मुच्यते सर्वतो भयात्॥ ४१॥

एतां विद्यामधिगतः, विश्वरूपाच्छत-क्रतुः ।

त्रैलोक्य-लक्ष्मीं बुभुजे, विनिर्जित्य मृधेऽसुरान् ॥४२॥ श्री हरये नमः।

॥इति श्रीमद्भागवतमहापुराणे नारायणवर्मकथनं नामाष्टमोऽध्यायः॥

## श्रीविष्णु सहस्रनामम् (short version)

श्रीराम राम रामेति रमे रामे मनोरमे। सहस्रनाम तत्तुल्यं रामनाम वरानने॥ 3X

श्रीराम नाम वरानन ॐ नम इति॥

### प्रथम-दशकम्-1

---

### भगवतः स्वरूपं माहात्म्यं च

सान्द्रानन्दाव-बोधात्मकम्, अनुपमितं, काल-दे**शा**वधिभ्याम्
निर्मुक्तं, नित्यमुक्तं, निगमशत-सहस्रेण, नि**र्भा**स्य-**मा**नम्
अस्पष्टं दृष्टमात्रे, पुनरुरु-पुरुषार्थात्मकं, ब्रह्म तत्व**म्**
तत्तावद्भाति सा**क्षाद्**, गुरुपवनपुरे, हन्त भाग्यं ज**नाना**म् ॥१

एवं दुर्लभ्य-वस्तुन्यपि, सुलभतया, हस्तल**ब्धे** यदन्यत्
तन्वा वाचा धिया वा, भजति बत जनः, क्षुद्रतैव स्फु**टे**यम् ।
एते तावद् वयं तु, स्थिरतर-मनसा, विश्वपी**डा**-पह**त्यै**
निश्शेषात्-मान**मे**नं, गुरुपवनपुराधीशम् ए**वा**श्रया**मः** ॥२॥

सत्वं यत्तत्-पराभ्याम्, अपरिकलनतो, निर्म**लं** तेन तावद्
भूतैर्-भूतेन्द्रियैस्ते, वपुरिति बहुशः, श्रूय**ते** व्यास-**वा**क्यम् ।
तत्-स्वच्छत्वाद्, यदच्छादित, परसुख चिद्गर्भ-नि**र्भा**सरूप**म्**
तस्मिन् धन्या रमन्ते, श्रुतिमति-मधुरे, सुग्र**हे** विग्र**हे** **ते**॥३॥

निष्कम्पे नित्यपूर्णे, निरवधि-परमानन्द, पी**यू**षरूपे
निर्-लीनानेक-मुक्तावलि, सुभगतमे, निर्मल-ब्रह्मसि**न्धौ** ।

कल्लो-लोल्लासतुल्यं, खलु विमलतरं, सत्व-माहुस्त**दात्मा**

कस्मान्नो निष्कळस्त्वं, सकल इति वचः, त्वत्क**ला**स्वेव **भू**मन्॥४॥

निर्व्यापारोऽपि, निष्कारणमज भजसे, यत्-क्रि**या**-मीक्ष**णाख्या**म्

तेनैवोदेति **ली**ना, प्रकृतिरसति, क**ल्पाऽ**पि कल्पादि**का**ले ।

तस्याः संशुद्धमंशं, कमपि तमतिरो**धा**यकं सत्व-**रू**पम् ।

स त्वं धृत्वा दधासि, स्वमहिमविभवाकुण्ठ, वैकुण्ठ **रू**पम्॥

तत्ते प्रत्यग्र-धाराधर, ललितकला, याव**ली**-केलि**का**रम्

लावण्यस्यैक-**सा**रं, सुकृति-जनदृशां, पूर्ण-पु**ण्या**व**ता**रम् ।

लक्ष्मी-निश्शङ्कलीला निलयनम् अमृत, स्यन्द-स**न्दो**हमन्तः

सिञ्चत्-सञ्चिन्त**का**नां, वपुरनुकलये, मारु**ता**गार**ना**थ॥६ ॥

कष्टा ते सृष्टिचेष्टा, बहुतर-भवखे,दावहा जीवभा**जा**म्

इत्येवं, पूर्वमालोचितम् अजित मया, नैवम**द्या**भि**जा**ने ।

नो चेज्जीवाः कथं वा, मधुरतरमिदं, त्वद्-वपुश्चिद्र**सा**र्द्रम् ।

नेत्रैः श्रोत्रैश्च **पी**त्वा, परमरससुधां, भोधि-**पू**रे र**मे**रन् ॥ ७॥

नम्राणां सन्निधत्ते, सततमपि पुरस्तैर्, अनभ्यर्थि-तानपि ।

अर्थान् कामानजस्रं, वितरति परमानन्द-सा**न्द्रां** गतिं च ।

इत्थं निश्शेष-लभ्यो, निरवधिकफलः, पारिजा**तो** ह**रे** त्वम् ।

क्षुद्रं तं शक्र**वा**टी, द्रुम-मभिलषति, व्यर्थमर्थि-व्र**जोऽ**यम् ॥८॥

कारुण्यात्-काम-मन्यं, ददति खलु परे, स्वात्मद**स्त्वं** विशे**षा**द् ।

ऐश्वर्यादीश-तेऽ**<u>न्ये</u>**, जगति परजने, स्वात्म**<u>नोऽ</u>**पीश्वर**<u>स्त्व</u>**म् ।

त्वय्युच्चै-रारमन्ति, प्रतिपद-मधुरे, चेत**<u>नाः</u>** स्फीत-भा**<u>ग्याः</u>** ।

त्वं चात्माराम एवेत्यतुल, गुण-गणाधार, शौरे न**<u>म</u>**स्ते ॥९॥

ऐश्वर्यं शङ्करा-दीश्वर, विनियमनं, विश्व-ते**<u>जो</u>**-हरा**<u>णा</u>**म् ।

तेजस्सम्हारि वीर्यं, विमलमपि यशो, निस्-पृ**<u>है</u>**श्चोप-**<u>गी</u>**तम् ।

अङ्गासङ्गा सदा श्रीर् अखिल-विदसि नक्कापि**<u>ते</u>** सङ्ग**<u>वा</u>**र्ता

तद्-वातागार-**<u>वा</u>**सिन्, मुरहर भगवच्छब्द मु**<u>ख्या</u>**श्र**<u>योऽ</u>**सि ॥**श्रीहरये नमः।**

इतिभगवन्-महिमानु-वर्णनं प्रथम-दशकं समाप्तम् ॥

**द्वितीय-दशकम्-2**

---

## रूपमाधुर्य भक्ति महत्वं च

**<u>Tune - Sandra</u>**

सूर्यस्पर्धि, किरीटमूर्ध्वतिलक, प्रोद्-**<u>भा</u>**सि-फालान्तरम्

कारुण्या-कुलनेत्रमार्द्र, हसितोल्लासं सुनासापुट**<u>म्</u>** ।

गण्डोद्-यन्मकराभ-कुण्डलयुगं, क**<u>ण्ठो</u>**-ज्वलत्-कौस्तुभ**<u>म्</u>** ।

त्वद्-रूपं, वनमाल्य-हारपटल, श्रीवत्स-दीप्रं **<u>भजे</u>** ॥१॥

केयूराङ्गद कङ्कणोत्तम, महार**<u>त्ना</u>**ङ्गुलीयाङ्कित

श्रीमद्-बाहुचतुष्क-सङ्गतगदा, शङ्खारि-पङ्केरु**<u>हा</u>**म्।

काञ्चित्काञ्चन काञ्चि-लाञ्छितलसत्, पी**<u>ता</u>**म्बरा-लम्बि**<u>नी</u>**म्

आलम्बे विमलाम्बुजद्युतिपदां, मूर्तिम् तवार्तिच्छिदम् ॥ २॥

यत्-त्रैलोक्य-महीयसोऽपि महितं, स**म्मो**हनं मोह**ना**त् ।
कान्तं कान्ति-निधानतोऽपि मधुरं, माधुर्य-धुर्यादपि ।
सौन्दर्-योत्तरतोऽपि सुन्दरतरं, त्वद्-**रू**पमाश्चर्य**तो**पि
आश्चर्यं भुवने न कस्य कुतुकं, पुष्णाति विष्णो वि**भो** ॥ ३ ॥

तत्-तादृङ्-मधुरात्मकं तव वपुः, सम्प्राप्य संपन्म**यी** ।
सा देवी परमोत्सुका चिरतरं, नाऽस्ते स्व-भक्तेष्व**पि** ।
तेनास्या बत कष्टमच्युत विभो, त्वद्-**रू**प-मानोज्ञक
प्रेमस्थैर्य-मयादचापल-बलाच्, चापल्य-वार्तोद**भू**त् ॥४॥

लक्ष्मीस्तावक-रामणीयक, हृतैवे**यं** परेष्-वस्थिरेति
अस्मिन्-नन्यदपि प्रमाणमधुना, वक्ष्यामि लक्ष्मीप**ते**
ये त्वद्-ध्यान-गुणानु-कीर्तनरसा, सक्ता हि भक्ता ज**नाः**
तेष्वेषा वसति स्थिरैवदयित, प्रस्तावदत्ता-द**रा** ॥ ५ ॥

एवं-भूत-मनोज्ञतान-वसुधा, निष्यन्द-सन्दोहनम्
त्वद्-रूपं परचिद्र-सायनमयं, चेतोहरं शृण्व**ता**म्
सद्यः प्रेरयते मतिं मदयते, रो**मा**ञ्च-यत्यङ्गकम्
व्यासिञ्चत्यपि शीतबाष्प-विसरैः, आनन्द-मूर्च्छोद्-भ**वैः** ॥

एवम्-भूत-तया हि भक्त्यभिहितो, योगः स योगद्-व**या**त् ।
कर्मज्ञान-मयाद्-भृशोत्तमतरो, योगीश्वरैर्-गीय**ते** ।
सौन्दर्यै-करसात्मके त्वयि खलु, प्रेमप्रकर्-षात्मि**का**
भक्तिर्-निश्रम-मेव विश्व-पुरुषैर्, लभ्या रमावल्ल**भा** ॥ ७ ॥

निष्कामं नियत-स्वधर्म-चरणं, यत्कर्म-योगाभिधम्

तद्-दूरेत्य-फलं यदौपनिषद, ज्ञानो-पलभ्यं पु**नः**

तत्-अव्यक्त-तया सुदुर्गमतरं, चित्तस्य तस्माद्-वि**भो** ।

त्वत्-प्रेमात्मक-भक्तिरेव सततं, स्वादीयसी श्रेय**सी** ॥ ८॥

अत्या-यासकराणि कर्मपटलान्, आचर्य निर्यन्म**लाः**

बोधे भक्ति-पथेऽथ-वाप्युचितताम्, आयान्ति किं तावता ।

क्लिष्ट्-वा तर्कपथे परं तव वपुः, ब्रह्माख्य-मन्ये पुनः

चित्तार्-द्रत्वमृते विचिन्त्य बहुभिः, सिध्यन्ति जन्मान्त**रैः** ॥

त्वद्-भक्तिस्तु कथारसामृतझरी, निर्मज्जनेन स्वयम्

सिद्ध्यन्ती विमल-प्रबोधपदवीम्, अक्लेश-तस्तन्व**ती** ।

सद्यः सिद्धिकरी जयत्ययि विभो, सै**वा**स्तु मे त्वत्पद

प्रेम-प्रौढिरसार्-द्रता द्रुत-तरं, वातालयाधीश्वर ॥ १० ॥ श्री हरये नमः।

॥ इति भगवत्-रूपादि-वर्णनं द्वितीय-दशकं समाप्तम् ॥

## तृतीय-दशकम् -3

---

## भक्ति-प्रार्थना

**Tune Sandra**

पठन्तो↑ नामानि, प्रमद-भरसि**न्धौ** निपति**ताः**

स्मरन्तो रूपं **ते**, वरद कथय**न्तो** गुणक**थाः** ।

चरन्तो ये भक्ताः त्वयि खलु, रम**न्ते** परममून्

अहं धन्यान्मन्ये, समधिगत-सर्वाभिलषि<u>**ता**</u>न् ॥१॥

गदक्लिष्टं कष्टं, तव चरण-से<u>**वा**</u>रसभ<u>**रे**</u>पि

अनासक्तं चित्तं भवति, बत वि<u>**ष्णो**</u> कुरु द<u>**या**</u>म् ।

भवत्पादाम्भोज, स्मरण-रसि<u>**को**</u>, नामनिव<u>**हा**</u>न्

अहं गायं-गायं, कुहचन विवत्स्यामि विज<u>**ने**</u> ॥ २॥

कृपा ते जाता चेत्, किमिव न हि लभ्यं तनुभृ<u>**ता**</u>म्

अदीय-क्लेशौ<u>**घ**</u>, प्रशमनद<u>**शा**</u> नाम किय<u>**ती**</u> ।

न के के लोकेऽस्मिन्, अनिशमयि शो<u>**का**</u>भि-रहि<u>**ताः**</u>

भवद्-भक्ता मु<u>**क्ताः**</u> सुख-गतिम-स<u>**क्ता**</u> विदध<u>**ते**</u> ॥३ ॥

मुनि-प्रौढा रूढा, जगति खलु गू<u>**ढा**</u>त्म-गत<u>**यो**</u>

भवत्-पादाम्-भोज, स्मरण-विरु<u>**जो**</u> नारद-मु<u>**खाः**</u>

चरन्तीश स्वैरं, सतत-परिनि<u>**र्भा**</u>त-परचित्

सदानन्दाद्-वैत, प्रसर-परिम<u>**ग्नाः**</u> किमपर<u>**म्**</u> ॥ ४॥

भवद्-भक्तिः स्फीता, भवतु मम सैव प्रशम<u>**ये**</u>द्

अशेष-क्लेशौघं, न खलु हृदि स<u>**न्दे**</u>ह-कणि<u>**का**</u> ।

न चेद्-व्यास-स्योक्तिः, तव च वच<u>**नं**</u> नैगमवचो

भवेन्-मिथ्या र<u>**थ्या**</u>, पुरुष-वचनप्राय-मखिलम्॥५ ॥

भवद्-भक्तिःस्तावत्, प्रमुख-मधुरा त्वद्-गुणर<u>**सा**</u>त्

किमप्यारूढा <u>**चे**</u>द्, अखिल-परिताप-प्रशम<u>**नी**</u> ।

पुनश्चान्ते स्वान्ते, विमलपरि बोधोदय-मिलन्

महानन्दाद्-वैतं, दिशति किमतः प्रार्थ्यमपरम् ॥ ६ ॥

विधूय क्लेशान्मे, कुरु चरण-युग्मं धृतरसम्

भवत्-क्षेत्रप्राप्तौ, करमपि च ते पूजन-विधौ ।

भवन्-मूर्त्या-लोके, नयनमथते, पादतुलसी

परिघ्राणे घ्राणं, श्रवणमपि ते चारुचरिते ॥ ७॥

प्रभूताधिव्याधि, प्रसभ-चलिते मामक-हृदि

त्वदीयं तद्-रूपं, परमरसचिद्रूपमुदियात्

उदञ्चद्-रोमाञ्चो, गलित-बहु-हर्षाश्रु, निवहो

यथा विस्मर्यासं, दुरुपशम पीडापरि-भवान्॥ ८॥

मरुद्-गेहाधीश, त्वयि खलु, पराञ्चोऽपि सुखिनो

भवत्-स्नेही सोऽहं, सुबहु परितप्ये च किमिदम् ।

अकीर्तिस्ते मा भूद्, वरद गदभारं प्रशमयन्

भवत्-भक्तोत्-तम्सं, झटिति कुरु मां कंसदमन ॥९ ॥

किमुक्तैर्-भूयोभिः, तव हि करुणा यावदुदियाद्

अहं तावद्देव, प्रहित-विविधार्त-प्रलपितः ।

पुरः क्लृप्ते पादे, वरद तव नेष्यामि दिवसान्

यथाशक्ति व्यक्तं, नतिनुति-निषेवा विरचयन् ॥ श्री हरये नमः।

॥ इति भक्तस्वरूपादि-वर्णनम् तृतीय-दशकम् समाप्तम्॥

## अष्टाङ्गयोगः तत्सिद्धि प्रकारः च

**Tune - Kalyatham**

कल्यताम् मम कुरुष्व तावतीं, कल्यते भवदुपासनं यया।

स्पष्टमष्ट-विधयोगचर्यया, पुष्ट्याशु तव तुष्टिमाप्-नुयाम्॥१॥

ब्रह्मचर्य-द्रुढतादि-भिर्यमैः, आप्लवादि-नियमैश्च पाविताः।

कुर्महे द्रुढममी सुखासनं, पङ्कजाद्यमपि वा भवत्पराः॥२ ॥

तारमन्तरनु-चिन्त्य सन्ततं, प्राणवायुमभि-यम्य निर्मलाः।

इन्द्रियाणि विषयाद्-थापहृत्, यास्महे भवदुपासनोन्मुखाः॥३ ॥

अस्फुटे वपुषि ते प्रयत्नतो, धारयेम धिषणां मुहुर्मुहुः।

तेनभक्ति-रसमन्तरार्-द्रता, मुद्वहेम भवदङ्घ्रि-चिन्तकाः॥४ ॥

विस्पुटावयव-भेद-सुन्दरं, त्वद्-वपुस्सुचिर-शीलना-वशात्।

अश्रमं मनसि चिन्तयामहे, ध्यानयोग-निरतास्-त्वदाश्रयाः॥५॥

ध्यायतां सकल-मूर्ति-मीद्रुशीम्, उन्मिषन्-मधुरताहृतात्-मनाम्।

सान्द्रमोदरस-रूपमान्तरं, ब्रह्मरूपमयि तेऽव-भासते॥६॥

तत्-समास्वदन-रूपिणीं स्थितिं, त्वत्समाधि-मयिविश्वनायक

आश्रिताः पुनरतः परिच्युतौ, आरभेमहि च धारणाधिकम् ॥७ ॥

इत्थमभ्यसन-निर्भरोल्लसत्, त्वत्परात्मसुख-कल्पितोत्सवाः

मुक्त-भक्तकुल-मौलितां गताः, सञ्चरेम शुक-नारदा-दिवत्॥ ८ ॥

त्वत्समाधिविजये तु यःपुनः, मङ्-क्षु मोक्षरसिकः क्रमेण वा

योग-वश्यमनिलं षडाश्रयैः, उन्नयत्यज सुषुम्नया शनैः ॥९ ॥

लिङ्गदेहमपि सन्त्य-जन्नथो, लीयते त्वयि परे निराग्रहः।

ऊर्ध्वलोक-कुतुकी तु मूर्धतः, सार्धमेव करणैर्-निरीयते ॥

अग्निवासर-वलर्क्ष-पक्षगैः, उत्तरायण-जुषा च दैवतैः।

प्रापितो रविपदं भवत्परो, मोदवान् ध्रुवपदान्-तमीयते ॥११॥

आस्थितोऽथ महरालये यदा, शेषवक्र-दहनोष्-मणाद्यते।

ईयते भवदुपाश्रयस्-तदा, वेधसः पदमतः पुरैव वा ॥१२॥

तत्र वा तव पदेऽथवा वसन्, प्राकृत-प्रळय एति मुक्तताम् ।

स्वेच्छया खलु पुराऽपि मुच्यते, संविभिद्य जगदण्डमोजसा ॥

तस्य चक्षिति-पयोमहोनिलद् , योमहत्-प्रकृति-सप्तकावृतीः।

तत्तदात्मकतया विशन् सुखी, याति ते पदमनावृतम् विभो॥१४॥

अर्चि-रादिगति-मीदृशीं व्रजन्, विच्युतिं न भजते जगत्पते

सच्चिदात्मक भवद्-गुणोदयान्, उच्चरन्तमनिलेश पाहि माम्॥ **श्री हरये नमः।**

॥इति अष्टाङ्ग-योगादि-वर्णनं चतुर्थ-दशकं समाप्तम्॥

## विराट्-पुरुष-उत्पत्तिः

**Tune Sandra**

व्यक्ता-व्यक्तमिदं न किञ्चिद्-भवत्, प्राक्-**प्रा**कृत-प्रक्ष**ये**

माया-याम् गुणसाम्यरुद्ध-विकृतौ, त्वय्या-गतायांलय**म्**।

नो मृत्युश्च तदामृतं च समभून्, नाह्नो न रात्रेः स्थि**तिः**

तत्रैकस्-त्वम-शिष्यथाः किल, परानन्द-प्रकाशात्म**ना**॥ १॥

कालः कर्मगुणाश्च जीवनिवहा, विश्वं च कार्यं वि**भोः**

चिल्ली-लारतिमेयुषि त्वयि तदा, निर्लीन-तामाय**युः**।

तेषां नैव वदन्त्य-सत्वमयि भो, श**क्त्या**त्मना तिष्ठताम्

नो चेत् किं गगन-प्रसून-सदृशां, भूयो भवेत्-सम्भवः॥ २॥

एवं च द्विपरार्ध-कालविगता, वीक्षाम् सिसृक्षात्-मि**का**म्

विभ्राणे त्वयि चुक्षुभे त्रिभुवनी, भावाय माया स्वयम्।

मायातः खलु काल-शक्तिरखिला, दृष्ट**म्** स्वभावोऽपि च

प्रादुर्-भूय गुणान्-विकास्य  विदधुः, तस्यास्सहायक्रि**या**म्॥

माया-सन्निहितोऽप्रविष्ट-वपुषा, साक्षीति गीतो भ**वा**न्

भेदैस्तां प्रति-बिंबतो विविशिवान्, जीवोऽपि नैवाप**रः**।

कालादि-प्रतिबोधिताऽथ भवता, स**ञ्चो**दिता च स्वयम्

माया सा खलु बुद्धि-तत्वमसृजद्, योऽसौ महानुच्य**ते**॥ ४॥

तत्रासौ त्रिगुणात्म-कोऽपि च महान्, सत्व-प्रधानः स्वयम्

जीवेऽस्मिन् खलु निर्वि-कल्पमहमिति, उद्-बोधनिष्पादकः।
चक्रेऽस्मिन् सविकल्प-बोधकमहन्, तत्वं महान् खल्वसौ
सम्पुष्टं त्रिगुणैस्-तमोऽतिबहुलं, विष्णो भवत्-प्रेर**णा**त्॥ ५॥

सोऽहं च त्रिगुणक्रमात् त्रिविधताम्, आ**सा**द्य वैकारि**को**
भूयस्-तैजस-ताम-साविति भवन्, आद्येन सत्वात्मना।
देवानिन्द्रिय-मानिनोऽकृत, दिशा-वा**ता**र्क-पाश्यश्विनो
वह्नीन्-द्राच्युत-मित्रकान् विधुविधि, श्रीरुद्र-शारीर**का**न्॥ ६ ॥

भूमन्मानस-बुद्ध्-यहंकृतिमिलच्-चि**त्ता**ख्य-वृत्यन्-वितम्
तच्चान्तःकरणं विभो तव बलात्, सत्वांश एवासृज**त्**।
जातस्-तैजसतो दशेन्द्रियगणः, त**त्ता**म-सांशात्पु**नः**
तन्मात्रं नभसो मरुत्पुरपते, शब्दोऽजनि त्वद्ब**ला**त् ॥७॥

शब्दाद् व्योम ततः ससर्जिथ विभो, स्प**र्शं** ततो मारुतम्
तस्माद्-रूपमतो महोऽथ च रसं, तोयं च गन्धं म**ही**म्।
एवम् माधव पूर्व-पूर्व-कलनाद्, आ**द्या**द्यधर्मान्-वित**म्**
भूतग्राममिमं त्वमेव भगवन्, प्राकाशयस्-ताम**सा**त्॥८॥

एते भूत-गणास्त-थेन्द्रियगणाः, देवाश्च जाता पृथङ्
नो शेकुर्-भुवनाण्ड-निर्मितविधौ, देवैरमीभिस्त**दा**।
त्वं नानाविध-सूक्तिभिर्नुतगुण, त**त्वा**न्-यमून्या-विशन्
चेष्टाशक्ति-मुदीर्य तानि घटयन्, हैरण्यमण्डं व्य**धाः**॥ ९॥

अण्डं तत्खलु पूर्व-सृष्ट-सलिले,अतिष्ठत् सहस्रं स**<u>माः</u>**

निर्भिन्दन्न-कृथाश्चतुर्दश, जगद् रूपं विराडाह्-वयम्।

साहस्रैः करपाद-मूर्ध-निव**<u>हैः</u>**, निश्शेष-जीवात्म**<u>को</u>**

निर्भातोऽसि मरुत्-पुराधिप स मां, त्रायस्व सर्वाम**<u>यात्</u>**॥ १०॥ श्री हरये नमः।

॥ इति विराट्-पुरुषोत्-पत्ति-वर्णनं पञ्चमदशकं समाप्तम्॥

**षष्ठ-दशकम्-6**

---

## विराट्-स्वरूपम्

**<u>Tune = evam Chaturdasa</u>**

एवं चतुर्दश-जगन्मयतां गत**<u>स्य</u>**

पातालमीश तव पादतलं वदन्ति।

पादोर्ध्व-देशमपि देव रसातलं ते

गुल्फद्-वयं खलु महातल-मद्भुतात्मन् ॥ १॥

जङ्घे तलातल-मथो सुतलं च जा**<u>नू</u>**

किञ्चोरुभाग-युगळं वितलातले द्वे।

क्षोणीतलं जघनमम्बर-मङ्ग नाभिः

वक्षश्च शक्र-निलयस्तव चक्रपाणे ॥ २॥

ग्रीवा महस्तव मुखं च जनस्-तप**<u>स्तु</u>**

फालं शिरस्तव समस्त-मयस्य सत्यम्।

एवं जगन्मयतनो जगदाश्रितैरपि

अन्यैर्-निबद्ध-वपुषे भगवन्-नमस्ते ॥ ३॥

त्वद् ब्रह्म-रन्ध्रपद-मीश्वर विश्व-क<u>न्द</u>

छन्दांसि केशव घनास्तव केशपाशाः।

उल्लासिचिल्लि-युगळं द्रुहिणस्य गेहम्

पक्ष्माणि रात्रिदिवसौ सविता च नेत्रे ॥ ४ ॥

निश्शेषविश्व-रचना च कटाक्ष-मो<u>क्षः</u>

कर्णौ दिशोऽश्वि-युगळं तव नासिके द्वे।

लोभत्रपे च भगवन्नधरोत्त-रोष्ठौ

तारागणाश्च दशनाः शमनश्च दंष्ट्रा ॥ ५॥

माया विलास-हसितं श्वसितं समी<u>रो</u>

जिह्वा जलं वचनमीश शकुन्तपङ्क्तिः।

सिद्धादयस्-स्वरगणा मुखरन्ध्र-मग्निः

देवा भुजाः स्तन-युगं तव धर्म-देवः ॥ ६॥

पृष्ठं त्वधर्म इह देव मनस्-सुधां<u>शु</u>

अव्यक्त-मेव हृदयांबुज-मम्बुजाक्ष।

कुक्षिस्समुद्र-निवहा वसनं तु सन्ध्ये

शेफः प्रजापतिरसौ वृषणौ च मित्रः ॥ ७॥

श्रोणिस्थलं मृगगणाः पदयोर्-नखा<u>स्ते</u>

हस्-त्युष्ट्र-सैन्धवमुखा गमनं तु कालः।

विप्रादिवर्ण-भवनं वदनाब्जबाहु

चारू-रुयुग्मचरणं करुणां-बुधे ते ॥ ८॥

संसारचक्रमयि चक्रधर क्रिया**स्ते**

वीर्यं महा-सुरगणोऽस्थि-कुलानि शैलाः।

नाड्यस्-सरित्समुदयस्-तरवश्च रोम

जीया-दिदं वपुर-निर्वचनीय-मीश ॥ ९॥

ईदृग्-जगन्मय-वपुस्तव कर्म-भा**जा**म्

कर्मा-वसानसमये स्मरणीय-माहुः।

तस्यान्तरात्म-वपुषे विमलात्मने ते

वातालयाधिप नमोऽस्तु निरुन्धि रोगान्॥ १०॥ श्री हरये नमः।

॥इति विराट्-पुरुषस्य जगदात्मत्व-वर्णनं षष्ठ-दशकं समाप्तम्॥

**सप्तम-दशकम्-7**

## ब्रह्मणः तपः वैकुण्ठ दर्शनं च

**Tune Sandra**

↑एवं देव चतुर् दशात्मक, जगद् रू**पे**ण जातः पु**नः**

तस्योर्ध्वं खलु सत्यलोक-निलये, जातोऽसि धाता स्वय**म्**।

यं शंसन्ति हिरण्य-गर्भमखिल, त्रै**लो**क्य-जीवात्मक**म्**

योऽभूत् स्फीतरजो-विकार विकसन्, नानासि-सृक्षार**सः**॥ १॥

सोऽयं विश्व-विसर्गदत्त-हृद**यः**, सम्पश्य-मानस्स्वयम्

बोधं खल्वनवाप्य विश्वविषयं, चिन्ताकुलस्-तस्थि**वान्**।
तावत् त्वं जगतांपते तपतपेत् ,ये**वं** हि वैहायसीम्
वाणीमेनम-शिश्रवः श्रुतिसुखां, कुर्वम्-स्तपः प्रेर**णाम्**॥ २ ॥

कोऽसौ मामवदत्-पुमानिति, जला **पूर्णे** जगन्-मण्ड**ले**
दिक्षूद्-वीक्ष्य किमप्यनीक्षितवता, वाक्यार्थ-मुत्पश्य**ता**।
दिव्यं वर्ष-सहस्रमात्त-तपसा, तेन त्व-माराधि**तः**
तस्मै दर्शितवानसि स्वनिलयं, वैकुण्ठमेकाद्-भुतम्॥ ३ ॥

माया यत्र कदापि नो विकुरुते, भा**ते** जगद्-भ्यो ब**हिः**
शोकक्रोध-विमोह-साध्वसमुखा, भावास्तु दूरं ग**ताः**।
सान्द्रानन्दझरी च यत्र परम, ज्योतिः प्रकाशात्म**के**
तत्ते धाम विभावितं विजयते, वैकुण्ठरूपं वि**भो** ॥ ४ ॥

यस्मिन्नाम चतुर्-भुजा हरिमणि, श्या**मा**वदा-तत्-वि**षो**
नानाभूषण-रत्नदीपितदिशो, राजद्-विमानाल**याः**।
भक्तिप्राप्ततथा-विधोन्नतपदा, दीव्यन्ति दिव्या ज**नाः**
तत्ते धाम निरस्तसर्वशमलं, वैकुण्ठरूपं ज**ये**त् ॥ ५ ॥

नानादिव्य-वधूजनै-रभिवृता, विद्युल्लता-तुल्य**या**
विश्वोन्मादन-हृद्यगात्रलतया, विद्योतिताशान्त**रा**।
त्वत्पादांबुज-सौरभैक-कुतुकाल्, लक्ष्मीः स्वयं लक्ष्य**ते**
यस्मिन् विस्मयनीय-दिव्यविभवं, तत्ते पदं देहि **मे** ॥ ६ ॥

तत्रैवं प्रतिदर्शिते निजपदे, रत्नासनाध्यासितम्

भास्वत्-कोटिलसत्-किरीटकटकाद्, याकल्प-दीप्राकृ<u>ति</u>।

श्रीवत्साङ्कित-मात्तकौस्तुभमणिच्,छा<u>या</u>रुणं कारणम्

विश्वेषां तव रूपमैक्षत विधिः, तत्ते विभो भातु <u>मे</u> ॥७॥

कालांभोद-कलायकोमळरुची, च<u>क्रे</u>ण चक्रं दि<u>शा</u>म्

आवृण्-वानमुदारमन्दहसित, स्यन्दप्रसन्नाननम्।

राजत्कम्बुगदारि पङ्कजधर, श्रीमद्-भुजामण्डलम्

स्रष्टुस्-तुष्टिकरं वपुस्तव विभो, मद्रोगमुद्-वास<u>ये</u>त् ॥ ८॥

दृष्ट्वा संभृतसंभ्रमः कमलभूः, त्व<u>त्पा</u>द्-पाथोरु<u>हे</u>

हर्षावेशवशंवदो निपतितः, प्रीत्या कृतार्थी-भवन्।

जानास्येव मनीषितं मम विभो, ज्ञा<u>नं</u> तदा-पादय

द्वैता-द्वैवतभवत्-स्वरूपपरमिः, याचष्ट तं त्वां भजे॥ ९॥

आताम्रे चरणे विनम्रमथ तं, ह<u>स्ते</u>न हस्ते स्पृश<u>न्</u>

बोधस्ते भविता न सर्गविधि<u>भिः</u>, बन्धोऽपि सञ्जाय<u>ते</u>।

इत्याभाष्य गिरं प्रतोष्यनितरां, तच्चित्तगूढः स्वयम्

सृष्टौ तं समुदैरयस्स भगवन्, उल्लासयोल्-लाघ<u>ता</u>म् ॥१०॥ श्री हरये नमः।

इति हिरण्य-गर्भोत्पत्ति-वर्णनं सप्तम-दशकं समाप्तम्॥

## नैमित्तिक प्रलयः, नाभिकमलात् ब्रह्मणः आविर्भावः च

**Tune -Evam chaturdasa**

एवं तावत्-प्राकृत-प्रक्षया**न्ते**

ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा ।

ब्रह्मा भूयस्-त्वत्त एवाप्य वेदान्

सृष्टिं च**क्रे** पूर्व-कल्पोपमानाम् ॥ १॥

सोऽयं चतुर्-युगसहस्र-मितान्यहा**नि**

तावन्-मिताश्चरजनीर्-बहुशो निनाय ।

निद्रात्यसौ त्वयि निलीय समं स्व-सृष्टैः

नैमित्तिकप्रळय-माहुरतोऽस्य रात्रिम् ॥ २॥

अस्मा-द्दशां पुनरहर्मुख-कृत्य-तु**ल्या**म्

सृष्टिं करोत्यनुदिनं स भवत्-प्रसादात् ।

प्राग्ब्राह्म-कल्पजनुषां च परायुषां तु

सुप्तप्रबोधन-समाऽस्ति तदाऽपि सृष्टिः॥ ३॥

पञ्चाशदब्द-मधुनास्व-वयोऽर्ध-रूप**म्**

एकं परार्ध-मतिवृत्य हि वर्ततेऽसौ ।

तत्रान्त्यरात्रि-जनितान्कथयामि भूमन्

पश्चाद्दिनावतरणे च भवद्-विलासान् ॥ ४ ॥

दिनावसानेऽथ सरोजयो<u>निः</u>, सुषुप्ति-कामस्त्वयि सन्निलिल्ये

जगन्ति च त्वज्जठरं समीयुः, तदेदमेकार्णव-मास विश्वम् ॥५॥

तवैव वेषे फणिराज शे<u>षे</u>, जलैक-शेषे भुवने स्म शेषे ।

आनन्द-सान्द्रानुभव-स्वरूपः, स्वयोग-निद्रापरि-मुद्रितात्मा ॥

कालाख्यशक्तिं प्रलयावसा<u>ने</u>, प्रबोधयेत्यादिशता-किलादौ ।

त्वया प्रसुप्तं परिसुप्तशक्ति, व्रजेन तत्राखिल-जीवधाम्ना ॥ ७॥

चतुर्युगाणां च सहस्रमे<u>वं</u>, त्वयि प्रसु<u>प्ते</u> पुनरद्-वितीये

कालाख्यशक्तिः प्रथमप्रबुद्धा, प्रबोधयत्वाम् किल विश्वनाथ॥८ ॥

विबुध्य च त्वं जलगर्भशा<u>यिन्</u>

विलोक्य लोकानखिलान्-प्रलीनान् ।

तेष्वेव सूक्ष्मात्मतया निजान्तः

स्थितेषु विश्वेषु ददाथ दृष्टिम् ॥ ९॥

ततस्-त्वदी<u>या</u>दयि नाभि-र<u>न्ध्राद्</u> , उदञ्चितं किञ्चन दिव्यपद्मम्

निलीननिश्शेष-पदार्थमाल, सङ्क्षेपरूपं मुकुलायमानम् ॥१०॥

तदेतदंभोरुह-कुड्मलं <u>ते</u>, कळेबरात्तोयपथे प्ररूढम् ।

बहिर्-निरीतं परितः स्फुरद्भिः, स्वधामभिर्-ध्वान्तमलं-न्यकृन्तत् ॥

संफुल्लपत्रे नितरां विचि<u>त्रे</u>, तस्मिन्-भवद्-वीर्य-धृते सरोजे

स पद्म-ज<u>न्मा</u> विधिरा-विरासीत्, स्वयं-प्रबुद्धाखिल-वेदराशिः ॥

अस्मिन्-परात्मन् ननु पाद्म-क**ल्पे**, त्वमित्थ-मुत्थापित-पद्मयोनिः ।

अनन्त-भू**मा** मम रोग-राशिं, निरुन्धि वातालयवास विष्णो॥ श्री हरये नमः।

(Sloka 13 - Do Samkalpam & chant 108 times for 48 days – Cancer cure by Priyava)

इति प्रलय-जगत्सृष्ट्योर्-वर्णनमष्टम-दशकं समाप्तम्

## नवम-दशकम्-9

---

## ब्रह्मणः तपः भुवन-निर्मितः च

**Tune – sthitassa kamalod**

स्थितः स कमलोद्-भवः, तव हि नाभिपङ्केरु**हे**

कुतः स्विदिद-मम्बु**धौ**, उदित-मित्यना-लोकयन्

तदीक्षण-कुतूहलात्, प्रतिदिशं विवृत्ता**नः**

चतुर्-वदनताम**गाद्**, विकस-दष्टदष्-ट्यम्बु**जा**म् ॥१॥

महार्णव-विघूर्णितं, कमलमेव तत्केवल**म्**

विलोक्य तदुपाश्र**यं**, तव तनुं तु नालोकयन्

क एष कमलोदरे, महति निस्सहायो ह्यह**म्**

कुतः स्विदिदमम्बुजं, समजनीति चिन्ताम**गा**त् ॥२॥

अमुष्य हि सरोरुहः, किमपि कारणं सम्भ**वेद्**

इतिस्म कृतनिश्चयः, स खलु नालरन्-ध्राध्व**ना**

स्वयोगबल-विद्यया, समवरूढवान्-प्रौढ**धीः**

त्वदीयमति-मोहनं, न तु कळेबरं दृष्ट**वा**न् ॥ ३॥

ततःसकल-नालिका, विवरमार्गगो मार्गयन्

प्रयस्य शतवत्सरं, किमपि नैवसं-दृष्ट<u>**वा**</u>न् ।

निवृत्य कमलोदरे, सुख-निषण्ण एकाग्र<u>**धीः**</u>

समाधिबलमाद<u>**धे**</u>, भवदनुग्रहै-काग्र<u>**ही**</u> ॥ ४॥

शतेन परिवत्सरैः, दृढसमाधि-बन्धोल्ल<u>**स**</u>त्

प्रबोधविशदीकृतः, स खलु पद्मिनीसम्भवः ।

अदृष्टचरमद्-भुतं, तव हि रूपमन्तर्-दृ<u>**शा**</u>

व्यचष्ट परितुष्ट<u>**धीः**</u>, भुजगभोग-भागाश्रयम्॥ ५॥

किरीटमकुटोल्लसत्, कटकहार-केयूरयुङ्

मणिस्फुरित-मेख<u>**लं**</u>, सुपरिवीत-पीतांबरम् ।

कलायकुसुमप्रभं, गळतलोल्लसत्कौस्तुभम्

वपुस्तदयि भावये, कमलजन्मने दर्शितम् ॥ ६॥

श्रुतिप्रकरदर्शित, प्रचुरवैभव श्रीपते

हरे जय जय प्र<u>**भो**</u>, पदमुपैषि दिष्ट्या दृ<u>**शोः**</u> ।

कुरुष्व धियमाशु मे, भुवननिर्मितौ कर्म<u>**ठा**</u>म्

इति द्रुहिणवर्णित, स्वगुणबंहिमा पाहि <u>**मा**</u>म्॥ ७ ॥

लभस्व भुवनत्रयी, रचनदक्षतामक्ष<u>**ता**</u>म्

गृहाण मदनुग्रहं, कुरु तपश्च भूयो वि<u>**धे**</u> ।

भवत्वखिलसाधनी, मयि च भक्तिरत्-युत्कटे<u>**ति**</u>

उदीर्य गिरमादधा, मुदितचेतसं वेधसम् ॥ ८॥

शतं कृत-तपास्ततः, स खलु दिव्य-संवत्स**रा**न्

अवाप्य च तपोबलं, मतिबलं च पूर्वाधिकम् ।

उदीक्ष्य किल कम्पितं, पयसि पङ्कजं वायु**ना**

भवद्-बल-विजृम्भितः, पवनपाथसी पीत**वा**न्॥ ९॥

तवैव कृपया पुनः, सरसिजेन तेनैव स

प्रकल्प्य भुवनत्र**यीं**, प्रववृते प्रजानिर्मि**तौ** ।

तथाविध-कृपाभरो, गुरुमरुत्पुराधीश्वर

त्वमाशु परिपाहि मां, गुरुदयोक्षितै-रीक्षि**तैः**॥१०॥ श्री हरये नमः।

इति जगत्सृष्टि-प्रकार वर्णनं समाप्तम्

## दशम-दशकम्-10

## सृष्टि-भेदाः

**Tune – Evam charutdasa**

वैकुण्ठ वर्धित-बलोऽथ, भवत्-प्रसा**दा**द्

अम्भोज-योनिरसृजत्-किल जीवदेहान् ।

स्थास्नूनि भूरुहमयानि तथा तिरश्चाम्

जातिं मनुष्यनिवहानपि देवभेदान् ॥ १॥

मिथ्याग्रहास्मि-मतिराग-विकोपभी**तिः**

अज्ञान-वृत्ति-मिति पञ्च-विधां स सृष्ट्वा ।

उद्दामतामस-पदार्थ-विधानदूनः

तेने त्वदीयचरण-स्मरणं विशुद्ध्यै ॥ २॥

तावत्-स-सर्ज मनसा सनकं सनन्द**म्**

भूयः सनातन-मुनिं च सनत्कुमारम् ।

ते सृष्टिकर्मणि तु तेन नियुज्यमा**नाः**

त्वत्पाद-भक्तिरसिका जगृहुर्न वाणीम्॥३॥

तावत्प्रकोप-मुदितं प्रति-रुन्ध-तोऽ**स्य**

भ्रूमध्य-तोऽजनि मृडो भवदेकदेशः ।

नामानि मे कुरु पदानि च हा विरिञ्चे**ति**

आदौ रुरोद किल तेन स रुद्र-नामा ॥ ४॥

एका-दशाह्-वयतया च विभिन्न-रूप**म्**

रुद्रं विधाय दयिता वनिताश्च दत्वा।

तावन्त्यदत्त च पदानि भवत्प्रणुन्नः

प्राह प्रजाविरचनाय च सादरं तम् ॥ ५॥

रुद्राभि-सृष्टभयदा-कृतिरुद्रसं**घ**

संपूर्यमाण-भुवनत्रय-भीतचे**ताः** ।

मा मा प्रजाः सृज तपश्चर मङ्गळायेति

आचष्ट तं कमलभूर्भव-दीरितात्मा ॥ ६॥

तस्याथ सर्गरसिकस्य मरीचिर**त्रिः**

तत्राङ्गिराः क्रतुमुनिः पुलहः पुलस्त्यः ।

अङ्गादजायत भृगुश्च वसिष्ठदक्षौ

श्रीनारदश्च भगवन् भवदंघ्रिदासः ॥ ७॥

धर्मादि-कानभि-सृजन्नथ कर्दमं **<u>च</u>**

वाणीं विधाय विधिरङ्गज-सङ्कुलोऽभूत् ।

त्वद्-बोधितैः सनकदक्ष-मुखैस्तनूजैः

उद्-बोधितश्च विरराम तमो विमुञ्चन् ॥ ८॥

वेदान्पुराण-निवहानपि सर्ववि**<u>द्याः</u>**

कुर्वन्निजानन-गणाच्चतुराननोऽसौ ।

पुत्रेषु तेषु विनिधाय स सर्गवृद्धिम्

अप्राप्नुवं-स्तव पदाम्बुज-माश्रितोऽभूत् ॥ ९॥

जानन्नुपायमथ देहमजो विभ**<u>ज्य</u>**

स्त्रीपुंसभावम-भजन्मनुतद्-वधूभ्याम् ।

ताभ्यां च मानुषकुलानि विवर्धयंस्त्वम्

गोविन्द मारुतपुरेश निरुन्धि रोगान् ॥ १० श्री हरये नमः।

इति सृष्टिभेद वर्णनं दशमदशकं समाप्तम्

## हिरण्याक्षस्य, हिरण्यकशिपोः च उत्पत्तिः

**<u>Tune – Evam chaturdasa</u>**

क्रमेण सर्गे परिवर्ध-माने, कदापि दिव्याः सनकाद-यस्ते

भवद्-विलोकाय विकुण्ठलोकं, प्रपेदिरे मारुतमन्दिरेश॥ १॥

मनोज्ञनैः श्रेय-सकाननाद्यैः, अनेकवापिमणि-मन्दिरैश्च ।

अनोपमं तं भवतो निकेतं, मुनीश्वराः प्रापुरतीत-कक्ष्याः॥ २ ॥

भवद्दि-दृक्षून्-भवनं विविक्षून्, द्वाःस्थौ जयस्थान् विजयोऽप्यरुन्धाम्

तेषां च चित्ते पदमाप कोपः, सर्वं भवत्-प्रेरण-यैव भूमन्॥ ३॥

वैकुण्ठ-लोकानुचित-प्रचेष्टौ, कष्टौ युवां दैत्य-गतिं भजेतम्

इति प्रशप्तौ भवदाश्रयौ तौ, हरि-स्मृतिर्-नोऽस्-त्विति नेमतुस्तान्॥

तदे-तदा-ज्ञाय भवान-वाप्तः, सहैव लक्ष्म्या बहिरंबुजाक्ष

खगेश्वरां-सार्पित-चारुबाहुः, आनन्द-यंस्तानभिराम-मूर्त्या ॥

प्रसाद्य गीर्भिः स्तुवतो मुनीन्द्रान्, अनन्यनाथावथ पार्षदौ तौ

संरम्भयोगेन भवैस्-त्रिभिर्माम्, उपेतमित्यात्त-कृपांन्यगादीः ॥

त्वदीय-भृत्यावथ कश्यपात्तौ, सुरारि-वीरा-वुदितौ दितौ द्वौ

सन्ध्या-समुत्पादन-कष्टचेष्टौ, यमौ च लोकस्य यमाविवान्यौ ॥

हिरण्यपूर्वः कशिपुः किलैकः, परो हिरण्याक्ष इतिप्रतीतः ।

उभौ भवन्नाथम-शेषलोकं, रुषा न्यरुन्धां निजवासनान्धौ॥८ ॥

तयोर्-हिरण्याक्ष-महासुरे**न्द्रो**

रणाय धावन्न-नवाप्त-वैरी

भवत्प्रियां क्ष्मां सलिले निमज्ज्य

चचार गर्वाद्-विनदन् गदावान् ॥ ९॥

ततो जलेशात्-सदृशं भवन्त**म्**

निशम्य बभ्राम गवेषयंस्-त्वाम्

भक्तैकदृश्यः स कृपानिधे त्वम्

निरुन्धि रोगान् मरुदालयेश ॥१०॥ श्री हरये नमः।

इति हिरण्यकशिपूत्पत्ति-वर्णनमेकादश-दशकं समाप्तम्

**द्वादश-दशकम्**-12

---

## वराह अवतारः

**Tune – Evam chaturdasa**

स्वायम्भुवो मनुरथो जनसर्ग-शी**लो**

दृष्ट्वा महीमसमये सलिले निमग्नाम् ।

स्रष्टारमाप शरणं भवदङ्घ्रिसेवा

तुष्टाशयं मुनिजनैः सह सत्यलोके ॥ १॥

कष्टं प्रजाः सृजति मय्यवनिर्-निम**ग्ना**

स्थानं सरोजभव कल्पय तत्प्रजानाम् ।

इत्येवमेष कथितो मनुना स्वयम्भूः

अम्भोरुहाक्ष तव पादयुगं व्यचिन्तीत् ॥ २॥

हा हा विभो जलमहं न्यपिबं पुर<u>**स्ताद्**</u>

अद्यापि मज्जति मही किमहं करोमि ।

इत्थं त्वदङ्घ्रि-युगळं शरणं यतोऽस्य

नासापुटात्-समभवः शिशुकोलरूपी ॥ ३॥

अङ्गुष्ठ-मात्रवपुरुत्पतितः **पुर<u>स्ता</u>**त्

भूयोऽथ कुम्भिसदृशः समजृम्भथास्-त्वम् ।

अभ्रे तथाविधमु-दीक्ष्य भवन्तमुच्चैः

विस्मेरतां विधिरगात्-सह सूनुभिः स्वैः ॥ ४॥

कोऽसावचिन्त्य-महिमा किटिरुत्थितो <u>**मे**</u>

नासापुटात्-किमु भवेदजितस्य माया ।

इत्थं विचिन्तयति धातरि-शैलमात्रः

सद्यो भवन्-किल जगर्ज्जिथ घोरघोरम्॥ ५ ॥

तं ते निनाद-मुपकर्ण्य जनस्तपः<u>**स्थाः**</u>

सत्य-स्थिताश्च मुनयो नुनुवुर्-भवन्तम् ।

तत्-स्तोत्र-हर्षुलमनाः परिणद्य भूयः

तोयाशयं विपुल-मूर्तिरवातर-स्त्वम् ॥ ६॥

ऊर्ध्व-प्रसारिपरि-धूम्रविधूत-रो<u>**मा**</u>

प्रोत्-क्षिप्तवालधि-रवाङ्मुख-घोरघोणः ।
तूर्णप्रदीर्ण-जलदः परिघूर्ण-दक्ष्णा
स्तोतॄन्-मुनीन् शिशिरयन्नवतेरिथ त्वम् ॥ ७॥

अन्तर्-जलं तदनु सङ्कुलनक्र-चक्रम्
भ्राम्यत्-तिमिङ्गिलकुलं कलुषोर्-मिमालम् ।
आविश्य भीषणरवेण रसा-तलस्थान्
आकम्पयन्व-सुमतीमगवेष-यस्त्वम् ॥ ८॥

दृष्ट्वाऽथ दैत्य-हतकेन रसातलान्ते
संवेशितां झटिति कूटकिटिर्-विभो त्वम् ।
आपातुकान-विगणय्य सुरारिखेटान्
दंष्ट्राङ्कुरेण वसुधाम-दधाः सलीलम् ॥ ९॥

अभ्युद्-धरन्नथ धरां दशनाग्र-लग्नम्
उस्ताङ्क-राङ्कित इवाधि-कपीवरात्मा ।
उद्धूतघोर-सलिलाज्जल-धेरुदञ्चन्
क्रीडावराह-वपुरीश्वर पाहि रोगात् ॥ १०॥ श्री हरये नमः।

इति वराहावतार वर्णनम् द्वादश-दशकं समाप्तम्

## हिरण्याक्ष वधः

**Tune - Sandra**

हिरण्याक्षं तावद्, वरद भवदन्वेषण-परम्

चरन्तं सांवर्ते, पयसि निज-जङ्घापरि-मिते ।

भवद्-भक्तो गत्वा, कपट-पटुधीर्-नारदमुनिः

शनैरूचे नन्दन् दनुजमपि निन्दंस्तव बलम् ॥ १॥

स मायावी विष्णुर्-हरति, भवदीयां वसुमतीम्

प्रभो कष्टं कष्टं, किमिदमिति तेनाभि-गदितः ।

नदन् क्वासौ क्वासाविति, स मुनिना दर्शितपथो

भवन्तं संप्रापद् ,धरणिधर-मुद्यन्त-मुदकात् ॥ २ ॥

अहो आरण्योऽयं, मृग इति हसन्तं बहुतरैः

दुरुक्तैर्-विध्यन्तं, दितिसुतमवज्ञाय भगवन् ।

महीं दृष्ट्वा दंष्ट्राशिरसि, चकितां स्वेन महसा

पयोधावा-धाय, प्रसभ-मुदयुङ्-क्था मृधविधौ ॥ ३॥

गदापाणौ दैत्ये, त्वमपि हि गृहीतोन्-नतगदो

नियुद्धेन क्रीडन् ,घट-घट-रवोद्-घुष्टवियता ।

रणालोकौत्-सुक्यान् ,मिलतिसुर-संघे द्रुतममुम्

निरुन्ध्याः सन्ध्यातः प्रथम-मिति, धात्रा जगदिषे॥४॥

गदोन्-मर्दे तस्मिंस् , तव खलु गदायां दितिभुवो

गदाघाताद्-भूमौ, झटिति पतिता**या**-महह **भोः**

मृदुस्मेरास्-यस्त्वम्, दनुज-कुल-नि**र्मू**लन-चण**म्**

महाचक्रं स्मृ**त्वा**, करभुवि दधा**नो** रुरुचि**षे** ॥ ५॥

ततः शूलं, काल-प्रतिमरुषि, दै**त्ये** विसृज**ति**

त्वयि छिन्दत्येतत्, करकळित-चक्रप्रह**रणा**त्

समारुष्टो मुष्ट्या, स खलु वितुदम्स्-**त्वा**म् समत**नो**त्

गलन्माये मा**याः**, त्वयि किल जगन्मोहनक**रीः** ॥ ६ ॥

भवच्चक्र-ज्योतिष्, कणलव-निपा**ते**न विधु**ते**

ततो मायाच**क्रे**, विततघन-रोषान्ध-मनसम् ।

गरिष्ठाभिर्-मुष्टि-प्रहृतिभिः, अभि**घ्न**न्-तमसुर**म्**

कराग्रेण**स्वे**न, श्रवण-पदमू**ले** निरव**धीः** ॥ ७॥

महाकायःसोऽयं, तव करसरोज-प्रमथि**तो**

गलद्-रक्तो वक्राद् , अपत-दृषिभिः श्लाघितह**तिः**

तदा त्वामुद्दाम, प्रमदभर-वि**द्यो**ति-हृद**या**

मुनीन्द्राःसान्द्रा**भिः**, स्तुतिभिर**नुवन्** अध्वरतनुम्॥ ८ ॥

त्वयिच्छन्दो रोमस्वपि, कुशगणश्चक्षुषि घृत**म्**

चतु**र्**-होता-रोऽ**ग्नौ**, स्रुगपि वद**ने** चोदर इडा ।

ग्रहा जिह्-वायां ते, परपुरुष क**र्णे** च चम**सा**

विभो सोमो वीर्यं, वरद गलदे**शेऽ**प्युपस**दः** ॥ ९॥

मुनीन्द्रैरित्यादिः, तवनमुखरैर्-मोदितम**नाः**

महीयस्या मू**र्त्या**, विमलतर-की**र्त्या** च विलसन् ।

स्वधिष्ण्यं संप्राप्तः, सुखरस विहा**री** मधुरि**पो**

निरुन्ध्या रोगं **मे**, सकलमपि वा**ता**लयप**ते**॥ १०॥ श्री हरये नमः।

इति हिरण्याक्ष-युद्ध वर्णनं त्रयोदश दशकं समाप्तम्

## चतुर्दश-दशकम्-14

---

## कपिल-अवतारः

**Tune - Kalyatham**

समनुस्मृत-तावकाङ्घ्रि-यु**ग्मः**, स मनुःपङ्कज-सम्भ-वाङ्गजन्मा

निजमन्तर-मन्तरायही**नं**, चरितं ते कथयन्-सुखं निनाय ॥१॥

समये खलु तत्र कर्दमा**ख्यो**, द्रुहिणच्छायभवस्त-दीयवाचा ।

धृत-सर्गरसो निसर्गर**म्यं**, भगवंस्-त्वामयुतं समाः सिषेवे॥२॥

गरुडोपरि काळमेघक**म्रं**, विलसत्-केलिसरोज-पाणिपद्मम्

हसितोल्लसि-ताननं विभो त्वं, वपुराविष्कुरुषे स्म कर्दमाय॥ ३॥

स्तुवते पुलका-वृताय त**स्मै**, मनुपुत्रीं दयितां नवापि पुत्रीः

कपिलं च सुतं स्वमेव प**श्चा**त् , स्वगतिं चाप्यनुगृह्य निर्गतोऽभूः॥४ ॥

स मनुश्शत-रूपया महि**ष्या**, गुणवत्या सुतया च देवहूत्या ।

भवदीरित-नारदोपदि**ष्टः**, समगात्कर्दम-मागति-प्रतीक्षम्॥ ५॥

मनुनोपहृतां च देवहू**तिं**, तरुणी-रत्न-मवाप्य कर्दमोऽसौ ।
भवदर्चन-निर्वृतोऽपि त**स्यां**, दृढ-शुश्रूषणया दधौ प्रसादम्॥

सपुनस्-त्वदुपासन-प्रभा**वाद्** , दयिता-कामकृते कृते विमाने
वनिताकुल-सङ्-कुलो नवा**त्मा**, व्यहरद्देव-पथेषु देवहूत्या॥७ ॥

शतवर्षमथ व्यतीत्य सोऽ**यं**, नव कन्याः समवाप्य धन्यरू**पाः**
वनयानसमुद्-यतोऽपि का**न्ता**, हित-कृत्वज्जननोत्-सुको न्यवात्सीत् ॥

निजभर्तृगिरा भवन्-निषे**वा**, निरतायामथ देव देवहूत्याम् ।
कपिलस्त्वम-जायथा जना**नां**, प्रथयिष्यन्-परमात्म-तत्वविद्याम्॥९ ॥

वनमेयुषि कर्दमे प्रस**न्ने**, मतसर्वस्वमु-पादिशञ्जन**न्यै**
कपिलात्मक वायुमन्दिरे**श**, त्वरितं त्वं परिपाहि मां गदौ**घा**त् ॥ १० श्री हरये नमः।

इति कपिलोपाख्यानं चतुर्दश दशकं समाप्तम्

contd

**पञ्चदश-दशकम्**-15

---

## कपिल उपदेश

**Tune - Sandra**

मतिरिह गुण-सक्ता, बन्धकृत्तेष्वस**क्ता**त्
    अमृत-कृदुपरु**न्धे**, भक्तियोगस्तु सक्ति**म्** ।
महदनुगमलभ्या, भक्ति-रे**वा**त्र सा**ध्या**
    कपिलतनुरिति **त्वं**, देवहूत्यै न्य**गा**दीः ॥ १॥

प्रकृतिमह-दहङ्काराश्च मा<u>त्रा</u>श्च भू<u>तान्</u>

अपिहृदपि दशा<u>क्षी,</u> पूरु<u>षः</u> पञ्चविं<u>शः</u> ।

इति विदितविभा<u>गो</u>, मुच्यतेऽसौ प्रकृ<u>त्या</u>

कपिलतनुरिति त्वं, देवहू<u>त्यै</u> न्यगा<u>दीः</u> ॥ २॥

प्रकृतिगत-गुणौ<u>घैः</u>, नाज्य<u>ते</u> पूरु<u>षो</u>ऽयम्

यदि तु सजति त<u>स्यां</u>, तद्गुणा<u>स्तं</u> भ<u>जे</u>रन् ।

मदनुभजनतत्वा लोचनैः साप्य-<u>पेया</u>त्

कपिलतनुरिति <u>त्वं</u>, देवहू<u>त्यै</u> न्यगा<u>दीः</u> ॥ ३॥

विमलमति-रुपा<u>त्तैः</u>, आसना<u>द्यैर्</u>-मदङ्ग<u>म्</u>

गरुड-समधि<u>रूढं</u>, दिव्यभू<u>षायुधा</u>ङ्कम् ।

रुचि-तुलिततमालं, शील-<u>ये</u>तानु-<u>वे</u>लम्

कपिलतनुरिति त्वं, देवहू<u>त्यै</u> न्यगा<u>दीः</u> ॥ ४॥

मम गुणगणलीला कर्ण<u>नैः</u> कीर्तना<u>द्यैः</u>

मयि सुरसरि<u>दो</u>घ, प्रख्यचि<u>त्ता</u>नु-वृ<u>त्तिः</u> ।

भवति परमभक्तिः, सा हि <u>मृत्योर्</u>-वि<u>जे</u>त्री

कपिलतनुरिति त्वं, देवहू<u>त्यै</u> न्यगा<u>दीः</u> ॥ ५॥

अह ह बहुलहिंसा, सञ्चि-तार्थैः कु<u>टु</u>म्बम्

प्रति-दिनमनुपुष्णन् , स्त्रीजि<u>तो</u> बाल<u>ला</u>ली ।

विशति हि गृहसक्तो, यात<u>नां</u> मय्य-भ<u>क्तः</u>

कपिलतनुरिति त्वं, देवहू<u>त्यै</u> न्यगा<u>दीः</u> ॥ ६॥

युवतिजठरखिन्नो, जात-बो<u>**धोऽ**</u>प्य-<u>**का**</u>ण्डे

प्रसवगलितबोधः, पीड<u>**यो**</u>ल्-लंङ्घ्य <u>**बा**</u>ल्यम् ।

पुनरपि बत मुह्यत्, एव ता<u>**रु**</u>ण्य-का<u>**ले**</u>

कपिल-तनुरिति त्वं, देवहू<u>**त्यै**</u> न्यगा<u>**दीः**</u> ॥ ७॥

पितृ-सुरगणयाजी, धार्मि<u>**को**</u> यो गृह<u>**स्थः**</u>

स च निपतति <u>**का**</u>ले, दक्षि<u>**णा**</u>ध्वोप<u>**गा**</u>मी ।

मयि निहितमकामं, कर्म तूदक्प<u>**था**</u>र्थम्

कपिल-तनुरिति त्वं, देवहू<u>**त्यै**</u> न्यगा<u>**दीः**</u> ॥ ८॥

इति सुविदितवेद्यां, देव <u>**हे**</u> देव<u>**हू**</u>तिम्

कृतनुति-मनुगृ<u>**ह्य**</u>, त्वं ग<u>**तो**</u> योगिस<u>**ङ्घैः**</u> ।

विमलमतिरथाऽसौ, भक्ति-यो<u>**गे**</u>न मु<u>**क्ता**</u>

त्वमपि जनहि<u>**ता**</u>र्थं, वर्त<u>**से**</u> प्रागु<u>**दीच्या**</u>म् ॥ ९॥

परम किमु बहूक्त्या, त्वत्पदा<u>**म्भो**</u>जभक्तिम्

सकलभयवि<u>**ने**</u>त्रीं, सर्वकामोप<u>**ने**</u>त्रीम् ।

वदसि खलु दृढं त्वं, त्वद्-विधू<u>**या**</u>म<u>**या**</u>न्मे

गुरुपवनपु<u>**रे**</u>श त्वय्युपाधत्स्व भक्तिम् ॥ १०॥ श्री हरये नमः।

इति कपिलोपदेशाख्यं पञ्चदश दशकं समाप्तम्

## नर नारायणोः अवतारः, दक्षयागः च

**Tune – Evam chaturdasa**

दक्षो विरिञ्च-तनयोऽथ मनोस्तनूजाम्

लब्ध्वा प्रसूतिमिह षोडश चाप कन्याः ।

धर्मे त्रयोदश ददौ पितृषु स्वधां च

स्वाहां हविर्-भुजि सतीं गिरिशे त्वदंशे ॥ १॥

मूर्तिर्-हि धर्मगृहिणी सुषुवे भवन्तम्

नारायणं नरसखं महितानुभावम् ।

यज्जन्मनि प्रमुदिताः कृत-तूर्यघोषाः

पुष्पोत्करान्प्रव-वृषुर्-नुनुवुः सुरौघाः ॥ २॥

दैत्यं सहस्रकवचं कवचैः परीतम्

साहस्र-वत्सरतपस्-समराभिलव्यैः ।

पर्याय-निर्मित-तपस्समरौ भवन्तौ

शिष्टैक-कङ्कटममुं न्यहतां सलीलम् ॥ ३॥

अन्वाचरन्-नुपदिशन्नपि मोक्षधर्मम्

त्वं भ्रातृमान् बदरिकाश्रम-मध्यवात्सीः ।

शक्रोऽथ ते शमतपोबल-निस्सहात्मा

दिव्याङ्गना-परिवृतं प्रजिघाय मारम् ॥ ४॥

कामो वसन्त-मलयानिल-बन्धु-शा<u>**ली**</u>

कान्ताकटाक्ष-विशिखैर्-विकसद्-विला<u>**सैः**</u> ।

विध्यन्मुहुर्-मुहुर-कम्पमुदीक्ष्य च त्वाम्

भीतस्-त्वयाथ जगदे मृदु-हासभा<u>**जा**</u> ॥ ५॥

भीत्यालमङ्गज-वसन्तसुराङ्गना <u>**वो**</u>

मन्मानसन्-त्विह जुषध्वमिति ब्रुवा<u>**णः**</u> ।

त्वं विस्मयेन परितः स्तुवतामथैषाम्

प्रादर्शयः स्वपरिचारक-कातरा<u>**क्षीः**</u> ॥ ६॥

सम्मोहनाय मिलिता मदना-दय<u>**स्ते**</u>

त्वद्दासिका-परिमळैः किल मोहमा<u>**पुः**</u> ।

दत्तां त्वया च जगृ-हुस्त्रपयैव सर्वः

स्वर्वासि-गर्वशमनीं पुनरूर्-वशीं ताम् ॥ ७॥

दृष्ट्-वोर्वशीं  तव कथां च निशम्य श<u>**क्रः**</u>

पर्याकुलोऽजनि भवन्-महिमावम<u>**र्शा**</u>त् ।

एवं प्रशान्तरमणीय-तराऽवतारात्

त्वत्तोऽधिको वरद कृष्ण-तनुस्त्वमेव ॥ ८॥

दक्षस्तु धातु-रतिलालनया रजो<u>**न्धो**</u>

नात्यादृतस्-त्वयि च कष्टम-शान्तिरा<u>**सी**</u>त् ।

येन व्यरुन्ध स भवत्तनु-मेव शर्वम्

यज्ञे च वैर-पिशुने स्वसुतां व्यमा<u>**नी**</u>त् ॥ ९॥

कृद्धेशमर्दित-मखः स तु कृत्त-शी**र्षो**

देवप्रसादित-हरादथ लब्धजीवः ।

त्वत्पूरित-क्रतुवरः पुनराप शान्तिम्

स त्वं प्रशान्तिकर पाहि मरुत्पुरेश ॥ १०॥

**ॐ नमो भगवते वासुदेवाय** – ४ X श्री हरये नमः।

इति नारायणावतार वर्णनं षोडश दशकं समाप्तम्

**सप्तदश-दशकम्**-17

## धृव चरितम्

**Tune – Evam chaturdasa**

उत्तान-पाद्-नृपतेर्-मनु-नन्दन**स्य**

जाया बभूव सुरुचिर्-नितरामभी**ष्टा** ।

अन्या सुनीतिरिति भर्-तुरनादृता सा

त्वामेव नित्यमगतिः शरणं गताऽ**भूत्** ॥ १॥

अङ्के पितुः सुरुचिपुत्रक-मुत्तमं त**म्**

दृष्ट्वा ध्रुवः किल सुनीति-सुतोऽधिरोक्ष्यन् ।

आचिक्षिपे किल शिशुः सुतरां सुरुच्या

दुस्सन्-त्यजा खलु भवद्-विमुखैरसू**या** ॥

त्वन्मोहिते पितरि पश्यति दारव**श्ये**

दूरं दुरुक्तिनिहतः स गतो निजा**म्बा**म् ।

साऽपि स्वकर्मगति-सन्तरणाय पुंसाम्

त्वत्-पादमेव शरणं शिशवे शशंस ॥ ३॥

आकर्ण्य सोऽपि भव-दर्चन-निश्चिता**त्मा**

मानी निरेत्य नगरात्-किल पञ्चव**र्षः** ।

सन्द्रिष्ट-नारदनिवेदित-मन्त्रमार्गः

त्वामारराध तपसा मधु-कानना**न्ते** ॥ ४॥

ताते विषण्ण-हृदये नगरीं गते**न**

श्रीनारदेन परिसान्-त्वितचित्तवृ**त्तौ** ।

बालस्-त्वदर्पित-मनाः क्रमवर्धितेन

निन्ये कठोरतपसा किल पञ्च मासान् ॥ ५॥

तावत्तपोबल-निरुच्छ्वसिते दिग**न्ते**

देवार्थितस्-त्वमुदयत्-करुणार्द्रचे**ताः** ।

त्वद्रूप-चिद्रसनिली-नमतेः पुरस्ताद्

आविर्-बभूविथ विभो गरुडाधि-रू**ढः** ॥ ६॥

त्वद्-दर्शन-प्रमदभार-तरङ्गितं त**म्**

दृग्भ्यां निमग्नमिव रूपरसायने ते ।

तुष्टूषमाण-मवगम्य कपोलदेशे

संस्पृष्ट-वानसि दरेण तथादरेण ॥ ७॥

तावद्-विबोधविमलं प्रणुवन्तमेन**म्**

आभाषथास्-त्वमवगम्य तदीयभावम् ।

राज्यं चिरं समनुभूय भजस्व भूयः

सर्वोत्तरं ध्रुव पदं विनिवृत्तिहीनम् ॥ ८॥

इत्यूचुषित्वयि गते नृप-नन्दनो<u>ऽसौ</u>

आनन्दिताखिल-जनो नगरीमुपे<u>तः</u> ।

रेमे चिरं भवदनुग्रह-पूर्णकामः

ताते गते च वनमादृत-राज्यभारः ॥ ९॥

यक्षेण देव निहते पुनरुत्तमेऽस्मि<u>न्</u>

यक्षैः स युद्धनिरतो विरतो मनू<u>क्त्या</u> ।

शान्त्या प्रसन्नहृदयाद्धनदा-दुपेतात्

त्वद्-भक्तिमेव सुदृढामवृणोन्-महात्मा ॥ १०॥

अन्ते भवत्पुरुष-नीतविमानया<u>तो</u>

मात्रा समं ध्रुवपदे मुदितोऽयमास्ते ।

एवं स्वभृत्य-जनपालन-लोलधीस्त्वम्

वातालयाधिप निरुन्धि ममामयौ<u>घान्</u> ॥ ११ ॥श्री हरये नमः।

इति ध्रुवचरित वर्णनं सप्तदश दशकं समाप्तम्

# पृथु-चक्रवर्ति चरितम्

**Tune – Evam chaturdasa**

जातस्य ध्रुव-कुल एव तुङ्ग-की**र्तेः**

अङ्गस्य व्यजनि सुतः स वेनना**मा** ।

तद्दोष-व्यथितमतिः स राजवर्यः

त्वत्पादे विहितमना वनं गतोऽभूत् ॥ १॥

पापोऽपि क्षितितल-पालनाय वे**नः**

पौराद्यैरुप-निहितः कठोरवी**र्यः** ।

सर्वेभ्यो निज-बलमेव संप्रशंसन्

भूचक्रे तव यजनान्ययं न्यरौत्सीत् ॥ २॥

सम्प्राप्ते हित-कथनाय तापसौ**घे**

मत्तोऽन्यो भुवनपतिर्न कश्चनेति ।

त्वन्निन्दा-वचनपरो मुनीश्वरैस्तैः

शापाग्नौ शलभ-दशामनायि वे**नः** ॥ ३॥

तन्नाशात्खल-जनभीरुकैर्-मुनी**न्द्रैः**

तन्मात्रा चिरपरिरक्षिते तदङ्गे ।

त्यक्ताघे परिमथिता, दथोरुदण्डाद्

दोर्दण्डे परिमथिते त्वमावि**रासीः** ॥ ४॥

विख्यातः पृथुरिति तापसोपदि**ष्टैः**

सूताद्यैः परिणुतभावि-भूरिवी**र्यैः** ।

वेनार्-त्या कबलितसम्पदं धरित्रीम्

आक्रान्तां निजधनुषा समा-मका**र्षीः** ॥ ५॥

भूयस्तां निजकुल-मुख्यवत्सयु**क्तैः**

देवाद्यैः समुचितचारु-भाजनेषु ।

अन्नादीन्यभिलषि-तानि यानि तानि

स्वच्छन्दं सुरभि-तनूमदू-दुहस्त्वम् ॥ ६॥

आत्मानं यहति मखैस्-त्वयि त्रिधाम**न्**

आरब्धे शतत-मवाजि-मेधयागे ।

स्पर्धालुः शतमख एत्य नीचवेषो

हृत्वाऽश्वं तव तनयात् पराजितोऽभूत् ॥ ७॥

देवेन्द्रं मुहुरिति वाजिनं हरन्त**म्**

वह्नौ तं मुनिवर-मण्डले जुहूषौ ।

रुन्धाने कमलभवे क्रतोः समाप्तौ

साक्षात्वम् मधुरिपुमैक्षथाः स्वयं स्वम् ॥ ८॥

तद्दत्तं वरमुपलभ्य भक्तिमे**काम्**

गङ्गान्ते विहितपदः कदापि देव ।

सत्रस्थं मुनिनिवहं हितानि शंसन्

ऐक्षिष्ठाः सनकमुखान् मुनीन् पुरस्तात् ॥ ९॥

विज्ञानं सनकमुखो-दितं दधा**नः**

स्वात्मानं स्वयमगमो वनान्तसेवी ।

तत्तादृक्-पृथुवपुरीश सत्वरं मे

रोगौघं प्रशमय वातगेहवासिन् ॥ १०॥ श्री हरये नमः।

इति पृतुचरिता वर्णनं अष्टादश दशकं समाप्तम्

**एकोनविंशतितम-दशकम्**-19

---

## प्रचेतसां कथा

**Tune – Evam chaturdasa**

पृथोस्तु नप्ता पृथुधर्म-कर्म**ठः**

प्राचीनबर्हि**र्**, युवतौ शतद्रुतौ ।

प्रचेतसो नाम सुचेतसः सुतान्

अजीजनत्वत्, करुणाङ्कुरानिव॥ १॥

पितुः सिसृक्षा-निरतस्य शास**ना**द्

भवत्-तपस्या-भिरता दशापि ते ।

पयोनिधिं पश्चिममेत्य तत्तटे

सरोवरं सन्द-दृशुर्-मनोहरम् ॥ २॥

तदा भवत्-तीर्थमिदं समाग**तो**

भवो भवत्सेवक-दर्शना-दृतः ।

प्रकाशमासाद्य पुरः प्रचेतसाम्

उपादिशद्-भक्त-तमस्तवस्तवम् ॥ ३॥

स्तवं जपन्तस्तममी जलान्त<u>रे</u>

भवन्त-मासेविषतायुतं स<u>माः</u> ।

भवत्-सुखास्वाद-रसाद्-मीष्वियान्

बभूव कालो ध्रुववन्न शीघ्रता ॥ ४॥

तपोभिरेषामतिमात्र-वर्धि<u>भिः</u>

स यज्ञ-हिं<u>सा</u>-निरतोऽपि पावि<u>तः</u> ।

पिताऽपि तेषां गृहयात-नारद

प्रदर्शितात्मा भवदात्मतां ययौ ॥ ५॥

कृपा-बलेनैव पुरः प्रचेत<u>सा</u>म्

प्रकाशमागाः पतगेन्द्र-वाह<u>नः</u>

विराजि चक्रादि-वरायुधांशुभिः

भुजाभि-रष्टाभिरुदञ्चितद्यु<u>तिः</u> ॥ ६॥

प्रचेतसां तावदयाचता-म<u>पिः</u>

त्वमेव कारुण्य-भराद्वरान<u>दाः</u> ।

भवद्-विचिन्ताऽपि शिवायदेहिनाम्

भवत्वसौ रुद्रनुतिश्च कामदा ॥ ७॥

अवाप्य कान्तां तनयां महीरु<u>हा</u>म्

तया रमध्वं दशलक्ष-वत्सरीम् ।

सुतोऽस्तु दक्षो ननु तत्क्षणाच्च माम्

प्रयास्यथेति न्यगदो मुदैव तान् ॥ ८॥

ततश्च ते भूतल-रोधिनस्त**रून्**

कृधा दहन्तो द्रुहिणेन वारि**ताः** ।

द्रुमैश्च दत्तां तनयामवाप्य ताम्

त्वदुक्त-कालं सुखिनोऽभिरेमिरे ॥ ९॥

अवाप्य दक्षं च सुतं कृताध्व**राः**

प्रचेतसो नारदलब्ध-याधिया ।

अवापुरानन्द-पदं तथाविधः

त्वमीश वातालयनाथ पाहिमाम् ॥ १०॥ श्री हरये नमः।

इति प्रचेतः कथानु वर्णनं एकोनविंशतितम दशकं समाप्तम्

## विंशतितम-दशकम्-20

## ऋषभ-योगीश्वर चरितम्

**Tune – Evam chaturdasa**

प्रियव्रतस्य प्रियपुत्र-भू**ताद्**

आग्नीध्र-राजा-दुदितो हि ना**भिः**

त्वां दृष्टवानिष्टदमिष्टि-मध्ये

तवैव तुष्ट्यै कृतयज्ञकर्मा ॥ १ ॥

अभिष्टुतस्तत्र मुनीश्वरैस्त्व**म्**

राज्ञः स्वतुल्यं, सुतमर्थ्यमा**नः** ।

स्वयं जनिष्येऽहमिति ब्रुवाणः

तिरोदधा बर्-हिषि विश्वमूर्ते ॥ २॥

नाभिप्रियायामथ मेरुदे**व्या**म्

त्वमंशतोऽभू-ऋषभाभिधा**नः** ।

अलोकसामान्य-गुणप्रभाव

प्रभाविताशेष-जनप्रमो**दः**॥ ३ ॥

त्वयि त्रिलोकीभृति राज्यभार**म्**

निधाय नाभिः सह मेरुदेव्या ।

तपोवनं प्राप्य भवन्निषेवी

गतः किलानन्दपदं पदं ते॥४ ॥

इन्द्रस्-त्वदुत्कर्ष-कृतादम**र्षा**द्

ववर्ष नास्मिन्नज-नाभव**र्षे**

यदा तदा त्वं निजयोगशक्त्या

स्ववर्षमेनद्-व्यदधाः सुवर्षम् ॥ ५॥

जितेन्द्र-दत्तां कमनीं जय**न्ती**म्

अथोद्-वहन्नात्म रताशयोऽपि ।

अजीजनत्तत्र शतं तनूजान्

येषां क्षितीशो भरतोऽग्रजन्मा ॥ ६॥

नवाभवन्-योगिवरा नवा**न्ये**

त्वपालयन्-भारतवर्ष-ख**ण्डा**न्

सैका त्वशीतिस्तव शेषपुत्राः

तपोबलाद्-भूसुरभूयमीयुः ॥७॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्रम**ध्ये**

विरक्तिभक्त्यन्-वित-मुक्तिमार्गम् ।

स्वयं गतः पारमहंस्य-वृत्तिम्

अधा जडोन्मत्त-पिशाचचर्याम् ॥ ८॥

परात्मभूतोऽपि परोपदेश**म्**

कुर्वन्-भवान्-सर्वनिरस्यमा**नः** ।

विकार**ही**नो विचचार कृत्स्नाम्

मही-महीनात्मरसाभिलीनः ॥ ९॥

शयुवृतं गोमृग-काकच**र्या**म्

चिरं चरन्नाप्य परं स्वरूप**म्**

दवा-हृताङ्गः कुटकाचले त्वम्

तापान्ममापाकुरु वातनाथ ॥ १० ॥ **श्री हरये नमः।**

इति ऋषभ योगीश्वर चरित वर्णनं विंशतितम दशकं समाप्तम्

## नव वर्षाणि,सप्तद्वीप आदयः च

**Tune – Evam chaturdasa**

मध्योद्भवे भुव इलावृतनाम्नि वर्षे

गौरीप्रधान-वनिताजन-मात्रभाजि ।

शर्वेण मन्त्रनुतिभिः समुपास्यमानम्

सङ्कर्षणात्मक-मधीश्वर संश्रये त्वाम् ॥ १॥

भद्राश्वनामक इलावृत-पूर्ववर्षे

भद्रश्रवोभि-ऋषिभिः परिणूयमानम् ।

कल्पान्तगूढ-निगमोद्धरणप्रवीणम्

ध्यायामि देव हयशीर्षतनुं भवन्तम् ॥ २॥

ध्यायामि दक्षिणगते हरिवर्षवर्षे

प्रह्लाद-मुख्यपुरुषैः परिषेव्यमाणम् ।

उत्तुङ्गशान्त-धवळाकृति-मेकशुद्ध

ज्ञानप्रदं नरहरिम् भगवन् भवन्तम् ॥ ३॥

वर्षे प्रतीचि ललितात्मनि केतुमाले

लीलाविशेष-ललितस्मित-शोभनाङ्गम् ।

लक्ष्म्या प्रजापतिसुतैश्च निषेव्यमाणम्

तस्याः प्रियाय धृतकामतनुं भजे त्वाम् ॥ ४॥

रम्येह्-युदीचि खलु रम्यकनाम्नि वर्षे

तद्वर्षनाथ-मनुवर्य-सपर्यमाणम् ।
भक्तैकवत्सल-ममत्सर-हृत्सु भान्तम्
मत्स्याकृतिं भुवननाथ भजे भवन्तम् ॥ ५॥

वर्षं हिरण्मयसमाह्-वयमौत्तराह**म्**
आसीनमद्रि-धृतिकर्मठ-कामठाङ्गम् ।
संसेवते पितृगण-प्रवरोऽर्यमायम्
तं त्वां भजामि भगवन् परचिन्मयात्मन् ॥ ६॥

किं चोत्तरेषु कुरुषु प्रियया धर**ण्या**
संसेवितो महितमन्त्रनुति-प्रभेदैः ।
दंष्ट्राग्रघृष्ट-घनपृष्ठ-गरिष्ठवर्ष्मा
त्वं पाहि विज्ञनुतयज्ञ-वराहमूर्ते ॥ ७॥

याम्यां दिशं भजति किंपुरुषाख्यव**र्षे**
संसेवितो हनुमता दृढभक्तिभाजा ।
सीताभिराम-परमाद्भुत-रूपशाली
रामात्मकः परिलसन्-परिपाहि विष्णो ॥ ८॥

श्रीनारदेन सह भारतखण्डमु**ख्यैः**
त्वं सांख्ययोग-नुतिभिः समुपास्यमा**नः** ।
आकल्प-कालमिह साधु-जनाभिरक्षी
नारायणो नरसखः परिपाहि भूमन् ॥ ९॥

प्लाक्षेऽर्क-रूपमयि शाल्मल इन्दुरूप**म्**

द्वीपे भजन्ति कुशनामनि वह्निरूपम् ।

क्रौञ्चेऽम्बु-रूपमथ वायुमयं च शाके

त्वां ब्रह्मरूपमयि पुष्करनाम्नि लो**काः**॥ १० ॥

सर्वैर्-धृवादिभिरुडु-प्रकरैर्-ग्रहै**श्च**

पुच्छादिकेष्व-वयवेष्वभि-कल्प्यमा**नैः** ।

त्वं शिंशुमारवपुषा महतामुपास्यः

सन्ध्यासु रुन्धि नरकं मम सिन्धुशायिन् ॥ ११ ॥

पाताळ-मूलभुवि शेषतनुं भवन्त**म्**

लोलैककुण्डल-विराजि-सहस्रशीर्ष**म्** ।

नीलाम्बरं धृत-हलं भुजगाङ्गनाभिर्

जुष्टं भजे हर गदान्गुरुगेहनाथ ॥ १२॥ श्री हरये नमः।

इति जम्बूद्वीपादिषु भगवदुपासनाप्रकार वर्णनं एकविंशतितम दशकं समाप्तम्

## द्वाविंशतितम-दशकम् 22

---

## अजामिल मोक्षः

**Tune – Evam chaturdasa**

अजामिळोनाम महीसुरः पु**रा**

चरन्-विभो धर्म पथान् गृहाश्र**मी** ।

गुरोर्-गिरा काननमेत्य दृष्टवान्

सुघृष्टशीलां कुलटां मदाकु**ला**म्॥ १॥

स्वतः प्रशान्तोऽपि तदाहृताश<u>यः</u>

स्वधर्म-मुत्सृज्य तया समारमन् ।

अधर्मका<u>री</u> दशमी भवन्पुनः

दधौ भवन्नामयुते सुते रतिम् ॥ २॥

स मृत्युकाले यमराजकिङ्क<u>रान्</u>

भयङ्करांस्-त्रीनभिलक्षयन्-भिया ।

पुरा मनाक्त्वत्-स्मृति-वासनाबलाज्

जुहाव नारायणनामकं सुतम् ॥ ३॥

दुराशयस्यापि तदात्वनिर्ग<u>त</u>

त्वदीयनामाक्षर-मात्रवैभवात् ।

पुरोऽभिपेतुर्-भवदीयपार्षदाः

चतुर्भुजाः पीतपटा मनोह<u>राः</u> ॥ ४॥

अमुं च संपाश्य विकर्षतो भ<u>टान्</u>

विमुञ्चतेत्यारु-रुधुर्-बलादमी ।

निवारितास्ते च भवज्जनैस्तदा

तदीयपापं निखिलं न्यवेदयन् ॥ ५॥

भवन्तु पापानि कथं तु निष्कृ<u>ते</u>

कृतेऽपि भो दण्डनमस्ति पण्डि<u>ताः</u> ।

न निष्कृतिः किम् विदिता भवादृशाम्

इति प्रभो त्वत्पुरुषा बभाषिरे ॥ ६॥

श्रुति-स्मृतिभ्यां विहिता व्रताद<u>यः</u>

पुनन्ति पापं न लुनन्ति वासनाम् ।

अनन्तसेवा तु निकृन्तति द्वयीम्

इति प्रभो त्वत्पुरुषा बभाषिरे ॥ ७॥

अनेन भो जन्म-सहस्रकोटि<u>भिः</u>

कृतेषु पापेष्वपि निष्कृतिः कृता ।

तदग्रहीन्नाम भयाकुलो हरेः

इति प्रभो त्वत्पुरुषा बभाषिरे ॥ ८॥

नृणाम-बुध्यापि मुकुन्दकीर्तन<u>म्</u>

दहत्यघौघान्-महिमास्य तादृ<u>शः</u> ।

यथाग्निरेधांसि यथौषधं गदान्

इति प्रभो त्वत्पुरुषा बभाषिरे ॥ ९॥

इतीरितैर्-याम्यभटैरपासृ<u>ते</u>

भवद्भटानां च गणे तिरोहिते ।

भवत्स्मृतिं-कञ्चन कालमाचरन्

भवत्पदं प्रापि भवद्भटैरसौ ॥ १०॥

स्वकिङ्करावेदन-शङ्कितो य<u>मः</u>

त्वदङ्घ्रि-भक्तेषु न गम्यतामिति ।

स्वकीय-भृ<u>त्या</u>नशि-शिक्षदुच्चकैः

स देव वातालयनाथ पाहिमाम् ॥ ११॥   श्री हरये नमः।

इति अजामिलोपाख्यानं द्वाविंशतितम दशकं समाप्तम्

## त्रयोविंशतितम-दशकं-23

## दक्ष चरितं, चित्रकेतु उपाख्यानं च

**Tune – Evam chaturdasa**

प्राचेत-तस्तु भगवन्नपरोऽपि द**क्षः**

त्वत्-सेवनं व्यधित सर्ग-विवृद्धिका**मः** ।

आविर्-बभूविथ तदा लसदष्टबाहुः

तस्मै वरं ददिथ तां च वधूमसिक्-**नी**म् ॥ १॥

तस्यात्मजास्-त्वयुतमीश पुनः सहस्र**म्**

श्रीनारदस्य वचसा तव मार्गमा**पुः** ।

नैकत्रवासमृषये स मुमोच शापम्

भक्तोत्तमस्त्वृषि-रनुग्रहमेव मेने ॥ २॥

षष्ट्या ततो दुहि-तृभिः सृजतः कुलौ**घान्**

दौहित्रसूनुरथ तस्य स विश्वरूपः ।

त्वत्-स्तोत्रवर्मित-मजापयदिन्द्रमाजौ

देव त्वदीयमहिमा खलु सर्वजै**त्रः** ॥ ३॥

प्राक्शूरसेन-विषये किल चित्रके**तुः**

पुत्राग्रही नृपति-रङ्गिरसः प्रभा**वात्** ।

लब्ध्वैकपुत्रमथ तत्र हते सपत्नी

संघैर्-मुह्यदवशस्तव, माययासौ ॥ ४॥

तं नारदस्तु सममङ्गिरसा दया**लुः**

सम्प्राप्य तावदुपदर्श्य सुतस्य जीवम् ।

कस्यास्मि पुत्र इति तस्य गिरा विमोहम्

त्यक्त्वा त्वदर्चनविधौ नृपतिं न्ययुङ्क्त ॥ ५॥

स्तोत्रं च मन्त्रमपि नारद-तोऽथ ल**ब्ध्वा**

तोषाय शेषवपुषो ननु ते तपस्यन् ।

विद्याधराधि-पतितां स हि सप्तरात्रे

लब्ध्वाप्य-कुण्ठ-मतिरन्व-भजद्-भवन्तम् ॥ ६ ॥

तस्मै मृणाळ-धवळेन सहस्रशी**र्ष्णा**

रूपेण बद्धनुति-सिद्धगणावृतेन ।

प्रादुर्-भवन्नचिरतो नुतिभिः प्रसन्नो

दत्वात्म-तत्वमनु-गृह्य तिरोदधाथ ॥ ७॥

त्वद्-भक्त-मौलिरथ सोऽपि च लक्षलक्ष**म्**

वर्षाणि हर्षुलमना भुवनेषु कामम् ।

सङ्गापयन्गुणगणं तव सुन्दरीभिः

सङ्गातिरेक-रहितो ललितं चचार ॥ ८॥

अत्यन्त-सङ्ग-विलयाय भवत्-प्रणु**न्नो**

नूनं स रौप्य-गिरिमाप्य महत्समाजे ।

निश्शङ्क-मङ्ककृत-वल्लभ-मङ्गजारिम्

तं शङ्करं परिहसन्-नुमयाभिशेपे ॥ ९॥

निस्सम्-भ्रमस्त्वय-मयाचित-शापमो**क्षो**

वृत्रासुरत्व मुपगम्य सुरेन्द्रयोधी ।

भक्त्यात्मतत्व-कथनैस्समरे विचित्रम्

शत्रोरपि भ्रममपास्य गतः पदं ते ॥ १०॥

त्वत्सेवनेन दितिरिन्द्र-वधोद्यताऽ**पि**

तान्प्रत्युतेन्द्र-सुहृदो मरुतोऽभिलेभे ।

दुष्टाशयेऽपि शुभदैव भवन्निषेवा

तत्तादृशस्-त्वमव मां पवनालयेश ॥ ११॥ श्री हरये नमः।

इति दक्षचरितं चित्रकेतुपाख्यानं वृत्रवधवर्णनं मरुतामुत्पत्ति कथनं च त्रयो द्वाविंशतितम

दशकं समाप्तम्

## चतुर्विंशतितम-दशकम् 24

---

## प्रह्लाद चरितम्

**Tune - Sandra**

हिरण्याक्षे पोत्रीप्रवरवपुषा देव भव**ता**

हते शोकक्रोध ,ग्लपित-घृति-रेतस्य सह**जः** ।

हिरण्य-प्रारम्भः, कशिपु-रमराराति-सद**सि**

प्रतिज्ञामा**ते**ने, तव किल वधा**र्थं** मधुरि**पो** ॥ १॥

विधातारं घोरं, स खलु तपसित्वा नचिरतः

पुरः साक्षात्कुर्वन् सुरनरमृगाद्यैर् अनिधनम् ।

वरं लब्ध्वा दृप्तो, जगदिह भवन्नायकमिदम्

परिक्षुन्दन्निन्द्राद् , अहरत दिवं त्वामगणयन् ॥ २ ॥

निहन्तुं त्वां भूयः, तव पदमवाप्तस्य च रिपोः

बहिर्-दृष्टेरन्तर्, दधिथ हृदये सूक्ष्मवपुषा ।

नदन्नुच्चैस्-तत्रापि, अखिल-भुवनान्ते च मृगयन्

भिया यातं मत्वा, स खलु जितकाशी निववृते॥ ३ ॥

ततोऽस्य प्रह्लादः, समजनि सुतो गर्भवसतौ

मुनेर्-वीणापाणेः, अधिगतभवद्भक्तिमहिमा ।

स वै जात्या दैत्यः, शिशुरपि समेत्य त्वयि रतिम्

गतस्त्वद्भक्तानां, वरद परमोदाहरणताम्॥ ४ ॥

सुरारीणां हास्यं, तव चरणदास्यं निजसुते

स दृष्ट्वा दुष्टात्मा, गुरुभिरशि-शिक्षच्चिरममुम् ।

गुरुप्रोक्तं चासौ, विदमिदम-भद्राय दृढमिति

अपाकुर्वन् सर्वं, तव चरण-भक्त्यैव ववृधे ॥ ५॥

अधीतेषु श्रेष्ठं, किमिति परिपृष्टेऽथ तनये

भवद्भक्तिंवर्याम्, अभिगदति पर्याकुलधृतिः ।

गुरुभ्यो रोषित्वा, सहजमति-रस्येत्यभिविदन्

वधोपायानस्मिन्, व्यतनुत भवत्, पादशरणे॥ ६॥

स शूलैराविद्धः, सुबहु मथितो दिग्गजगणैः

महासर्पैर्-दष्टोऽप्यनशन-गराहारविधुतः ।

गिरीन्द्रा-वक्षिप्तोऽप्यहह परमात्मन्नयि विभो

त्वयि न्यस्तात्मत्वात् , किमपि न निपीडामभजत ॥७ ॥

ततः शङ्काविष्टः, स पुनरति-दुष्टोऽस्य जनको

गुरूक्त्या तद् गेहे, किलवरुण-पाशैस्तमरुणत् ।

गुरोश्चासान्निध्ये स पुनरनु-गान्दैत्यतनयान्

भवद्भक्तेस्-तत्वम्, परममपि विज्ञानमशिषत्॥ ८ ॥

पिता श्रृण्वन्बाल प्रकरमखिलं, त्वत्-स्तुतिपरम्

रुषान्धः प्राहैनं, कुलहतक कस्ते बलमिति ।

बलं मे वैकुण्ठः, तव च जगतां चापि स बलम्

स एव त्रैलोक्यं, सकलमिति धीरोऽय-मगदीत्॥ ९ ॥

अरे क्वासौ क्वासौ, सकल-जगदात्मा हरिरिति

प्रभिन्ते स्म स्तम्भं, चलित-करवालो दितिसुतः ।

अतः पश्चाद्-विष्णो, न हि वदितुमीशोऽस्मि सहसा

कृपात्मन् विश्वात्मन्, पवनपुरवासिन् मृडय माम्॥

इति प्रह्लाद्-चरित वर्णनं चतुर्विंशतितम दशकं समाप्तम्

**Contd**

## नरसिम्ह अवतारः

Tune - Sandra

स्तम्भे घट्टयतो हिरण्य-कशिपोः, कर्णौ समाचूर्णयन्
आघूर्णज्जग-दण्डकुण्ड-कुहरो, घोरस्तवा-भूद्रवः
श्रुत्वा यं किल दैत्यराज-हृदये, पूर्वं कदाप्यश्रुतम्
कम्पः कश्चन सम्पपात चलितोऽप्यम्भोजभूर्-विष्टरात् ॥ १ ॥

दैत्ये दिक्षु विसृष्टचक्षुषि महासंरम्भिणी स्तम्भतः
सम्भूतं न मृगात्मकं न मनुजाकारं वपुस्ते विभो
किं किं भीषण-मेतदद्भुतमिति, व्युद्-भ्रान्त-चित्तेऽसुरे
विस्फूर्जद्धव-लोग्ररोम-विकसद्, वर्ष्मा समाजृम्भथाः ॥ २ ॥

तप्तस्वर्ण-सवर्णघूर्णद् , अतिरूक्षाक्षं सटा-केसर
प्रोत्कम्पप्रनि-कुम्बिताम्बरमहो, जीयात्तवेदं वपुः
व्यात्तव्याप्त-महादरीसखमुखं, खड्गोग्रवद्-गन्महा
जिह्वानिर्गम-दृश्यमान-सुमहा, दंष्ट्रा-युगोड्डामरम् ॥ ३ ॥

उत्सर्पद्-वलिभङ्ग-भीषणहनुं , ह्रस्वस्थ-वीयस्तरग्रीवं
पीवरदोश्शतोद्-गतनख, क्रूरांशु-दूरोद्-बणम्
व्योमोल्लम्घिघना-घनोपमघन,-प्रध्वान-निर्धावित
स्पर्धालुप्रकरं नमामि भवतः, तन्नारसिंहं वपुः ॥ ४ ॥

नूनं विष्णुरयं निहन्म्यमुमिति, भ्राम्यद्-गदाभीषण<u>म्</u>
दैत्येन्द्रं समुपाद्रवन्-तमधृथा, दोर्भ्यां पृथुभ्याममु<u>म्</u> ।
वीरो निर्गळितोऽथ खड्गफलके, गृह्ण<u>न्</u>-विचित्रश्र<u>मा</u>न्
व्यावृण्वन्-पुनरापपात भुवन, ग्रासोद्यतं त्वाम<u>हो</u> ॥ ५॥

भ्राक्यन्तं दितिजाधमं पुनरपि, प्रोद्-गृह्य दोर्भ्यां ज<u>वा</u>द्
द्वारेऽथोरुयुगे निपात्य नखरान् , व्युत्खाय वक्षो भु<u>वि</u>
निर्-भिन्दन्नधि-गर्भनिर्भरगळद्, र<u>क्ता</u>म्बु बद्धोत्सव<u>म्</u>
पायं पायमुदैरयो बहुजगत्, सम्हारि-सिंहार<u>वा</u>न् ॥ ६ ॥

त्यक्त्वा तं हतमाशु रक्तलहरी, सि<u>क्तो</u>न्नमद्-वर्ष्मणि
प्रत्युत्पत्य समस्त-दैत्यपटलीं, चाखाद्यमाने त्वयि
भ्राम्यद्भूमि विकम्-पिताम्बुधिकुलं, व्या<u>लो</u>ल-शैलोत्कर<u>म्</u>
प्रोत्सर्पत्खचरं चराचरमहो, दुःस्थामवस्थां द<u>धौ</u>॥ ७॥

तावन्मांस-वपाकराळवपुषं, घो<u>रा</u>न्-त्रमालाधर<u>म्</u>
त्वां मध्ये-सभमिद्धरोषमुषितं, दुर्वारगुर्वारव<u>म्</u> ।
अभ्येतुं न शशाक कोऽपि भुवने, दू<u>रे</u> स्थिता भीर<u>वः</u>
सर्वे शर्व-विरिञ्चवासव-मु<u>खाः</u>, प्रत्येक-मस्तोष<u>त</u> ॥ ८ ॥

भूयोऽप्यक्षत-रोषधाम्नि भवति, ब्र<u>ह्मा</u>ज्ञया बाल<u>के</u>
प्रह्लादे पदयोर्-नमत्यपभये, कारुण्य-भाराकु<u>लः</u>
शान्तस्त्वम् करमस्य मूर्ध्नि सम<u>धाः</u>, स्तोत्रैरथोद्-गाय<u>तः</u>
तस्या-कामधियोऽपि तेनिथ वरं, लोकाय चानुग्रह<u>म्</u> ॥ ९॥

एवं नाटित-रौद्रचेष्टित विभो, श्री<u>ता</u>पनीयाभि<u>ध</u>

श्रुत्यन्तस्फुट-गीतसर्वमहिमन्, अत्यन्त-शुद्धाकृ<u>ते</u>

तत्तादृङ्-निखिलोत्तरं पुनरहो, क<u>स्त्वां</u> परो लङ्घयेत्

प्रह्लादप्रिय हे मरुत्पुरपते, सर्वामयात्पाहि <u>मा</u>म्॥

भक्त प्रिय हे मरुत्पुरपते सर्वामयात्पाहि <u>मा</u>म्॥ – २ X श्री हरये नमः।

इति नरसिंहावतार वर्णनं पञ्चविंशतितम दशकं समाप्तम्

## षड्विंशतितम-दशकम् - 26

---

## गजेन्द्र मोक्षः

**<u>Tune – Evam chaturdasa</u>**

इन्द्रद्-युज्म्नः पाण्ड्य-खण्डाधि-रा<u>जः</u>

त्वद्-भक्तात्मा चन्दनाद्रौ कदाचि<u>त्</u> ।

त्वत्सेवा<u>यां</u> मग्न-धीरालुलोके

नैवागस्त्यम् प्राप्तमातिथ्य-कामम् ॥ १॥

कुम्भोद्-भूतिःसंभृत-क्रोधभा<u>रः</u>

स्तब्धात्मा त्वं हस्तिभूयं भजेति ।

शप्त्वाथै<u>नं</u> प्रत्यगात्सोऽपि लेभे

हस्तीन्द्रत्वं त्वत्स्मृति-व्यक्तिधन्यम् ॥ २ ॥

दुग्धाम्भोधेर्-मध्यभाजि त्रिकू<u>टे</u>

क्रीडञ्-छैले यूथपोऽयं वशा<u>भिः</u> ।

सर्वान्-जन्तूनत्य-वर्तिष्ट शक्त्या

त्वद्-भक्तानां कुत्र नोत्कर्ष-लाभः ॥ ३॥

स्वेन स्थेम्ना दिव्य-देशत्वशक्त्या

सोऽयं खेदान-प्रजानन् कदाचित् ।

शैलप्रान्ते घर्मतान्तः सरस्याम्

यूथैः सार्धं त्वत्-प्रणुन्नोऽभिरेमे ॥ ४॥

हूहूस्तावद् देवलस्यापि शापाद्

ग्राहीभूतस् तज्जले वर्तमानः ।

जग्राहैनं हस्तिनं पाददेशे

शान्त्यर्थं हि श्रान्तिदोऽसि स्वकानाम्॥ ५ ॥

त्वत्सेवाया वैभवाद्दुर्-निरोधम्

युध्यन्तं तं वत्सराणां सहस्रम् ।

प्राप्ते काले त्वत्-पदैकाग्र्यसिध्यै

नक्राक्रान्तं हस्ति-वर्यम् व्यधास्-त्वम् ॥ ६॥

आर्ति-व्यक्त प्राक्तन-ज्ञान-भक्तिः

शुण्डोत्-क्षिप्तैः पुण्डरीकैस्समर्चन् ।

पूर्वाभ्यस्तं निर्विशेषात्मनिष्ठम्

स्तोत्रश्रेष्ठं सोऽन्द-गादीत्-परात्मन् ॥ ७॥

श्रुत्वा स्तोत्रं निर्-गुणस्थं समस्तम्

ब्रह्मेशाद्यैर् नाहमित्यप्रयाते ।

सर्वात्मा त्वं, भूरि-कारुण्यवेगात्

ताक्ष्यारूढः प्रेक्षितोऽभूः पुरस्तात् ॥ ८॥

हस्तीन्द्रं तं हस्तपद्मेन धृ<u>त्वा</u>

चक्रेण त्वं नक्रवर्यं व्यदा<u>रीः</u> ।

गन्धर्-वेऽस्मिन् मुक्तशापे स हस्ती

त्वत्सारूप्यं प्राप्य देदीप्यते स्मा ॥ ९॥

एतद्-वृत्तं त्वां च मां च प्रगे<u>यो</u>

गायेत्सोऽयं, भूयसे श्रेयसे स्यात् ।

इत्युक्-त्वैनं तेन सार्धं गतस्त्वम्

धिष्ण्यं विष्णो पाहि वातालयेश ॥ १०॥ श्री हरये नमः।

इति गजेन्द्रमोक्ष वर्णनं षड्विंशतितम दशकं समाप्तम्

**सप्तविंशतितम-दशकम् – 27**

---

## क्षीराब्धि मथनं, कूर्मावतारः च

**<u>Tune - Kalyatham</u>**

दुर्वासास्-सुरवनिताप्त-दिव्यमाल्यम्

शक्राय स्वयमुपदाय तत्र भूयः ।

नागेन्द्र-प्रतिमृदिते शशाप शक्रम्

काक्षान्तिस्-त्वदितर-देवतांशजानाम् ॥ १॥

शापेन प्रथितजरेऽथ निर्-जरेन्द्रे

देवेष्वप्यसुरजितेषु निष्प्रभेषु ।

शर्वाद्याः कमलजमेत्य सर्वदेवा

निर्वाणप्रभव समं भवन्तमापुः ॥ २॥

ब्रह्माद्यैः स्तुतमहिमा चिरं तदानीम्

प्रादुष्यन्वरद पुरः परेण धाम्ना ।

हे देवा दितिजकुलैर्-विधाय संधिम्

पीयूषं परिमथतेति पर्यशास्त्वम् ॥ ३॥

सन्धानं कृतवति दानवैः सुरौघे

मन्थानं नयति मदेन मन्दराद्रिम् ।

भ्रष्टेऽस्मिन्-बदरमिवोद्-वहन्खगेन्द्रे

सद्यस्-त्वम् विनिहितवान् पयः पयोधौ ॥ ४॥

आधाय द्रुतमथ वासुकिं वरत्राम्

पाथोधौ विनिहितसर्वबीज-जाले ।

प्रारब्धे मथनविधौ सुरा-सुरैस्तैः

व्याजात्वम् भुजग-मुखेऽकरोः सुरारीन् ॥ ५ ॥

क्षुब्धाद्रौ क्षुभितजलोदरे तदानीम्

दुग्धाब्धौ गुरुतरभारतो निमग्ने ।

देवेषु व्यथित-तमेषु तत्प्रियैषीः

प्राणैषीः कमठतनुं कठोरपृष्ठाम् ॥ ६॥

वज्राति-स्थिरतर-कर्परेण विष्णो

विस्तारात्परिगत-लक्षयोजनेन ।

अम्भोधेः कुहरगतेन वर्ष्मणा त्वम्

निर्मग्नं क्षितिधरनाथ-मुन्निनेथ ॥ ७॥

उन्मग्ने झटिति तदा धराधरेन्द्रे

निर्-मेथुर्-दृढमिह सम्मदेन सर्वे ।

आविश्य द्वितयगणेऽपि सर्पराजे

वैवश्यं परिशमयन्नवी-वृधस्तान् ॥ ८॥

उद्दामभ्रमण-जवोन्नमद्-गिरीन्द्र

न्यस्तैक-स्थिरतर-हस्तपङ्कजं त्वाम् ।

अभ्रान्ते विधि-गिरिशादयः प्रमोदाद्

उद्-भ्रान्ता नुनुवुरुपात्त-पुष्पवर्षाः ॥ ९॥

दैत्यौघे भुजग-मुखानिलेन तप्ते

तेनैव त्रिदशकुलेऽपि किञ्चिदार्ते ।

कारुण्यात्तव किल देव वारिवाहाः

प्रावर्षन्नमर-गणान्न दैत्यसङ्घान् ॥ १०॥

उद्-भ्राम्यद्-बहुतिमि-नक्रचक्रवाले

तत्राब्धौ चिरमथितेऽपि निर्विकारे ।

एकस्त्वम् करयुग-कृष्टसर्पराजः

संराजन् पवनपुरेश पाहि रोगात् ॥ ११॥ श्री हरये नमः।

इति अमृतमथने कूर्मावतारवर्णनं सप्तविंशतितमदशकं समाप्तम्॥

## अष्टविंशतितम-दशकम्-28

## लक्ष्मी स्वयम्वरः, अमृत प्रादुर्भावः च

**Tune - Kalyatham**

गरलम् तरलानलं पुर**स्ता**ज्, जल-धेरुद्विजगाल कालकूटम्

अमर-स्तुतिवाद-मोदनि**घ्नो**, गिरि-शस्तन्निपपौ भवत्प्रियार्थम् ॥

विमथत्सु सुरासुरेषु जाता, सुरभिस्तामृषिषु न्यधास्त्रि-धामन्

हयरत्नम-भूदथेभरत्नं, द्युतरुश्चाप्सरसः सुरेषु तानि॥

जगदीश भवत्परा तदानीं, कमनीया कमला बभूव देवी ।

अमलामव-लोक्य यां विलोलः, सकलोऽपि स्पृहयाम्बभूव लोकः॥

## श्रीमहालक्ष्म्याष्टकम्

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।

शाङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तुते॥ १॥

नमस्ते गरुडारूढे कोलासुरभयङ्करि।

सर्वपापहरे देवि महालक्ष्मि नमोऽस्तुते॥ २॥

सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।

सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तुते॥ ३॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि।

मन्त्रमूर्थे सदा देवि महालक्ष्मि नमोऽस्तुते॥ ४॥

आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि।

योगजे योगसम्भूते महालक्ष्मि नमोऽस्तुते॥ ५॥

स्थूलसूक्ष्म-महारौद्रे महाशक्तिमहोदरे।

महापापहरे देवि महालक्ष्मि नमोऽस्तुते॥ ६॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि।

परमेशी जगन्मातर्महालक्ष्मि नमोऽस्तुते॥ ७॥

श्वेताम्बरधरे देवि नानालङ्कारभूषिते।

जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तुते॥ ८॥

महालक्ष्म्याष्टकं स्तोत्रं यः पठेत्भक्तिमान्नरः।

सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा॥ ९॥

एककाले पठेन्नित्यं महापापविनाशनम्।

द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः॥ १०॥

त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्।

महालक्ष्मिर्भवेन्नित्यं प्रसन्ना वरदा शुभा॥ ११॥

**Tune - Kalyatham**

त्वयि दत्तहृदे तदैव देव्यै, त्रिदशेन्द्रो मणिपीठिकां व्यतारीत्

सकलो-पहृताभिषेचनीयैः, ऋषयस्तां श्रुतिगीर्भि-रभ्यषिञ्चन् ॥

अभिषेकजलानु-पातिमुग्ध, त्वदपाङ्गैरव-भूषिताङ्गवल्लीम्

मणिकुण्डल-पीतचेलहार, प्रमुखैस्ताम-मरादयोऽन्दभूषन् ॥

वरणस्त्रजमात्त-भृङ्गनादां, दधती सा कुच-कुम्भमन्दयाना ।

पदशिञ्जित-मञ्जुनूपुरा त्वां, कलितव्रीड-विलास-माससाद ॥

गिरिश द्रुहिणादिसर्वदेवान् , गुणभाजोऽप्य-विमुक्त-दोषलेशान् ।

अवमृश्य सदैव सर्वरम्ये, निहिता त्वय्यनयापि दिव्यमाला ॥

उरसा तरसा ममानिथैनां, भुवनानां जननीमनन्य-भावाम्

त्वदुरो-विलसत्त-दीक्षणश्री, परिवृष्ट्या परिपुष्टमास विश्वम् ॥८॥

अतिमोहन-विभ्रमा तदानीं, मदयन्ती खलु वारुणी निरागात्

तमसः पदवी-मदास्त्वमेना, अतिसम्मान-नया महासुरेभ्यः॥ ९॥

तरुणाम्बुद-सुन्दरस्तदा त्वं, ननु धन्वन्तरि-रुत्थितोऽम्बुराशेः

अमृतं कलशे वहन्कराभ्याम्, अखिलार्तिं हर मारुतालयेश॥ श्री हरये नमः।

इति अमृतमथने कालकूटोत्पत्तिवर्णनं लक्ष्मीस्वयंवरवर्णनम् अमृतोत्पत्तिवर्णनं च अष्टविंशतितमदशकं समाप्तम्॥

## एकोनत्रिंशत्तम-दशकम्-29

---

## अमृत आहरणं, असुरनिग्रहः च

<u>**Tune – Evam chathurdasa**</u>

उद्-गच्छतस्तव करा-दमृतं हर<u>**त्सु**</u>

दैत्येषु तानशरणा-ननुनीय देवान् ।

सध्यस्तिरोदधिथ देव भवत्प्रभावाद्

उद्यत्-सयूथ्यकलहा दितिजा बभूवुः॥ १ ॥

श्यामां रुचापि वयसापि तनुं तदा<u>**नीम्**</u>

प्राप्तोऽसि तुङ्गकुचमण्डल-भङ्गुरां त्वम् ।

पीयूषकुम्भ-कलहं परिमुच्य सर्वे

तृष्णाकुलाः प्रतिययुस्-त्वदु-रोजकुम्भे ॥२॥

का त्वं मृगाक्षि विभजस्व सुधामिमामि**ति**

आरूढ-राग-विवशा-नभियाच-तोऽमून् ।

विश्वस्यते मयि कथं कुलटास्मि दैत्याः

इत्याल-पन्नपि सुविश्वसि-तान-तानीः ॥ ३॥

मोदात्सुधा-कलशमेषु ददत्सु सा त्व**म्**

दुश्चेष्टितं मम सहध्वमिति ब्रुवाणा ।

पङ्क्ति-प्रभेद-विनिवेशितदेव-दैत्या

लीलाविलास-गतिभिः समदाः सुधां ताम् ॥ ४ ॥

अस्मास्-वियं प्रणयिनीत्यसुरेषु ते**षु**

जोषं स्थितेष्वथ समाप्य सुधां सुरेषु ।

त्वं भक्तलोक-वशगो निजरूपमेत्य

स्वर्भानुमर्ध-परिपीतसुधं व्यलावीः ॥ ५ ॥

त्वत्तः सुधाहरण-योग्यफलं परे**षु**

दत्वा गते त्वयि सुरैः खलु तेव्यगृह्णन् ।

घोरेऽथ मूर्छति रणे बलिदैत्यमाया

व्यामोहिते सुरगणे त्वमिहा-विरासीः ॥ ६॥

त्वं कालनेमिमथ मालि-मुखाञ्ज-घ**न्थ**

शक्रो जघान बलिजम्भबलान् सपाकान् ।

शुष्कार्द्र-दुष्करवधे नमुचौ च लूने

फेनेन नारदगिरा न्यरुणो रणं तम् ॥ ७॥

योषावपुर्दनुज-मोहनमाहितं **<u>ते</u>**

श्रुत्वा विलोकन-कुतूहलवान्महेशः ।

भूतैस्समं गिरिजया च गतः पदं ते

स्तुत्वाब्रवीदभिमतं त्वमथो तिरोधाः ॥ ८ ॥

आरामसीमनि च कन्दुक-घातली**<u>ला</u>**

लोलायमान-नयनां कमनीं मनोज्ञाम् ।

त्वामेष वीक्ष्य विगलद्-वसनां मनोभू

वेगादनङ्ग-रिपुरङ्ग समालिलिङ्ग ॥ ९॥

भूयोऽपि विद्रुतवती-मुपधाव्य दे**<u>वो</u>**

वीर्यप्रमोक्ष-विकसत्-परमार्थबोधः ।

त्वन्-मानितस्तव महत्वमुवाच देव्यै

तत्तादृशस्-त्वमव वातनिकेतनाथ ॥ १० ॥

॥ **स्वामिये शरणम् अय्यप्पा** ॥ श्री हरये नमः।

इतिविष्णुमायाप्रादुर्भावादि-वर्णनं एकोनत्रिंशत्तमदशकं समाप्तम्॥

## त्रिंशत्तम-दशकम् 30

---

वामन अवतारः

**<u>Tune – Evam chaturdasa</u>**

शक्रेण संयति हतोऽपि बलिर्-महा**<u>त्मा</u>**

शुक्रेण जीवित-तनुः क्रतु-वर्धितोष्मा ।

विक्रान्तिमान् भय-निलीनसुरां त्रिलोकीम्

चक्रे वशे स तव चक्रमुखाद्-भीतः ॥ १॥

पुत्रार्तिदर्शनवशा अदितिर्-विष<u>**ण्णा**</u>

तं काश्यपं निजपतिं शरणं प्रपन्ना ।

त्वत्पूजनं तदुदितं हि पयोव्रताख्यम्

सा द्वादशाह-मचरत्त्वयि भक्तिपूर्णा ॥ २॥

तस्यावधौ त्वयि निलीन-मतेरमु<u>**ष्याः**</u>

श्यामश्चतुर्-भुजवपुः स्वयमाविरासीः ।

नम्रां च तामिह भवत्तनयो भवेयम्

गोप्यं मदीक्षणमिति प्रलपन्नयासीः ॥ ३॥

त्वं काश्यपे तपसि सन्निद-धत्तदा<u>**नीम्**</u>

प्राप्तोऽसि गर्भमदितेः प्रणुतो विधात्रा ।

प्रासूत च प्रकटवैष्णव-दिव्यरूपम्

सा द्वादशीश्रवण-पुण्यदिने भवन्तम् ॥ ४॥

पुण्याश्रमं तमभिवर्षति पुष्पव<u>**र्षैः**</u>

हर्षाकुले सुरगणे कृत-तूर्यघोषे ।

बध्वाञ्जलिं जय जयेति नुतः पितृभ्याम्

त्वं तत्क्षणे पटुतमं वटुरूपमाधाः ॥ ५॥

तावत्-प्रजापति-मुखैरुपनीय मौ<u>**ञ्जी**</u>

दण्डाजिनाक्ष-वलयादिभिरर्च्यमानः ।

देदीप्यमान-वपुरीश कृताग्निकार्यः

त्वम् प्रास्थिथा बलिगृहं प्रकृताश्वमेधम् ॥6॥

गात्रेण भाविमहिमोचित-गौरवं <u>प्राग्</u>

व्यावृण्वतेव धरणीं चलयन्नया<u>सीः</u> ।

छत्रं परोष्म-तिरणार्थमिवा-दधानो

दण्डं च दानव-जनेष्विव सन्निधातुम् ॥ ७॥

तां नर्मदोत्तरतटे हयमेध-शाला<u>म्</u>

आसेदुषि त्वयि रुचा तव रुद्धने<u>त्रैः</u> ।

भास्वान्किमेष दहनो नु सनत्कुमारो

योगी नु कोऽयमिति शुक्रमुखैः शशङ्के ॥ ८॥

आनीतमाशु भृगुभिर्-महसाभिभू<u>तैः</u>

त्वाम् रम्य-रूपमसुरः पुलकावृताङ्गः ।

भक्त्या समेत्य सुकृती परिपूज्य पादौ

तत्तोयमन्व-धृत मूर्धनि तीर्थतीर्थम् ॥ ९॥

प्रह्लादवंश-जतया क्रतुभिर्-द्विजे<u>षु</u>

विश्वासतो नु तदिदं दितिजोऽपि लेभे ।

यत्ते पदाम्बु गिरिशस्य शिरोभिलाल्यम्

स त्वं विभो गुरुपुरालय पालयेथाः ॥ १०॥ श्री हरये नमः।

इतिवामनावतारवर्णनं त्रिशत्तमदशकं समाप्तम्॥

**एकत्रिम्शत्तम-दशकम्-31**

## बलि दर्प उच्छेदः

Tune - sandra

प्रीत्या दैत्यस्तव तनुमहः, प्रेक्षणात्-सर्वथाऽपि

त्वामाराध्यन्-नजित रचयन्, अञ्जलिं सञ्जगाद ।

मत्तः किं ते, समभिलषितं, विप्रसूनो वद त्वम्

व्यक्तं भक्तं भवन-मवनीं, वापि सर्वं प्रदास्ये ॥ १॥

तामक्षीणां बलि-गिरमुपाकर्ण्य कारुण्य-पूर्णोऽपि

अस्योत्-सेकं, शमयितु-मना, दैत्य-वंशं प्रशंसन् ।

भूमिं पादत्रय-परिमितां, प्रार्थया-मासिथ त्वम्

सर्वं देहीति तु निगदिते, कस्य हास्यं न वा स्यात् ॥२॥

विश्वेशं मां त्रिपदमिह किं, याचसे बालि-शस्त्वम्

सर्वां भूमिं, वृणु किममुनेत्, यालपत्वाम् स दृप्यन् ।

यस्माद्-दर्पात्, त्रिपद-परिपूर्त्यंत् क्षमः क्षेपवादान्

बन्धं चासावगम्, अदत-दर्होऽपि गाढोप-शान्त्यै॥३॥

पादत्रय्या, यदि न मुदितो, विष्टपैर्-नापि तुष्येद्

इत्युक्तेऽस्मिन्-वरद भवते, दातुकामेऽथ तोयम् ।

दैत्याचार्यः तव खलु, परीक्षार्थिनः प्रेरणात्तम्

मा मा देयं, हरिरयमिति व्यक्त-मेवाबभाषे ॥ ४॥

याचत्येवं यदि स भगवान्, पूर्ण-कामोऽस्मि सोऽहम्

दास्याम्येव स्थिरमिति वदन् काव्य-शप्तोऽपि दैत्यः

विन्ध्यावल्या, निजदयितया, दत्तपाद्याय तुभ्यम्

चित्रं चित्रं सकलमपि सः प्रार्पयत्तोय-पूर्वम् ॥ ५॥

निस्सन्देहं, दितिकुलपतौ, त्वय्य-शेषार्पणं तद्

व्यातन्वाने, मुमुचु-ऋषयः सामराः पुष्पवर्षम् ।

दिव्यं रूपं, तव च तदिदं , पश्यतां विश्व-भाजाम्

उच्चैरुच्चै, रवृधदवधीकृत्य विश्वाण्ड-भाण्डम् ॥ ६ ॥

त्वत्पादाग्रं, निजपदगतं, पुण्डरीकोद्-भवोऽसौ

कुण्डीतोयै, रसिचदपुनाद् यज्जलं विश्व-लोकान् ।

हर्षोत्कर्षात्, सुबहु ननृते, खेचरैरुत्सवेऽस्मिन्

भेरीं निघ्नन्, भुवनमचरज् जाम्बवान् भक्तिशाली ॥ ७ ॥

तावद्-दैत्यास्, त्वनुमतिमृते, भर्तुरारब्धयुद्धा

देवोपेतैर्, भवदनुचरैः सङ्गता भङ्गमापन् ।

कालात्मायं, वसति पुरतो, यद्वशात्-प्राग्जिताः स्मः

किं वो युद्धै, रिति बलिगिरा तेऽथ पाताल-मापुः ॥ ८ ॥

पाशैर्-बद्धं, पतगपतिना, दैत्य-मुच्चैरवादीः

तार्त्तीयीकं, दिश मम पदं किं न विश्वेश्वरोऽसि ।

पादं मूर्ध्नि प्रणय भगवन्, नित्यक**म्यं** वदन्त**म्**

प्रह्लादस्तं, स्वय-मुपगतो मानय**न्**-नस्त**वी**त्-त्वा**म्** ॥

दर्पोच्छित्यै, विहितमखिलं, दैत्य सि**द्धो**ऽसि पु**ण्यैः**

लोकस्तेऽस्तु, त्रिदिव-विजयी वासवत्वं च प**श्चा**त्

मत्सायुज्यं भज च पुनरिति, अन्वगृ**ह्णा** बलिं त**म्**

विप्रैस्सन्ता नितमखवरः, पाहि वा**ता**ल**ये**श॥१०॥ श्री हरये नमः।

इति बलिविध्वंसनमेकत्रिंसत्तमदशकं समाप्तम्॥

## द्वात्रिम्शत्तमदशकम् -32

---

## मत्स्यावतारः

Tune – Evam chaturdasa

↓पुरा हयग्रीवमहासुरे**ण**, षष्ठान्तरा**न्तो**द्, यदकाण्ड-कल्पे ।

निद्रोन्मुख-ब्रह्ममुखात् हृतेषु, वेदेष्वधित्सःकिल मत्स्यरूपम् ॥

सत्यव्रतस्य, द्रमिलाधिभ**र्तुः**, नदीजले तर्पय-तस्त-दा**नी**म्

कराञ्जलौ सञ्चलिता-कृतिस्त्वम्, अदृश्यथाः कश्चन बालमी**नः** ॥२॥

क्षिप्तं जले त्वां, चकितं विलो**क्य**, निन्येऽम्बुपात्रेण, मुनिः स्वगेहम् ।

स्वल्पैरहोभिः कलशीं च कूपं, वापीं सरश्चानशिषे विभो त्वम् ॥

योग-प्रभा**वा**द्-भवदाज्ञयै**व**, नीतस्-ततस्त्वं मुनिना पयोधिम्

पृष्टोऽमुना कल्पदिदृक्षुमेनं, सप्ताह-मास्वेति, वदन्नया**सीः**॥ ४ ॥

प्राप्ते त्व-दुक्तेऽहनि वारिधा<u>रा</u>, परिप्लुते भूमितले मुनी<u>न्द्रः</u> ।

सप्तऋषिभिः सार्ध-मपारवारिण्, उद्धूर्णमानः शरणं ययौ त्वाम्॥५॥

धरां त्वदा-देशकरीमवा<u>प्तां</u>, नौरूपिणीमारु-रुहुस्तदा ते ।

तत्कम्पकम्-प्रेषु च तेषु भूयः, त्वमम्बुधेरावि, रभूर्म-ही<u>यान्</u> ॥

झषाकृतिं योजन-लक्षदी<u>र्घां,</u> दधानमुच्चैस्-तरतेजसं <u>त्वा</u>म्

निरीक्ष्य तुष्टा मुनयस्त्व-दु<u>क्त्या</u>, त्वत्तुङ्ग-श्रृङ्गे, तरणिं बब<u>न्धुः</u>॥७॥

आकृष्टनौको, मुनिमण्डला<u>य</u>, प्रदर्शयन्विश्व-जगद्-विभागान्

संस्तूयमानो नृवरेण तेन, ज्ञानं परं चोपदिशन्नचारीः ॥८॥

कल्पावधौ, सप्त मुनीन्पुरोव<u>त्</u> , प्रस्ताप्य सत्यव्रत-भूमिपं तम्

वैवस्वताख्यं, मनुमादधानः, क्रोधाद्धयग्रीव, मभिद्रुतोऽ<u>भूः</u>॥ ९ ॥

स्वतुङ्गषृङ्-गक्षत वक्षसं <u>तं</u>, निपात्य दैत्यं, निगमान्गृही<u>त्वा</u> ।

विरिञ्चये प्रीत हृदे ददानः, प्रभञ्जनागार, पते प्रपा<u>याः</u>॥१० श्री हरये नमः।

इति मत्सावतारवर्णनं द्वात्रिम्शत्तमदशकं समाप्तम्॥

**त्रयस्-त्रिंशत्तम-दशकम् -33**

---

## अम्बरीष चरितम्

**<u>Tune – Evam chaturdasa</u>**

वैवस्वताख्यमनु-पुत्रनभागजा<u>त</u>

नाभागनामक-नरेन्द्रसुतोऽम्बरी<u>षः</u> ।

सप्तार्णवावृत-महीदयितोऽपि रेमे

त्वत्सङ्गिषु त्वयि च मग्नमनास्सदैव॥ १ ॥

त्वत्प्रीतये-सकलमेव वितन्वतोऽ<u>स्य</u>

भक्त्यैव देव नचिरादभृथाः प्रसादम् ।

येनास्य याचनमृतेऽप्यभि-रक्षणार्थम्

चक्रं भवान्प्रवित-तार सहस्रधारम् ॥ २॥

स द्वादशीव्रतमथो भवदर्चनार्थ<u>**म्**</u>

वर्षं दधौ मधुवने यमुनोपक<u>**ण्ठे**</u> ।

पत्न्या समं सुमनसा महतीं वितन्वन्

पूजां द्विजेषु विसृजन्पशु-षष्टिकोटिम्॥ ३ ॥

`तत्राथ पारणदिने भवदर्चना<u>न्ते</u>

दुर्वास-साऽस्य मुनिना भवनं प्रपेदे ।

भोक्तुं वृतश्च स नृपेण परार्-तिशीलो

मन्दं जगाम यमुनां नियमान्-विधास्यन् ॥ ४ ॥

राज्ञाथ पारण-मुहूर्त-समाप्तिखे<u>दाद्</u>

वारैव पारणमकारि भवत्परेण ।

प्राप्तो मुनिस्त-दथ दिव्यदृशा विजानन्

क्षिप्यन् कृधोद्-धृतजटो विततान कृत्याम् ॥ ५॥

कृत्यां च तामसिधरां भुवनं दह<u>न्ती</u>म्

अग्रेऽभिवीक्ष्य नृपतिर्न पदाच्चकम्पे ।
त्वद्-भक्त-बाधमभिवीक्ष्य सुदर्शनं ते
कृत्यानलं शलभयन्मुनि-मन्वधावीत् ॥ ६ ॥

धावन्नशेष-भुवनेषु भिया स पश्यन्
विश्वत्र चक्रमपि ते गतवान्विरिञ्चिम् ।
कः कालचक्र-मतिलङ्घय-तीत्यपास्तः
शर्वं ययौ स च भवन्तम-वन्दतैव ॥ ७॥

भूयो भवन्निलयमेत्य मुनिं नमन्तम्
प्रोचे भवानहमृषे ननु भक्तदासः ।
ज्ञानं तपश्च विनयान्-वितमेव मान्यम्
याह्-यम्बरीषपदमेव भजेति भूमन् ॥ ८॥

तावत्समेत्य मुनिना स गृहीतपादो
राजापसृत्य भवदस्त्रमसावतौषीत् ।
चक्रे गते मुनिरदा-दखिलाशिषोऽस्मै
त्वद्-भक्तिमागसि कृतेऽपि कृपां च शंसन् ॥९॥

राजा प्रतीक्ष्य मुनिमेकसमा-मनाश्वान्
सम्भोज्य साधु तमृषिं विसृजन्-प्रसन्नम् ।
भुक्त्वा स्वयं त्वयि ततोऽपि दृढं रतोऽभूत्
सायुज्यमाप च स मां पवनेश पायाः ॥ १०॥ श्री हरये नमः।

इति अम्बरीषोपारव्यानं त्रयस्त्रिसत्तमदशकं समाप्तम्॥

## चतुस्-त्रिंशत्तम-दशकम्-34

श्रीमद्रामायणं, हनुमत् समागम पर्यन्तम्

राम राम राम राम राम राम राम - २x

Tune - सान्द्रा

गीर्वाणै-रर्थ्यमानो, दशमुखनिधनं, कोसलेऽष्-वृश्यषृङ्गे
पुत्रीयामिष्टि-मिष्ट्वा, ददुषि दशरथ, क्ष्माभृते पायसाग्र-यम्।
तद्-भुक्त्या तत्पुरन्ध्रीष्वपि, तिसृषु समं, जातगर्भासु जातो
रामस्त्वम् लक्ष्मणेन, स्वयमथ भरतेनापि, शत्रुघ्ननाम्ना ॥ १ ॥

कोदण्डी कौशिकस्य, क्रतुवरमवितुं, लक्ष्मणेनानुयातो
यातोऽभूस्तातवाचा, मुनिकथित, मनुद्वन्द्व,शान्ताध्वखेदः
नृणां त्राणाय बाणैर्, मुनिवचनबलात्, ताटकां पाटयित्वा
लब्-ध्वास्मा-दस्त्रजालं, मुनिवनमगमो, देव सिद्धाश्र-मारव्यम्॥

मारीचं द्रावयित्वा, मख-शिरसि शरैर्, अन्यरक्षांसि निघ्नन्
कल्यां कुर्-वन्नहल्यां, पथि पदरजसा, प्राप्य वैदेहगेहम् ।
भिन्दानश्चान्द्रचूडं, धनुरवनिसुतां, इन्दिरामेव लब्ध्वा
राज्यं प्रातिष्ठथास्त्वम्, त्रिभिरपि च समं, भ्रातृवीरैः सदारैः॥ ३॥

आरुन्धाने रुषान्धे, भृगु-कुलतिलके, संक्र-मय्य स्वतेजो
याते यातोऽस्य-योध्यां, सुखमिह निवसन्, कान्तया कान्तमूर्ते ।

शत्रुघ्नेनैकदाथो, गतवति भरते, मातुलस्याधिवासम्
तातारब्धोऽभिषेकः, तव किल विहतः, केकयाधीश-पुत्र्या ॥४ ॥

तातोक्त्या यातुकामो, वनमनुजवधू, संयुतश्चापधारः
पौरानारूध्य मार्गे, गुहनिलयगतः, त्वम् जटाचीर-धारी
नावा सन्तीर्य गङ्गाम्, अधिपदवि पुनस्तं, भरद्वाजमारान्
नत्वा तद्वाक्यहेतोर्, अति-सुखमवसः, चित्रकूटे गिरीन्द्रे ॥५॥

श्रुत्वा पुत्रार्तिखिन्नं, खलु भरतमुखात् , स्वर्गयातं स्वतातम्
तप्तो दत्त्वाम्बु तस्मै, निदधिथ भरते, पादुकां मेदिनीं च ।
अत्रिं नत्वाथ गत्वा, वनमतिविपुलम्, दण्डकं चण्डकायम्
हत्वा दैत्यं विराधं, सुगतिमकलयः,चारुभोः शारभङ्गीम् ॥६॥

नत्वाऽगस्त्यम्, समस्ताशरनिकर, सपत्राकृतिं तापसेभ्यः
प्रत्यश्रौषीः प्रियैषी, तदनु च मुनिना, वैष्णवे दिव्यचापे
ब्रह्मास्त्रे चापि दत्ते, पथि पितृसुहृदं, वीक्ष्य भूयो जटायुम्
मोदाद्-गोदातटान्ते, परिरमसि पुरा, पञ्चवट्यां वधूट्या ॥७ ॥

प्राप्तायाः शूर्पणख्या, मदनचलधृतेर, अर्थनैर्-निस्सहात्मा
तां सौमित्रौ विसृज्य, प्रबलतमरुषा, तेन निर्लून-नासाम्
दृष्ट्-वैनां रुष्टचित्तं, खरमभिपतितं, दूषणं च त्रिमूर्द्धम्
व्याहिंसीराशरानपि, अयुतसमधिकांस्, तत्क्षणादक्षतोष्मा ॥

सोदर्याप्रोक्तवार्ता, विवश-दशमुखादिष्ट मारीचमाया

सारङ्गं सार**सा**क्ष्या, स्पृहितमनुगतः, प्राव**धीर्** बाण**घा**तम्

तन्मायाक्रन्द निर्यापित, भव-दनुजां, रावण**स्ता**-म**हा**र्षीत्-

तेनार्-तोऽपि त्वमन्तः, किमपि मुदम**धाः**, तद्-ब**धो**पाय-**ला**भात्॥९॥

भूयस्तन्वीं विचिन्वन्, अहृत दशमुखः, त्वद्-वधूं मद्वधे**ने**ति

उक्त्वा याते ज**टा**यौ, दिवमथ सुहृदः, प्रात**नोः** प्रेत**का**र्य**म्** ।

गृह्णानं तं कबन्धं जघनिथ, शबरीं प्रेक्ष्य प**म्पा**त**टे** त्व**म्**

सम्प्राप्तो वात**सूनुं**, भृशमुदितम**नाः**, पाहि वाताल**ये**श॥१० श्री हरये नमः।

इति श्रीरामचरितवर्णनं चतुस्त्रिंशत्तमदशकं समाप्तम्॥

Cont

**पञ्चत्रिंशत्तम-दशकम्** 35

---

## श्रीमद्रामायणं, सुग्रीवसख्यात् प्रभृति

**Tune - Sandra**

नीतस्सुग्रीव-मै**त्रीं**, तदनु हनुमत, दुन्दु**भेः** कायमु**च्चैः**

क्षिप्-त्वाङ्गुष्ठेन **भू**यो, लुलुविथ युगपत्, पत्रि**णा** सप्त **साला**न् ।

हत्वा सुग्रीवघातोद्यतम्, अतुलबलं, वालि**नं** व्याजवृ**त्त्या**

वर्षावेलाम**नै**षीर्, विरहतरलितः, त्वम् मत**ङ्गा**श्र**मा**न्ते ॥१ ॥

सुग्रीवेणानुजोक्त्या, सभयमभियता, व्यूहि**तां** वाहि**नीं** **ता**म्

ऋक्षाणां वीक्ष्य दि**क्षु**, द्रुतमथ दयिता, मार्गणा**या**वन**म्रा**म्

सन्देशं चाङ्गुलीयं, पवनसुतकरे, प्रादि**शो** मोद**शाली**

मार्गे मार्गे म**मा**र्गे, कपिभिरपि तदा, त्वत्प्रि**या** सप्रया**सैः** ॥२॥

त्वद्-वार्ता, कर्णनोद्यद्, गरुदुरुजव, सम्पाति-सम्पातिवाक्य
प्रोत्तीर्णार्-णोधिरन्तर् नगरि, जनकजां, वीक्ष्य दत्त्वाङ्गुलीयम्
प्रक्षुद्योद्यानम् अक्षक्षपणचणरणः, सोढ-बन्धो दशास्यम्
दृष्ट्वा प्लुष्ट्वा च लङ्कां, झटिति स हनुमान्, मौलिरत्नं ददौ ते॥ ३॥

त्वं सुग्रीवाङ्गदादि, प्रबलकपिचमू , चक्रविक्रान्तभूमी
चक्रोऽभिक्रम्य पारे जलधि, निशिचरेन्द्रानुजा श्रीयमाणः ।
तत्प्रोक्तां शत्रुवार्तां, रहसि निशमयन्, प्रार्थना-पार्थ्यरोष
प्रास्ताग्नेयास्त्र-तेजः, त्रसदुदधिगिरा, लब्धवान्-मध्यमार्गम् ॥

कीशैराशान्त-रोपाहृत, गिरिनिकरैः, सेतुमाधाप्य यातो
यातून्यामर्द्य दंष्ट्रानखशिखरिशिला, साल-शस्त्रैः स्वसैन्यैः ।
व्याकुर्वन्सानुजस्त्वं, समरभुविपरं, विक्रमं शक्रजेत्रा
वेगान्नागास्त्र-बद्धः, पतगपतिगरुन्, मारुतैर्-मोचितोऽभूः॥५॥

सौमित्रिस्त्वत्र शक्ति, प्रहृति-गलदसुर्, वातजानीत-शैल
घ्राणात्प्राणानुपेतो, व्यकृणुत कुसृति, श्लाघिनं मेघनादम् ।
मायाक्षोभेषु, वैभीषणवचनहृत, स्तम्भनः कुम्भ-कर्णं
सम्प्राप्तं कम्पितोर्वी, तलमखिलचमू,भक्षिणं व्यक्षिणोस्त्वम् ॥

गृह्णन् जम्भारिसम्प्रेषित, रथकवचौ, रावणेनाभियुध्यन्
ब्रह्मास्त्रेणास्य भिन्दन्, गलततिमबलाम्, अग्निशुद्धां प्रगृह्णन्
देव श्रेणीवरोज्जीवित, समरमृतैर्, अक्षतै-ऋक्षसङ्घैः
लङ्काभर्त्रा च साकं, निजनगरमगाः, सप्रियः पुष्पकेण ॥ ७॥

प्रीतो दिव्याभिषेकैः, अयुत-समधिकान्, वत्सरान्-पर्यरंसीः

मैथिल्यां पापवाचा, शिव शिव किल तां, गर्भिणीमभ्यहासीः

शत्रुघ्नेनार्दयित्वा, लवणनिशिचरं, प्रार्दयः शूद्र-पाशम्

तावद्-वाल्मीकिगेहे, कृतवसतिरुपा सूत, सीता सुतौ ते ॥८॥

वाल्मीकेस्-त्वत्सुतोद्-गापित, मधुरकृतेर्, आज्ञया यज्ञवाटे

सीतां त्वय्याप्तुकामे, क्षितिम-विशदसौ, त्वं च कालार्थितोऽभूः

हेतोः सौमित्रिघाती, स्वयमथ सरयू , मग्न-निश्शेषभृत्यैः

साकं नाकं प्रयातो, निजपदमगमो, देव वैकुण्ठमाद्यम् ॥९॥

सोऽयं मर्त्यावतारः, तव खलु नियतं, मर्त्य-शिक्षार्थमेवम्

विश्लेषार्तिर्-निरागस्त्य,जनमपि भवेत्, कामधर्मातिसक्त्या ।

नो चेत्-स्वात्मानुभूतेः, क्वनु तव मनसो, विक्रिया चक्रपाणे

स त्वं सत्त्वैकमूर्ते, पवनपुरपते, व्याधुनु व्याधितापान् ॥ १०॥ श्री हरये नमः।

**जानकी कान्तस्मरणम् जय जय राम राम ॥**

इति रामचरितवर्णनं पञ्चत्रिंसत्तमदशकं समाप्तम्॥

**षड्त्रिंशत्तम-दशकम् 36**

---

## परशुराम चरितम्

**Tune - Sandra**

अत्रेः↑ पुत्रतया पुरा त्वम्, अनसूयायां हि दत्ताभिधो

जातः शिष्यनिबन्ध-तन्द्रितमनाः, स्वस्थश्चरन्कान्तया

दृष्टो भक्ततमेन हैहय, मही पा<u>ले</u>न तस्मै व<u>रा</u>न्

अष्टैश्वर्यमुखान्-प्रदाय ददिथ, स्वेनैव चान्ते वध<u>म्</u> ॥१॥

सत्यं कर्तुमथार्जुनस्य च वरं, तच्छक्तिमात्रानत<u>म्</u>

ब्रह्मद्वेषि तदाखिलं नृपकुलं, हन्तुं च भूमेर्भर<u>म्</u>।

सञ्जातो जमदग्नितो भृगुकुले, त्वं <u>रे</u>णुकायां हरे

रामो नाम तदात्मजेष्ववरजः, पित्रोरधाः सम्मद<u>म्</u>॥२॥

लब्धाम्नायगणश्चतुर्-दशवयाः, ग<u>न्ध</u>र्वराजे मना<u>ग्</u>

आसक्तां किल मातरं प्रति पि<u>तुः</u>, क्रोधाकुलस्याज्ञ<u>या</u> ।

ताताज्ञातिग-सोदरैः सममिमां, छि<u>त्त्वा</u>थ शान्तात्पि<u>तुः</u>

तेषां जीवन-योगमापिथ वरं, माता च तेऽदाद्-व<u>रान्</u> ॥ ३॥

पित्रा मातृमुदे स्तवाहृतविय, द्धे<u>नो</u>र्-निजादाश्र<u>मा</u>त्

प्रस्थायाथ भृगोर्गिरा हिमगिरौ, आराध्य गौरीपति<u>म्</u> ।

लब्ध्वा तत्परशुं तदुक्तदनुजच्, छे<u>दी</u> महास्त्रादिक<u>म्</u>

प्राप्तो मित्र-मथाकृतव्रणमुनिं, प्राप्यागमः स्वाश्रम<u>म्</u> ॥ ४॥

आखेटोपगतोऽर्जुनः सुरगवी, सम्प्राप्तसम्पद्-ग<u>णैः</u>

त्वत्पित्रा परिपूजितः पुरगतो, दुर्मन्त्रिवाचा पु<u>नः</u> ।

गां क्रेतुं सचिवं न्ययुङ्क कुधिया, ते<u>ना</u>पि रुन्धन्मुनि

प्राणक्षेपसरोष-गोहतचमू,चक्रेण वत्सो <u>हतः</u> ॥५ ॥

शुक्रोज्जीवित-तातवाक्यचलित, क्रो<u>धोऽ</u>थ सख्या सम<u>म्</u>

बिभ्रद्-ध्यातमहोदरोपनिहितं, चापं कुठारं शरान्
आरूढः सहवाहयन्तृकरथं, माहिष्मती माविशन्
वाग्भिर्वत्समदाशुषि क्षितिपतौ, सम्प्रास्तुथाः सङ्गरम् ॥ ६ ॥

पुत्राणामयुतेन-सप्तदशभिः,चाक्षौहिणीभिर्महा
सेनानीभिरनेक-मित्रनिवहैर्, व्याजृम्भितायोधनः ।
सद्यस्-त्वत्क-कुठारबाणविदलन्, निश्शेषसैन्योत्करो
भीतिप्रद्रुत-नष्टशिष्टतनयः, त्वामापतद्धैहयः ॥७॥

लीलावारित-नर्मदाजलवलल्, लङ्केशगर्वापह
श्रीमद्-बाहुसहस्रमुक्त बहुशास्त्रास्त्रं निरुन्धन्नमुम् ।
चक्रे त्वय्यथ वैष्णवेऽपि विफले, बुध्वा हरिं त्वां मुदा
ध्यायन्तं छितसर्वदोषमवधीः, सोऽगात्परं ते पदम् ॥ ८॥

भूयोऽमर्षित, हैहयात्मजगणैः, ताते हते रेणुकाम्
आघ्नानां हृदयं निरीक्ष्य बहुशो, घोरां प्रतिज्ञां वहन्।
ध्यानानीत-रथायुधस्-त्वमकृथा, विप्रद्रुहः क्षत्रियान्
दिक्-चक्रेषु कुठारयन्-विशिखयन्, निःक्षात्रियां मेदिनीम्॥९॥

तातोज्जीवन-कृन्नृपालककुलं, त्रिःसप्तकृत्वो जयन्
सम्तप्यार्थ समन्त-पञ्चकमहा, रक्त-हृदौघे पितॄन्
यज्ञे क्ष्मामपि काश्यपादिषु दिशन्, साल्वेन युध्यन् पुनः
कृष्णोऽमुं निहनिष्यतीति शमितो, युद्धात् कुमारैर्-भवान् ॥

न्यस्यास्त्राणि महेन्द्रभूभृति तपः, तन्वन्-पुनर्मज्जिताम्

गोकर्णावधि सागरेण धरणीं, दृष्ट्वार्थितस्तापसैः ।

ध्यातेष्वास-घृतानलास्त्रचकितं, सिन्धुं स्रुवक्षेपणाद्

उत्सार्योद्-धृतकेरळो भृगुपते, वातेश संरक्ष माम् ॥ ११॥ श्री हरये नमः।

इति परशुरामावतारवर्णनं षड्त्रिंशत्तमदशकं समाप्तम्॥

## सप्त-त्रिम्शत्तम-दशकम् -37

---

## श्रीकृष्णावतार प्रस्तावः

**Tune - Sandra**

सान्द्रानन्द-तनो हरे ननु पुरा, दैवासुरे सङ्गरे

त्वत्कृत्ता अपि कर्मशेषवशतो, ये ते न याता गतिम् ।

तेषां भूतलजन्मनां दितिभुवां, भारेण दूरार्दिता

भूमिः प्राप विरिञ्चमाश्रितपदं, देवैः पुरैवागतैः ॥ १ ॥

हा हा दुर्जन-भूरिभारमथितां, पाथोनिधौ पातुकाम्

एतां पालय हन्त मे विवशतां, संपृच्छ देवानिमान्

इत्यादिप्रचुर-प्रलापविवशां, आलोक्य धाता महीम्

देवानां वदनानि वीक्ष्य परितो, दध्यौ भवन्तं हरे॥ २ ॥

ऊचे चाम्बुजभूरमूनयि सुराः, सत्यं धरित्र्या वचोः

नन्वस्या भवतां च रक्षणविधौ, दक्षो हि लक्ष्मीपतिः

सर्वे शर्व-पुरस्सरा वयमितो, गत्वा पयो-वारिधिम्

नत्वा तं स्तुमहे जवादिति य**युः**, साकं तवाकेतन**म्** ॥ ३॥

ते मुग्धानिलशालि-दुग्धजल**धेः**, तीरं गताः सङ्ग**ताः**
यावत्-त्वत्पद-चिन्तनैकमनसः, तावत्स पाथोज**भूः** ।
त्वद्-वाचं हृदये निशम्य सकलान्, आनन्दयन्नूचि**वान्**
आख्यातः परमात्मना स्वयमहं, वाक्यं तदाकर्ण्य**ताम्** ॥४ ॥

जाने दीनदशामहं दिविषदां, भू**मे**श्च भीमैर्नृ**पैः**
तत्क्षेपाय भवामि यादवकुले, सोऽहं समग्रात्म**ना** ।
देवा वृष्णिकुले भवन्तु कलया, देवाङ्गनाश्चाव**नौ**
मत्सेवार्थमिति त्वदीयवचनं, पाथोजभूरूचि**वान्** ॥ ५ ॥

श्रुत्वा कर्णरसायनं तव वचः, स**र्वे**षु निर्वापि**त**
स्वान्तेष्वीश गतेषु तावककृपा, पीयूषतृप्तात्म**सु**
विख्याते मथुरापुरे किल भवत्, सान्निध्य-पुण्योत्त**रे**
धन्यां देवकनन्दनीम् उदवह, द्राजा स शूरात्म**जः** ॥ ६ ॥

उद्वाहावसितौ तदीयसहजः, कं**सोऽ**थ सम्मानय**न्**
एतौ सूततया गतः पथि रथे, व्योमोत्थया त्वद्-गि**रा** ।
अस्यास्-त्वामति-दुष्टमष्टमसुतो, हन्तेति हन्तेरि**तः**
सन्त्रासात्स तु हन्तुमन्तिकगतां, तन्वीं कृपाणीम**धात्**॥७॥

गृह्णानश्चिकुरेषु तां खलम**तिः**, शौ**रे**श्चिरं सान्त्व**नैः**
नो मुञ्चन्पुनरात्म-जार्पणगिरा, प्रीतोऽथ यातो गृ**हान्** ।

आद्यं त्वत्सहजं तथार्-पितमपि, स्नेहेन नाहन्नसौ

दुष्टानामपि देव पुष्टकरुणा, दृष्टा हि धीरेकदा ॥ ८ ॥

तावत्-वन्मनसैव नारदमुनिः, प्रोचे स भोजेश्वरम्

यूयं नन्मसुराः सुराश्च यदवो, जानासि किं न प्रभो ।

मायावी स हरिर्-भवध्वधकृते, भावी सुरप्रार्थनाद्

इत्याकर्ण्य यदूनदू-धुनदसौ, शौरेश्च सूनूनहन् ॥ ९॥

प्राप्ते सप्तम-गर्भतामहिपतौ, त्वत्-प्रेरणान्मायया

नीते माधव रोहिणीं त्वमपि भोः, सच्चित्सुखैकात्मकः ।

देवक्या जठरं विवेशिथ विभो, संस्तूयमानस्सुरैः

स त्वं कृष्ण विधूय रोगपटलीं,भक्तिं परां देहि मे ॥ श्री हरये नमः।

इति श्रीकृष्णावतारप्रसङ्गवर्णनं सप्तत्रिंशत्तमदशकं समाप्तम्॥

## अष्टत्रिंशत्तम-दशकम् -38

---

## श्रीकृष्णावतारः

**Tune – Evam chaturdasa**

आनन्द-रूप भगवन्नयि तेऽवतारे

प्राप्ते प्रदीप्त-भवदङ्ग निरीयमाणैः ।

कान्ति-व्रजैरिव घनाघन-मण्डलैर्द्याम्

आवृण्वती विरुरुचे किल वर्षवेला ॥ १॥

आशासु शीतलतरासु पयोदतोयैः

आशासिताप्ति-विवशेषु च सज्जनेषु ।

नैशाकरोदयविधौ निशि मध्यमायाम्

क्लेशापहस्त्रिजगतां त्वमिहाऽविरा<u>सीः</u> ॥ २ ॥ **नारायण** 4X

बाल्यस्पृशापि वपुषा दधुषा विभू<u>तीः</u>

उद्यत्किरीट-कटकाङ्गद-हारभासा ।

शङ्खारिवारिज-गदापरिभासितेन

मेघासितेन परिलेसिथ सूतिगेहे ॥ ३॥

वक्षःस्थली-सुखनिलेन-विलासिल<u>क्ष्मी</u>

मन्दाक्षलक्षित-कटाक्ष-विमोक्षभे<u>दैः</u> ।

तन्मन्दिरस्य खलकं-सकृतामलक्ष्मीम्

उन्मार्-जयन्निव विरेजिथ वासुदेव ॥ ४॥

शौरिस्तु धीरमुनिमण्डल-चेतसोऽ<u>पि</u>

दूरस्थितं वपुरुदीक्ष्य निजेक्षणाभ्याम् ।

आनन्दबाष्प-पुलकोद्गम-गद्गदार्द्रः

तुष्टावदृष्टि मकरन्दरसं भवन्तम् ॥ ५॥

देव प्रसीद परपूरुष तापव<u>ल्ली</u>

निर्लूनदात्र समनेत्र कलाविलासि<u>न्</u> ।

खेदानपाकुरु कृपागुरुभिः कटाक्षैः

इत्यादि तेन मुदितेन चिरं नुतोऽ<u>भूः</u> ॥ ६॥

मात्रा च नेत्रसलिलास्तृत-गात्रवल्या

स्तोत्रै-रभिष्टुतगुणः करुणालयस्त्वम् ।

प्राचीनजन्म-युगळं, प्रतिबोध्य ताभ्याम्

मातुर्गिरा दधिथ मानुष-बालवेषम् ॥ ७॥

त्वत्प्रेरितः तदनु नन्द-तनूजया ते

व्यत्यासमारचयितुं स हि शूरसूनुः ।

त्वां हस्तयोर-अधित चित्ताविधार्यमार्यैः

अम्भोरुहस्थ-कलहंस-किशोररम्यम् ॥ ८ ॥

जाता तदा पशुपसद्मनि योगनिद्रा

निद्राविमुद्रित-मथाकृत पौरलोकम् ।

त्वत्प्रेरणात्-किमिव चित्रमचेतनैर्-यद्

द्वारैः स्वयं व्यघटि सङ्घटितैस्-सुगाढम् ॥ ९ ॥

शेषेण भूरिफणवारित-वारिणाऽथ

स्वैरं प्रदर्शितपथो मणि-दीपितेन ।

त्वां धारयन् स खलु धन्यतमः प्रतस्थे

सोऽयं त्वमीश मम नाशय रोग-वेगान् ॥ १० श्री हरये नमः।

इति श्रीकृष्णावतार वर्णनं अष्टत्रिंशत्तमदशकंसमाप्तम्॥

## योगमाया प्रादुर्भावः, कृष्ण जन्म उत्सवः च

**Tune - Bavantamaya**

भवन्तमय-मुद्-वहन्, यदुकुलोद्-वहो निस्सरन्

ददर्श गगनोच्चलज्, जल भरां कलिन्दात्मजाम् ।

अहो सलिल-सञ्चयः, स पुनरैन्द्र-जालोदितो

जलौघ इव तत्क्षणात्, प्रपद-मेयतामाययौ ॥ १ ॥

प्रसुप्तपशु-पालिकां, निभृतमारुदद्-बालिकाम्

अपावृतकवाटिकां, पशुपवाटिकामाविशन् ।

भवन्तमयमर्-पयन्, प्रसवतल्पके तत्पदाद्

वहन् कपटकन्यकां, स्वपुरमागतो वेगतः ॥ २॥

ततस्त्व-दनुजारव, क्षपित-निद्रवेगद्रवद्

भटोत्कर-निवेदित, प्रसववार्तयै-वार्तिमान् ।

विमुक्त-चिकुरोत्कर, त्वरितमापतन् भोजराड्

अतुष्ट इव दृष्टवान्, भगिनिकाकरे कन्यकाम् ॥ ३ ॥

ध्रुवं कपटशालिनो, मधुहरस्य माया भवेद्

असाविति किशोरिकां, भगिनिका-करालिङ्गिताम्

द्विपो नळिनिकान्तराद्, इव मृणालिकामाक्षिपन्

अयं त्वदनुजामजाम्, उपलपट्टके पिष्टवान् ॥ ४॥

ततो भव-दुपासको, झटिति मृत्युपाशादिव

प्रमुच्य तरसैव सा, समधिरूढ-रूपान्तरा ।

अधस्तलम-जग्मुषी, विकसदष्ट-बाहुस्फुरन्

महायुधमहो गता, किल विहायसा दिद्युते ॥ ५ ॥

### श्रीमहिषासुरमर्दिनि स्तोत्रम्

अयि गिरि नन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दनुते

गिरिवर विन्ध्य शिरोऽधिनि-वासिनि विष्णु विलासिनि जिष्णुनुते

भगवति हे शितिकण्ठ कुटुंबिनि भूरि कुटुंबिनि भूरिकृते

जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१॥

सर्वमङ्गळ माङ्गल्ये शिवे सर्वाथ साधके

शरण्येत्र्यंबके गौरि नारायणि नमोस्तु ते ॥

या देवी सर्वभूतेषु **मातृ** रूपेण संस्थिता।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

**Tune - Bavantamaya**

नृशंसतर कंस ते, किमु मया विनिष्पिष्टया

बभूव भवदन्तकः, क्वचन चिन्त्यतां ते हितम् ।

इति त्वदनुजा विभो, खलमुदीर्य तं जग्मुषी

मरुद्-गणपणायिता, भुवि च मन्दिराण्येयुषी ॥ ६॥

प्रगे पुनरगात्मजा, वचनमीरिता भूभुजा

प्रलम्बबक-पूतना, प्रमुखदानवा मानिनः ।

भवन्निधन-काम्यया, जगति बभ्रमुर्-निर्-भयाः

कुमारकविमारकाः, किमिव दुष्करं निष्कृपैः ॥ ७॥

ततः पशुपमन्दिरे, त्वयि मुकुन्द नन्द-प्रिया

प्रसूतिशयनेशये, रुदति किञ्चि-दञ्चत्पदे ।

विबुध्य वनिताजनैः, तनयसंभवे घोषिते

मुदा किमु वदाम्यहो, सकलमाकुलं गोकुलम्॥ ८॥

अहो खलु यशोदया, नवक लायचेतोहरम्

भवन्तमलमन्तिके, प्रथम-मापिबन्त्या दृशा ।

पुनः स्तनभरं निजं, सपदि पाययन्त्या मुदा

मनोहर-तनुस्पृशा, जगति पुण्यवन्तो जिताः ॥ ९॥

भवत्कुशल-काम्यया, स खलु नन्द-गोपस्तदा

प्रमोदभर-सङ्कुलो, द्विजकुलाय किं नाददात् ।

तथैव पशु-पालकाः, किमु न मङ्गळं तेनिरे

जगत्त्रितय-मङ्गळ, त्वमिह पाहि मामामयात् ॥ १० ॥

श्री पोन्नु गुरुवायुरप्पने शरणम्

श्रीचोट्टानिक्कर भगवति अम्मये शरणम्

आनन्द चिन्मयने शरणम्

नारायणा अखिल गुरो भगवन् नमस्ते॥ श्री हरये नमः।

इति योगमायानयनादिवर्णनं एकोनचत्वारिंशत्तम दशकं समाप्तम्॥

## पूतना मोक्षः

**Tune - Dance**

तदनु नन्दम-मन्द-शुभास्पदं, नृपपुरीं करदानकृते गतम्

समवलोक्य जगादभवत्-पिता, विदित-कंस-सहायजनोद्यमः॥

अयि सखे तव बालकजन्म मां, सुखयतेऽद्य निजात्मज-जन्मवत्

इति भवत्-पितृतां व्रजनायके, समधिरोप्य शशंस तमादरात् ॥

इह च सन्त्य-निमित्तशतानि ते, कटकसीम्नि ततो लघु गम्यताम् ।

इति च तद्-वचसा व्रजनायको, भवदपाय-भिया द्रुतमाययौ॥

अवसरे खलु तत्र च काचन, व्रजपदे मधुराकृति-रङ्गना ।

तरलषट्-पद-लालितकुन्तला, कपटपोतक ते निकटं गता ॥

सपदि सा हृत-बालकचेतना, निशिचरान्वयजा किल पूतना

व्रजवधूष्विह केयमिति क्षणं, विमृशतीषु भवन्त-मुपाददे ॥५॥

ललित-भावविलासहृतात्मभिः, युवतिभिः प्रतिरोद्धुम-पारिता ।

स्तनमसौ भवनान्त-निषेदुषी, प्रददुषी भवते कपटात्मने ॥ ६॥

समधिरुह्य तदङ्कम-शङ्कितः, त्वमथ बालक-लोपनरोषितः ।

महदिवाम्रफलं कुचमण्डलं, प्रतिचु-चूषिथ दुर्विषदूषितम्॥ ७॥

असुभिरेव समं धयति त्वयि, स्तनमसौ स्तनितोपम-निस्वना

निरपतद्-भयदायि निजं वपुः, प्रतिगता प्रविसार्य भुजावुभौ॥ ८॥

भयदघोषण-भीषणविग्रह, श्रवण-दर्शनमोहित-वल्लवे ।

व्रजपदे तदुरः स्थलखेलनं, ननु भवन्तम-गृह्णत गोपिकाः ॥९॥

भुवनमङ्गल-नामभिरेव ते, युवतिभिर्-बहुधा कृतरक्षणः ।

त्वमयि वातनिकेतन-नाथ माम्, अगदयन् कुरु तावकसेवकम्॥ श्री हरये नमः।

इति पूतनामोक्षं चत्वारिंशत्तमदशकं समाप्तम्॥

**cont**

## एकचत्वारिंशत्तम-दशकम्-41

---

## पूतना देह दाहः, कृष्ण लालन आह्लादः च

**Tune Evam chaturdasa**

व्रजेश्वरः शौरिवचो निशम्य, समा-व्रजन्नध्वनि भीतचेताः ।

निष्पिष्ट-निश्शेषतरुं निरीक्ष्य, कञ्चित्पदार्थं, शरणं गतस्त्वाम् ॥

निशम्य गोपी-वचनादुदन्तं, सर्वेऽपि गोपा भयविस्मयान्धाः

त्वत्पातितं घोरपिशाचदेहं, देहुर्-विदूरेऽथ कुठारकृत्तम् ॥ २॥

त्वत्पीतपूतस्तन-तच्छरीरात्, समुच्चलन्नुच्चतरो हि धूमः ।

शङ्कामधादा-गरवः किमेष, किं चान्दनो गौल्-गुलवोऽथवेति ॥

मदङ्गसङ्गस्य फलं न दूरे, क्षणेन तावद्-भवतामपि स्यात्

इत्युल्लपन्वल्लव-तल्लजेभ्यः, त्वम् पूतनामातनुथास्सुगन्धिम्॥

चित्रं पिशाच्या न हतः कुमारः, चित्रं पुरैवाकथि शौरिणेदम्

इति प्रशंसन्किल गोपलोको, भवन्मुखालोकरसे न्यमाङ्क्षीत्॥

दिने दिनेऽथ प्रतिवृद्ध-ल**क्ष्मीः**,अक्षीणमाङ्गल्यशतो व्रजोऽयम्

भवन्निवासादयि वासुदेव, प्रमोदसान्द्रः परितो विरेजे ॥ ६॥

गृहेषु ते कोमलरूपहा**स**, मिथः कथासङ्-कुलिताः कमन्यः

वृत्तेषु कृत्येषु भवन्निरीक्षा, समागताः प्रत्यहमत्य-नन्दन् ॥७॥

अहो कुमारो मयि दत्त-द**ृष्टिः**, स्मितं कृतं मां प्रति वत्सकेन ।

एह्-येहि मामित्युपसार्य पाणिं, त्वयीश किं किं न कृतंवधूभिः॥

भवद्-वपुः स्पर्शनकौतुके**न**, करात्करं गोपवधूजनेन

नीतस्त्वमा-ताम्रसरोजमाला, व्यालम्-बिलोलम्ब-तुलामलासीः ॥

निपाययन्ती स्तनमङ्कगं **त्वां**, विलोकयन्ती वदनं हसन्ती ।

दशां यशोदा कतमान्न भेजे, स तादृशः पाहि हरे गदान्माम्॥ श्री हरये नमः।

इति पूतनाशरीर-दाहवर्णनं गोपीनां बाललालन-कौतुकवर्णनं च एकचत्वारिंशत्तम दशकं समाप्तम्

## द्विचत्वारिंशत्तम-दशकम् -42

---

## शकटासुर निग्रहः

**Tune – Evam Chaturdasa**

कदापि जन्मर्क्षदिने तव प्र**भो**, निमन्त्रितज्ञाति-वधूमहीसुरा ।

महानसस्त्वाम् सविधे निधाय सा, महानसादौ ववृते व्रजेश्वरी ॥

ततो भवत्त्राणनियुक्तबाल**क**, प्रभीतिसङ्-क्रन्दन-सङ्कुलार**वैः**

विमिश्रमश्रावि भवत्समीपतः, परिस्फुटद्-दारुचटच्चटारवः ॥

ततस्तदाकर्णन-संभ्रमश्रम्, प्रकम्-पिवक्षोजभरा व्रजाङ्गनाः ।
भवन्तमन्तर्-ददृशुः समन्ततो, विनिष्पतद्दारुण-दारुमध्यगम्॥

शिशोरहो किं किमभूदिति द्रुतं, प्रधाव्य नन्दः पशुपाश्च भूसुराः ।
भवन्तमालोक्य यशोदया धृतं, समाश्वसन्नश्रु-जलार्द्रलोचनाः ॥

कस्को नु कौतस्-कुत एष विस्मयो
विशङ्कटं यच्छ-कटं विपाटितम् ।
न कारणं किञ्चिदिहेति ते स्थिताः
स्वनासिका-दत्तकरास्त्व-दीक्षकाः ॥ ५॥

कुमारकस्यास्य पयोधरार्थिनः, प्ररोदने लोलपदाम्बुजा-हतम्
मया मया दृष्टमनो विपर्यगाम्, इतीश ते पालकबालका जगुः ॥

भिया तदा किञ्चिद-जानतामिदं, कुमारकाणा-मतिदुर्घटं वचः
भवत्प्रभावा-विदुरैरितीरितं, मनागिवाशङ्-क्यत दृष्टपूतनैः॥

प्रवालताम्रं किमिदं पदं क्षतं, सरोजरम्यौ नु करौ विरोजितौ ।
इति प्रसर्-पत्करुणातरङ्गिताः, त्वदङ्ग-मापस्पृशु-रङ्गनाजनाः ॥

अये सुतं देहि जगत्पतेः कृपा, तरङ्गपातात्परिपातमद्य मे
इति स्म सङ्गृह्य पिता त्वदङ्कुकं, मुहुर्-मुहुः श्लिष्यति जातकण्टकः ॥

अनोनिलीनः किल हन्तुमागतः, सुरारिरेवं भवता विहिंसितः
रजोऽपि नोदृष्टममुष्य तत्कथं, स शुद्धसत्वे त्वयि लीनवान्ध्रुवम् ॥

प्रपूजितैस्तत्र ततो द्विजाति**भिः**, विशेषतो लम्भित-मङ्गलाशि**षः** ।

व्रजं निजैर्-बाल्यरसैर्-विमोहयन्, मरुत्पुराधीश रुजां जहीहि मे ॥ श्री हरये नमः।

इति शकटासुरवधवर्णनं द्विशत्वारिंशत्तमदशकं समाप्तम्॥

## त्रयश्चत्वारिंशत्तम-दशकम् -43

## तृणावर्त वधः

**Tune – Evam chaturdasa**

त्वामेकदा गुरु-मरुत्-पुरनाथ वोढु**म्**

गाढाधिरूढ-गरिमाणमपारयन्ती ।

माता निधाय शयने किमिदं बतेति

ध्यायन्त्यचेष्टत गृहेषु निविष्टशङ्का ॥ १॥

तावद्-विदूरमुपकर्णित-घोरघो**ष**

व्याजृम्भिपांसुपटली-परिपूरिता**शः** ।

वात्यावपुः स किल दैत्यवरस्तृणावर्-ताख्यो

जहार जनमानसहारिणं त्वाम्॥ २ ॥

उद्दामपांसुतिमिराहत-दृष्टिपा**ते**

द्रष्टुं किमप्यकुशले पशुपाललोके ।

हा बालकस्य किमिति त्वदुपान्तमाप्ता

माता भवन्तमविलोक्य भृशं रुरोद ॥ ३॥

तावत्स दानववरोऽपि च दीनमू**र्तिः**

भावत्कभार-परिधारण-लूनवेगः ।
सङ्कोचमाप तदनु क्षतपांसुघोषे
घोषे व्यतायत भवज्जननी-निनादः ॥ ४॥

रोदोपकर्णनवशा-दुपगम्य गेहम्
क्रन्दत्सु नन्दमुख-गोपकुलेषु दीनः ।
त्वां दानवस्त्वखिल-मुक्तिकरं मुमुक्षुः
त्वय्य-प्रमुञ्चति पपात वियत्प्रदेशात् ॥ ५॥

रोदाकुलास्तदनु गोपगणा बहिष्ठ
पाषाणपृष्ठ-भुवि देह-मतिस्थविष्ठम् ।
प्रैक्षन्त हन्त निपतन्तममुष्य वक्षः
अक्षीणमेव च भवन्तमलं हसन्तम् ॥ ६॥

ग्रावप्रपातपरि-पिष्टगरिष्ठ-देह
भ्रष्टासुदुष्ट-दनुजोपरि धृष्ट-हासम् ।
आघ्नानमम्बुज-करेण भवन्तमेत्य
गोपा दधुर्-गिरिवरादिव नीलरत्नम् ॥ ७॥

एकैकमाशु परिगृह्य निकामनन्दन्
नन्दादिगोप-परिरब्ध-विचुम्बिताङ्गम् ।
आदातुकाम-परिशङ्कित-गोपनारी
हस्ताम्बुज-प्रपतितं प्रणुमो भवन्तम् ॥ ८॥

भूयोऽपि किन्नु कृणुमः प्रणतार्-तिहा**री**

गोविन्द एव परिपालयतात्सुतं **नः** ।

इत्यादि मातरपितृ-प्रमुखैस्तदानीम्

सम्प्रार्थितस्-त्व-दवनाय विभो त्वमेव ॥ ९॥

वातात्मकं दनुजमेवमयि प्रधून्व**न्**

वातोद्-भवान्मम गदान्-किमु नो धुनोषि ।

किं वा करोमि पुरनप्यनिलालयेश

निश्शेषरोगशमनं मुहुरर्थये त्वाम् ॥ १०॥ श्री हरये नमः।

इति तृणावर्तवधवर्णनं त्रयश्चत्वारिंशत्तमदशकं समाप्तम्॥

## चतुश्-चत्वारिंशत्तम-दशकम्-44

---

## नामकरणं जतक फल कथनम् च

**Tune - Sandra**

गूढं वसुदेवगिरा कर्तुं ते, निष्-क्रियस्य सं**स्कारा**न् ।

हृद्-गत-होरातत्वो गर्गमु**निः**, त्वद्-गृह**म्**, विभो गत**वा**न्॥ १॥

नन्दोऽथ नन्दितात्मा, बृन्दिष्टं मानयन्नमुं यमि**ना**म्

मन्दस्मितार्-द्र**मू**चे, त्वत्-सम्स्कारान्, विधातु-मुत्सुक**धीः**॥

यदुवंशाचार्यत्वात्, सुनिभृत-मिदमार्य, कार्यमिति कथय**न्** ।

गर्गो निर्गतपुल**कः** चक्रे, तव साग्रजस्य ना**मा**नि ॥ ३॥

कथमस्य नाम कुर्वे, सहस्र-नाम्नो-अनन्त-ना**म्नो** **वा**

इति नूनं गर्गमु<u>निः</u> चक्रे, तव नाम नाम रहसि वि<u>भो</u> ॥ ४॥

कृषिधातुणकाराभ्यां, सत्तानन्दात्मतां किलाभिलप<u>त्</u>

जगदघकर्षित्वं वा, कथय-दृषिः, कृष्णनाम ते व्यत<u>नो</u>त् ॥ ५ ॥

अन्यांश्च नामभेदान् , व्याकुर्-वन्नग्रजे च रा<u>मा</u>दीन् ।

अतिमानुषानु<u>भा</u>वं, न्यगदत्वाम्, अप्रकाशयन्पि<u>त्रे</u> ॥ ६॥

स्निह्यति यत्सव पुत्रे, मुह्यति स न मायिकैः पुनश्शो<u>कैः</u> ।

द्रुह्यति यस्स तु न<u>श्ये</u>द् , इत्यवदत्ते महत्व-मृषिव<u>र्यः</u> ॥ ७ ॥

जेष्यति बहुतरदैत्यान्, नेष्यति निजबन्धुलोकम् अमलपद<u>म्</u>

श्रोष्यति सुविमलकीर्तीः र<u>स्ये</u>ति, भवद् विभूतिम्-ऋषि<u>रूचे</u>

अमुनैव सर्वदुर्गं, तरितास्थ कृतास्थमत्र तिष्ठध्व<u>म्</u> ।

हरिरेवेत्यनभिलपन् , नित्यादि त्वाम्-अवर्णयत् स मु<u>निः</u>॥ ९॥

गर्गेऽथ निर्गतेऽस्मिन्, नन्दितनन्दा-दिनन्द्यमानस्त्व<u>म्</u> ।

मद्-गद-मुद्-गतकरुणो, निर्गमय, श्रीमरुत्पुरा<u>धी</u>श॥१०॥ श्री हरये नमः।

इति नामकरणवर्णनं चतुश्चत्वारिंशत्तमदशकं समाप्तम्॥

**पञ्च-चत्वारिंशत्तम-दशकम् -45**

---

## बाल लीला

चिलङ्ग केट्टि ओडि ओडि वायो, एन्डे तामर कण्णा आडि आडि वायो॥

निन्डे पिञ्चु पादम् तेडि तेडि झङ्गळ्, निन्डे दिव्य नामम् पाडिपाडि वन्नु॥

चिलङ्ग केट्टि ओडि ओडि वायो, एन्डे तामर कण्ण आडि आडि वायो ॥

**Tune - Sandra**

अयि सबल मुरारे पाणिजानु-प्रचारैः

किमपि भवनभागान् , भूषयन्तौ भवन्तौ ।

चलितचरणकञ्जौ, मञ्जुमञ्जीर-शिञ्जा

श्रवणकुतुकभाजौ, चेरतुश्चारु वेगात् ॥ १॥

मृदु मृदु विहसन्तौ, उन्-मिषद्-दन्त-वन्तौ

वदन-पतितकेशौ, दृश्यपादाब्जदेशौ

भुजगळितकरान्त, व्यालगत्-कङ्कणाङ्कौ

मतिमहरत-मुच्चैः, पश्यतां विश्वनृणाम् ॥ २॥

अनुसरति जनौघे, कौतुक व्याकुलाक्षे

किमपि कृतनिनादं, व्याहसन्तौ द्रवन्तौ ।

बलितवदन-पद्मं, पृष्ठतो दत्त-दृष्टी

किमिव न विदधाथे, कौतुकं वासुदेव ॥ ३॥

द्रुतगतिषु पतन्तौ, उत्थितौ लिप्तपङ्कौ

दिवि मुनिभिर-पङ्कैः, सस्मितं वन्द्य-मानौ ।

द्रुतमथ जननीभ्यां, सानु-कम्पं गृहीतौ

मुहुरपि परिरब्धौ, द्राग्युवां चुम्बितौ च ॥ ४॥

स्नुत-कुच-भरमङ्के, धारयन्ती भवन्तम्

तरळमति यशोदा, स्तन्यदा धन्य-धन्या ।

कपटपशुप मध्ये, मुग्ध-हासाङ्कुरं ते

दशनमुकुळ-हृद्यं, वीक्ष्य वक्त्रम् जहर्ष ॥ ५ ॥

तदनु चरणचारी, दारकैः साकमारान्

निलयततिषु खेलन् , बालचापल्य-शाली ।

भवनशुकबिडालान्, वत्सकांश् चानुधावन्

कथमपि कृतहासैर्, गोपकैर्-वारितोऽभूः ॥ ६ ॥

हलधर-सहितस्त्वं, यत्र यत्रोपयातो

विवशपतितनेत्राः, तत्र तत्रैव गोप्यः ।

विगळितगृहकृत्या, विस्मृतापत्य-भृत्या

मुरहर मुहुरत्यन्त, आकुला नित्य-मासन् ॥ ७ ॥

प्रतिनवनवनीतं, गोपिका-दत्तमिच्छन्

कलपद-मुपगायन्, कोमळम् क्वापि नृत्यन् ।

सदय-युवति-लोके, अर्पितं सर्पिरश्नन्

क्वचन नवविपक्वं, दुग्ध-मत्यापि-बस्त्वम् ॥ ८ ॥

मम खलु बलिगेहे, याचनं जात-मास्ताम्

इह पुनरबलानाम्, अग्रतो नैव कुर्वे ।

इति विहितमतिः किं, देव सन्त्यज्य याञ्चाम्

दधिघृतमहरस्त्वं, चारुणा चोरणेन ॥ ९॥

तव दधिघृतमोषे, घोषयो**षा**-जना**नाम्**

अभजत हृदि **रो**षो, नावकाशं न शो**कः** ।

हृदयमपि मुषित्वा, हर्षसि**न्धौ** न्यधास्त्व**म्**

स मम शमय **रोगा**न्, वातगे**हा**धि**ना**थ ॥ १०॥

**Sandra**

शाखा↑ग्रेऽथ विधुं विलोक्य, फलमित्य**म्बां** च तातं मु**हुः**

संप्रार्-थ्याथ तदा तदीय वचसा, प्रोत्क्षिप्तबा**हौ** त्व**यि**।

चित्रं देव शशी स ते करमगात्, किं **ब्रूमहे** संप**तः**

ज्योतिर् मण्डल पूरिताकिलवपुः, प्रागा विराड्रूप**ता**म्॥ ११॥

**Tune – Evam chaturdasa**

किं किं बतेदमिति संभ्रम भाजमेन**म्**

ब्रह्मार्णवे क्षणममुम् परिमज्ज्यतातम्।

मायां पुनस्तनय मोहमयीं वितन्वन्

आनन्द चिन्मय जगन्मय पाहि रो**गा**त्॥ १२॥ श्री हरये नमः।

इति बलक्रीडावर्णनं पञ्चशत्वरिंशत्तमदशकं समाप्तम्॥

## षड्त्वारिंशत्तम-दशकम् -46

## श्रीकृष्णस्य वदने यशोदया लोकानां दर्शनम्

**Tune - Kalyatam**

अयि देव पुरा किलत्वयि, स्वयमुत्तानशये स्तनन्धये

परिजृम्भणतो व्यपावृते, वदने विश्वमचष्ट वल्लवी ॥ १॥

पुनरप्यथ बालकैः समं, त्वयि लीलानिरते जगत्पते ।

फलसञ्चय-वञ्चनकृधा, तव मृद्-भोजनमूचुरर्-भकाः ॥ २॥

अयि ते प्रळयावधौ विभो, क्षितितोयादि-समस्तभक्षिणः ।

मृदुपाशनतो रुजा भवेद्, इति भीता जननी चुकोप सा ॥ ३॥

अयि दुर्-विनयात्मक त्वया, किमु मृत्सा बत वत्स भक्षिता ।

इति मातृगिरं चिरं विभो, वितथां त्वं प्रतिजज्ञिषे हसन् ॥ ४॥

अयि ते सकलैर्विनिश्चिते, विमतिश्चेद्-वदनं विदार्यताम् ।

इति मातृविभर्-त्सितो मुखं, विकसत्-पद्मनिभं व्यदारयः॥५ ॥

अपि मृल्लवदर्शनोत्सुकां, जननीं तां बहु तर्पयन्निव ।

पृथिवीं निखिलां न केवलं, भुवनान्यप्यखिलान्-यदीदृशः॥६॥

कुहचिद्वनमम्बुधिः क्वचित्, क्वचिदभ्रं कुहचिद्रसातलम् ।

मनुजा दनुजाः क्वचित्सुरा, ददृशे किं न तदा त्वदानने ॥ ७॥

कलशाम्बुधि-शायिनं पुनः, परवैकुण्ठपदाधिवासिनम्

स्वपुरश्च निजार्भकात्मकं, कतिधा त्वां न ददर्श सा मुखे ॥ ८॥

विकसद्-भुवने मुखोदरे, ननु भूयोऽपि तथाविधाननः ।

अनया स्फुटमीक्षितो भवान् , अनवस्थां जगतां बतातनोत् ॥

धृततत्वधियं तदा क्षणं, जननीं तां प्रणयेन मोहयन् ।

स्तनमम्ब दिशेत्युपा-सजन् , भगवन्-अद्भुतबाल पाहि माम्॥ श्री हरये नमः।

इति विश्वरूपप्रदर्शनवर्णनं षट्चत्वारिंशत्तमदशकं समाप्तम्॥

**सप्तचत्वारिंशत्तम-दशकम् -47**

उलूखल बन्धनम्

**Tune - Kalyatam**

एकदा दधिविमाथकारि**णीं**, मातरं समुपसेदिवान् भवान् ।
स्तन्यलोलु-पतया निवारयन् , अङ्कमेत्य पपिवान्पयोधरौ॥ १ ॥

अर्धपीतकुच-कुड्मले त्वयि, स्निग्धहास-मधुराननाम्बुजे ।
दुग्धमीश दहने परिस्नुतं, धर्तुमाशु जननी जगाम ते ॥ २॥

सामिपीतरस-भङ्गसङ्गत, क्रोधभार-परिभूतचेतसा ।
मन्थदण्ड-मुपगृह्य पाटितं, हन्त देव दधिभाजनं त्वया ॥ ३ ॥

उच्चल ध्वनित-मुच्चकैस्तदा, सन्निशम्य जननी समाद्रुता ।
त्वद्यशो-विसरवद्ददर्श सा, सद्य एव दधि विस्तृतं क्षितौ॥ ४॥

वेदमार्गपरिमार्गितं रुषा, त्वामवीक्ष्य परिमार्गयन्त्यसौ ।
सन्ददर्श सुकृतिन्युलूखले, दीयमान-नवनीतमोतवे ॥ ५॥

त्वां प्रगृह्य बत भीतिभावना, भासुरानन-सरोजमाशु सा
रोषरूषितमुखी सखीपुरो, बन्धनाय रशनामुपाददे ॥६ ॥

बन्धुमिच्छति यमेव सज्जनः, तम् भवन्तमयि बन्धुमिच्छति ।
सा नियुज्य रशनागुणान्बहून् , द्व-व्यङ्गुलोनमखिलं किलैक्षत ॥

विस्मितोत्-स्मितसखीजनेक्षितां, स्विन्नसन्नवपुषं निरीक्ष्य ताम् ।

नित्यमुक्त-वपुरप्यहो हरे, बन्धमेव कृपयान्वमन्यथाः ॥ ८॥

स्थीयतां चिरमुलूखले खलेत् , आगता भवनमेव सा यदा ।

प्रागुलूखल-बिलान्तरे तदा, सर्पिरर्पित-मदन्नवास्थिताः॥ ९ ॥

यद्यपाशसुगमो विभो भवान् , संयतः किमु सपाशयानया ।

एवमादि दिविजैरभिष्टुतो, वातनाथ परिपाहि मां गदात्॥१०॥ श्री हरये नमः।

इति उलूकलबन्धनवर्णनं सप्तचत्वारिंशत्तमदशकं समाप्तम्॥

## अष्टचत्वारिंशत्तम-दशकम् -48

---

## नलकूबर मणिग्रीवयोः शापमोक्षः

Tune - Evam chaturdasa

मुदा सुरौघैस्-त्वमुदार सम्म**दै**, उदीर्य दामोदर इत्यभिष्टु**तः** ।

मृदूदरः स्वैरमुलूखले लगन् , अदूरतो द्वौ ककुभावुदैक्ष**थाः**॥ १ ॥

कुबेरसूनुर्-नलकूबराभि**धः**,परो मणिग्रीव इति प्रथां ग**तः** ।

महेशसेवाधि-गतश्रियोन्मदौ, चिरं किल त्वद्विमुखावखेलताम् ॥२॥

सुरापगायां किल तौ मदोत्क**टौ**, सुरापगायद्-बहुयौवतावृतौ

विवाससौ केळिपरौ स नारदो, भवत्पदैक-प्रवणो निरैक्षत॥ ३॥

भिया प्रियालोकमुपात्तवास**सं**, पुरो निरीक्ष्यापि मदान्धचेतसौ

इमौ भवद्-भक्त्युपशान्तिसिद्धये, मुनिर्-जगौ शान्तिमृते कुतस्सुखम्॥

युवामवाप्तौ ककुभात्मतां चि<u>रं</u>, हरिं निरीक्ष्याथ पदं स्वमाप्नुतम् ।

इतीरितौ तौ भवदीक्षणस्पृहां, गतौ व्रजान्ते ककुभौ बभूव<u>तुः</u> ॥

अतन्द्रमिन्द्र-द्ययुगं तथा-वि<u>धं</u>, समेयुषा मन्थरगामिना त्वया

तिरायितोलूखल-रोधनिर्धुतौ, चिराय जीर्णौ परिपातितौ तरू ॥

अभाजि शाखिद्वितयं यदा त्व<u>या</u>, तदैव तद्गर्भतलान्निरेयुषा ।

महात्विषा यक्षयुगेन तत्क्षणाद् ,अभाजि गोविन्द भवानपि स्तवैः ॥

इहान्यभक्तोऽपि समेष्यति क्र<u>माद्</u> ,भवन्तमेतौ खलु रुद्रसेवकौ ।

मुनिप्रसादाद्-भवदङ्घ्रि-मागतौ, गतौ वृणानौ खलु भक्तिमुत्तमाम् ॥

ततस्तरूद्दारण-दारुणार<u>व</u>, प्रकम्पिसम्पातिनि गोपमण्डले ।

विलज्जित त्वज्जननीमुखेक्षिणा, व्यमोक्षि नन्देन भवान्-विमोक्ष<u>दः</u>॥९॥

महीरुहोर्-मध्यगतो बतार्-भ<u>**को**</u>, हरेः प्रभावाद्-अपरिक्षतोऽधुना ।

इति ब्रवाणैर्-गमितो गृहं भवा<u>न्</u> , मरुत्पुराधीश्वर पाहि मां गदात्॥ श्री हरये नमः।

इति यमरार्जुनभञ्जनमष्टचत्वारिंशत्तमदशकं समाप्तम्॥

**एकोनपञ्चाशत्तम-दशकम् -49**

---

## वृन्दावन प्रवेशः

**<u>Tune – Evam chaturdasa</u>**

भवत्प्रभावा-विदुरा हि गो<u>पाः</u>, तरुप्रपातादिकमत्र गोष्ठे

अहेतु-मुत्पातगणं विशङ्क्य, प्रयातुमन्यत्र मनो विते<u>नुः</u> ॥ १॥

तत्रोपनन्दाभिध-गोपव<u>**र्यो**</u>, जगौ भवत्प्रेरणयैव नूनम्

इतः प्रतीच्यां विपिनं मनोज्ञं, बृन्दावनं नाम विराजतीति॥ २॥

बृहद्-वनं तत्खलु नन्दमु<u>**ख्या**</u>, विधाय गौष्ठीनमथ क्षणेन

त्वदन्-वितत्वज्जननीनिविष्ट, गरिष्ठ-यानानुगता विचे<u>**लुः**</u> ॥ ३॥

अनोमनोज्ञध्वनि-धेनुपा<u>**ली**</u>, खुरप्रणादान्-तरतो वधू<u>**भिः**</u> ।

भवद्-विनोदालपिताक्षराणि, प्रपीय नाज्ञायत मार्गदैर्घ्यम्॥ ४॥

निरीक्ष्य बृन्दावनमीश नन्द<u>**तु**</u>, प्रसूनकुन्द-प्रमुखद्रुमौघम् ।

अमोदथाश्शाद्-वलसान्द्रलक्ष्म्या, हरिन्मणी-कुट्टिमपुष्टशोभम् ॥

नवाक-निर्व्यूढ-निवासभेदे<u>**षु**</u> ,अशेषगोपेषु सुखासितेषु

वनश्रियं गोपकिशोरपाली, विमिश्रितः पर्यवलोकथास्त्वम्॥

अराळमार्गागत-निर्मला<u>**पां**</u>, मराळकूजाकृत-नर्मलापाम् ।

निरन्तरस्मेरसरोजवक्त्रां, कलिन्दकन्यां समलोकयस्त्वम्॥ ७॥

मयूरके<u>**का**</u>शत-लोभनी<u>**यं**</u>, मयूखमालाशबलं मणीनाम् ।

विरिञ्चलोकस्पृश-मुच्चश्<u>**ङ्गैर्**</u>, गिरिं च गोवर्धनमैक्षथास्त्वम्॥ ८ ॥

समन्ततो गोपकुमारकै<u>**स्त्वं**</u>, समन्ततो यत्र वनान्तमा<u>**गाः**</u> ।

ततस्त-तस्तां कृटिलामपश्यः, कलिन्दजां रागवतीमिवैकाम् ॥ ९॥

तथाविधेऽस्मिन्-विपिने पश<u>**व्ये**</u>, समुत्सुको वत्सगणप्रचारे ।

चरन्सरामोऽथ कुमारकैस्त्वं, समीर-गेहाधिप पाहि रो<u>**गा**</u>त् ॥ श्री हरये नमः।

इति वृन्दावनगमनवर्णनमेकोनपञ्चाशत्तमदशकं समाप्तम्॥

## पञ्चाशत्तम-दशकम् -50

### वत्सासुर-बकासुरयोः वधः

**Tune - Sandra**

तरलमधु-कृद्-वृन्दे, बृन्दावनेऽथ मनोहरे

पशुप-शिशुभिस्साकं, वत्सानुपालनलोलुपः ।

हलधरसखो देव, श्रीमन् विचेरिथ धारयन्

गवलमुरळीवेत्रं, नेत्राभि-रामतनुद्युतिः ॥ १॥

विहितजगतीरक्षं, लक्ष्मी-कराम्बुज-लाळितम्

ददति चरणद्वन्द्वं, बृन्दावने त्वयि पावने ।

किमिव न बभौ, सम्पत् सम्पूरितं तरुवल्लरी

सलिलधरणीगोत्र, क्षेत्रादिकं कमलापते ॥ २॥

विलसदुलपे कान्तारान्ते, समीरणशीतळे

विपुलयमुनातीरे, गोवर्धनाचलमूर्द्धसु ।

ललितमुरळीनादः, सञ्चारयन्खलु वात्सकम्

क्वचन दिवसे दैत्यं, वत्साकृतिं त्वमुदैक्षथाः ॥ ३॥

रभसविलसत्पुच्छं, विच्छायतोऽस्य विलोकयन्

किमपि वलितस्कन्धं, रन्ध्रप्रती-क्षमुदीक्षितम् ।

तमथ चरणे बिभ्रद्, विभ्रामयन्मुहुरुच्चकैः

कुहचन महावृक्षे, चिक्षेपिथ-क्षतजीवितम् ॥ ४॥

निपतति महादैत्ये, जात्या दुरात्मनि तत्क्षणम्

निपतनजवक्षुण्ण, क्षोणीरुहक्षत-कानने ।

दिवि परमिळद्-वृन्दा, बृन्दारकाः कुसुमोत्करैः

शिरसि भवतो हर्षाद् , वर्षन्तिनाम तदा हरे ॥ ५॥

सुरभिलतमा मूर्धन्, ऊर्ध्वं कुतः कुसुमावली

निपतति तवेत्युक्तो, बालैः सहेलमुदैरयः ।

झटिति दनुज-क्षेपेणोर्ध्वम् , गतस्तरुमण्डलात्

कुसुमनिकरः सोऽयं, नूनं समेति शनैरिति॥ ६ ॥

क्वचन दिवसे भूयो, भूयस्तरे-परुषातपे

तपनतनयापाथः, पातुं गता भवदादयः ।

चलितगरुतं प्रेक्षाम्, आसुर्बकं खलु विस्मृतम्

क्षितिधर-गरुच्छेदे, कैलास-शैलमिवापरम् ॥७॥

पिबति सलिलं गोपव्राते, भवन्तमभिद्-रुतः

स किल निगिलन्नग्नि प्रख्यं, पुनर्-द्रुतमुद्वमन् ।

दलयितुमगात्त्रोट्याः, कोट्या तदा शुभवान्विभो

खलजनभिदा-चुञ्चुः, चञ्चू प्रगृह्य ददार तम् ॥ ८ ॥

सपदि सहजां सन्द्रष्टुं वा, मृतां खलु पूतना

अनुजमघ-मप्यग्रे, गत्वा प्रतीक्षितुमेव वा ।

शमननिलयं याते, तस्मिन्बके सुमनोग**णे**

किरति सुमनोबृ**न्दं**, बृन्दावनाद्-गृहमैय**थाः** ॥ ९ ॥

ललितमुरळीनादं, दूरान्निशम्य वधूज**नैः**

त्वरितमुपग**म्या**राद् , आरूढमोद-मुदीक्षि**तः** ।

जनितजननीनन्द, आनन्दः समीरणमन्दि**र**

प्रथितवसने **शौ**रे, दूरीकुरुष्व ममामय**या**न् ॥ १० ***श्री हरये नमः।***

इति वत्सासुरवधनवर्णनं बकासुरवधवर्णनं च पञ्चासत्तमदशकं समाप्तम्॥

**एकपञ्चाशत्तम-दशकम्**-51

## अघासुर निग्रहः, वन भोजनम् च

**Tune – Evam chaturdasa**

कदाचन व्रजशिशुभिः समं भ**वा**न्

वनाशने विहितमतिः प्रगेतराम् ।

समावृतो बहुतरवत्स-मण्डलैः

सतेमनैर्-निरगमदीश जेम**नैः** ॥ १॥

विनिर्-यतस्तव चरणाम्बुजद्व**या**द्

उदञ्चितं त्रिभुवनपावनं र**जः** ।

महर्षयः पुलकधरैः कलेबरैः

उदूहिरे धृतभव-दीक्षणोत्स**वाः** ॥ २॥

प्रचारयत्य-विरलशाद्वले त**ले**

पशून्विभो भवति समं कुमारकैः ।
अघासुरो न्यरुणदघाय वर्तनीम्
भयानकः सपदि शयानकाकृतिः ॥ ३॥

महाचलप्रतिमतनोर्-गुहानिभ
प्रसारितप्रथित-मुखस्य कानने ।
मुखोदरं विहरणकौतुकाद्-गताः
कुमारकाः किमपि विदूरगे त्वयि ॥ ४॥

प्रमादतः प्रविशति पन्नगोदरम्
क्-वथत्तनौ पशुपकुले सवात्सके ।
विदन्निदं त्वमपि विवेशिथ प्रभो
सुहृज्जनं विशरणमाशु रक्षितुम् ॥ ५॥

गलोदरे विपुलितवर्ष्मणा त्वया
महोरगे लुठति निरुद्धमारुते ।
द्रुतं भवान्-विदलितकण्ठमण्डलो
विमोचयन्पशुप-पशून् विनिर्-ययौ ॥ ६॥

क्षणं दिवि त्वदुपगमार्थमास्थितम्
महासुरप्रभवमहो महो महत् ।
विनिर्-गते त्वयि तु निलीनमञ्जसा
नभः स्थले ननृतुरथो जगुस्सुराः ॥ ७॥

सविस्मयैः कमलभवादिभिः **सुरैः**

अनुद्रुतस्तदनु गतः कुमार**कैः** ।

दिने पुनस्तरुण-दशामुपेयुषि

स्वकैर्-भवानतनुत भोजनोत्सवम् ॥ ८॥

विषाणिकामपि मुरळीं नितम्ब**के**

निवेशयन्कबलधरः कराम्बुजे ।

प्रहासयन्कलवचनैः कुमारकान्

बुभोजिथ त्रिदशगणैर्-मुदा **नुतः** ॥ ९॥

सुखाशनं त्विह तव गोपमण्ड**ले**

मखाशनात्-प्रियमिव देवमण्डले ।

इति स्तुतस्-त्रिदशवरैर्-जगत्पते

मरुत्पुरीनिलय गदात्प्रपाहि माम् ॥ १० ॥ श्री हरये नमः।

इत्यघासुरवधवर्णनमेकपञ्चाशत्तमदशकं समाप्तम्॥

**श्रीमद्भगवद्गीता** - 15

---

ॐ श्री परमात्मने नमः । अथ पञ्चदशोऽध्यायः । पुरुषोत्तमयोगः

श्रीकृष्णाय परमात्मने नमः

श्रीभगवानुवाच ।

ऊर्ध्वमूलमधःशाखम् ,अश्वत्थं प्राहुरव्ययम् ।

छन्दांसि यस्य पर्णानि, यस्तं वेद स वेदवित् ॥ १॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा

गुणप्रवृद्धा विषयप्रवालाः ।

अधश्च मूलान्यनुसन्ततानि

कर्मानुबन्धीनि मनुष्यलोके ॥ २॥

न रूपमस्येह तथोपलभ्यते

नान्तो न चादिर्न च सम्प्रतिष्ठा ।

अश्वत्थमेनं सुविरूढमूलम्

असङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३॥

ततः पदं तत्परिमार्गि-तव्यम्

यस्मिन्गता न निवर्तन्ति भूयः ।

तमेव चाद्यं पुरुषं प्रपद्ये ।

यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४॥

निर्मानमोहा जितसङ्गदोषा

अध्यात्मनित्या विनिवृत्तकामाः ।

द्वन्द्वैर्-विमुक्ताः सुख-दुःखसंज्ञैः

गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५॥

न तद्-भासयते सूर्यो, न शशाङ्को न पावकः ।

यद्गत्वा न निवर्तन्ते, तद्धाम परमं मम ॥ ६॥

ममैवांशो जीवलोके, जीवभूतः सनातनः ।

मनःषष्ठानीन्द्रियाणि, प्रकृतिस्थानि कर्षति ॥ ७॥

शरीरं यदवाप्नोति, यच्चाप्युत्-क्रामतीश्वरः ।
गृहीत्वैतानि संयाति, वायुर्-गन्धानिवाशयात् ॥ ८॥

श्रोत्रं चक्षुः स्पर्शनं च, रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं, विषयानुपसेवते ॥ ९॥

उत्क्रामन्तं स्थितं वापि, भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति, पश्यन्ति ज्ञानचक्षुषः ॥ १०॥

यतन्तो योगिनश्चैनं, पश्यन्-त्यात्मन्य-वस्थितम् ।
यतन्तोऽप्य-कृतात्मानो, नैनं पश्यन्त्यचेतसः ॥ ११॥

यदादित्यगतं तेजो, जगद्-भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ, तत्तेजो विद्धि मामकम् ॥ १२॥

गामाविश्य च भूतानि, धारयाम्यह-मोजसा ।
पुष्णामि चौषधीः सर्वाः, सोमो भूत्वा रसात्मकः॥ १३
अहं वैश्वानरो भूत्वा, प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४॥

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्-ज्ञानमपोहनञ्च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्त-कृद्वेदविदेव चाहम् ॥ १५॥

द्वाविमौ पुरुषौ लोके, क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि, कूटस्थोऽक्षर उच्यते ॥ १६॥

उत्तमः पुरुषस्-त्वन्यः, परमात्मेत्यु-दाहृतः ।

यो लोकत्रयमाविश्य, बिभर्-त्यव्यय ईश्वरः ॥ १७॥

यस्मात्क्षर-मतीतोऽहम्, अक्षरादपि चोत्तमः ।

अतोऽस्मि लोके वेदे च, प्रथितः पुरुषोत्तमः ॥ १८॥

यो मामेवम-सम्मूढो, जानाति पुरुषोत्तमम् ।

स सर्व-विद्भजति मां, सर्वभावेन भारत ॥ १९॥

इति गुह्यतमं शास्त्रम् , इदमुक्तं मयानघ ।

एतद् बुद्ध्वा बुद्धिमान्स्यात् , कृतकृत्यश्च भारत ॥ २०॥ श्री हरये नमः।

॥ ॐ तत्सदिति, श्रीमद्-भगवद्-गीतासु, उपनिषत्सु, ब्रह्म-विध्यायां, योगशास्त्रे, श्रीकृष्णार्जुन संवादे, पुरुषोत्तम योगो नाम, पञ्चदशोऽध्यायः॥

### द्विपञ्चाशत्तम-दशकम्-52

---

## ब्रह्म गर्व शमनम्

<u>**Tune – Evam chaturdasa**</u>

अन्यावतार-निकरेष्व-निरीक्षितं <u>ते</u>

भूमातिरेक-मभिवीक्ष्य तदाघमोक्षे ।

ब्रह्मा परीक्षितुमनाः स परोक्षभावम्

निन्येऽथ वत्सकगणान्-प्रवितत्य मायाम् ॥ १ ॥

वत्सानवीक्ष्य विवशे पशुपोत्करे **तान्**

आनेतुकाम इव धातृमतानु-वर्ती ।

त्वं सामिभुक्तकबळो गतवांस्तदानीम्

भुक्तांस्-तिरोधित सरोज-भवः कुमारान् ॥ २ ॥

वत्सायितस्तदनु गोप-गणायितस्त्व**म्**

शिक्यादि-भाण्डमुरळी-गवळादि-रू**पः** ।

प्राग्वद्-विहृत्य विपिनेषु चिराय सायम्

त्वं माययाथ बहुधा व्रजमाययाथ ॥ ३॥

त्वामेव शिक्य-गवळादिमयं दधा**नो**

भूयस्त्वमेव पशु-वत्सक-बालरू**पः** ।

गोरूपिणीभिरपि गोपवधूमयीभिः

आसादितोऽसि जननीभिरति-प्रह**र्षा**त् ॥ ४ ॥

जीवं हि कञ्चिदभिमान-वशात्-स्वकीय**म्**

मत्वा तनूज इति रागभरं वह**न्त्यः** ।

आत्मानमेव तु भवन्तमवाप्य सूनुम्

प्रीतिं ययुर्न कियतीं वनिताश्च गा**वः** ॥ ५॥

एवं प्रतिक्षण-विजृम्भित-हर्षभा**र्**

निश्शेषगोपगण-लालितभूरि-मूर्तिम् ।

त्वामग्रजोऽपि बुबुधे किल वत्सरान्ते

ब्रह्मात्मनोरपि महान्युवयोर्-विशे**षः** ॥ ६ ॥

वर्षावधौ नवपुरातन-वत्सपा**ला**न्

दृष्ट्वा विवेकमसृणे द्रुहिणे विमूढे ।

प्रादीदृशः प्रतिनवान्-मकुटान्गदादि

भूषांश्चतुर्भुजयुजः सजलाम्बुदाभान् ॥ ७ ॥

प्रत्येकमेव कमलापरि-लालिता**ङ्गा**न्

भोगीन्द्रभोग-शयनान्-नयनाभिरामान् ।

लीलानिमीलित-दृशः सनकादियोगि

व्यासेवितान्कमल-भूर्भवतो ददर्श ॥ ८॥

नारायणाकृति-मसंख्यतमान्निरी**क्ष्य**

सर्वत्र सेवकमपि स्वमवेक्ष्य धाता ।

मायानिमग्न-हृदयो विमुमोह यावद्

एको बभूविथ तदा कबळार्धपा**णिः** ॥ ९॥

नश्यन्मदे तदनु विश्वपतिं मुहु**स्त्वा**म्

नत्वा च नूतवति धातरि धाम याते ।

पोतैः समं प्रमुदितैः प्रविशन्निकेतम्

वातालयाधिप विभो परिपाहि रोगात् ॥ १०॥ श्री हरये नमः।

इति वत्सापहारवर्णनं द्विपञ्चाशत्तमदशकं समाप्तम्॥

## धेनुकासुर वधः

**Tune – Evam chaturdasa**

अतीत्य बाल्यं जगतां पते **त्वम्**, उपेत्य पौगण्डवयो मनोज्ञम्

उपेक्ष्य वत्सावन-मुत्सवेन, प्रावर्तथा गोगण-पालनायाम् ॥१॥

उपक्रमस्यानु-गुणैव से**यं**, मरुत्पुराधीश तव प्रवृ**त्तिः** ।

गोत्रापरित्राण-कृतेऽवतीर्णः, तदेव देवार-भथास्तदा यत् २॥

कदापि रामेण समं वना**न्ते**, वनश्रियं वीक्ष्य चरन्सुखेन ।

श्रीदामनाम्नः स्वसखस्य वाचा, मोदादगा धेनुककाननं त्वम्॥ ३॥

उत्तालताली, निवहे त्व-दु**क्त्या**, बलेन धूतेऽथ बलेन दोर्-भ्याम् ।

मृदुःखरश्चाभ्यपतत्-पुरस्तात् , फलोत्करो धेनुकदानवोऽपि ॥

समुद्यतो धैनुकपालनेऽ**हं**, कथं वधं धैनुक-मद्य कुर्वे ।

इतीव म**त्वा** ध्रुव-मग्रजेन, सुरौघयोद्धारम-जीघनस्त्वम् ॥ ५॥

तदीय-भृत्यानपि जम्बुक**त्वे**, नोपागतानग्रज-संयुतस्त्वम् ।

जम्बूफलानीव तदा निरास्थः,तालेषु खेलन्भगवन् निरास्थः॥

विनिघ्नति त्वय्यथ जम्बु-कौ**घं**, सनामकत्वाद्-वरुणस्तदा**नी**म्

भयाकुलो जम्बुक-नामधेयं, श्रुतिप्रसिद्धं व्यधितेति मन्ये ॥ ७॥

तवावतारस्य फलं मुरा**रे**, सञ्जातमद्येति सुरैर्-नुतस्त्वम् ।

सत्यं फलं जातमिहेति हासी, बालैः समं तालफलान्य-भुङ्-**क्थाः** ॥

मधुद्रवस्रुन्ति बृहन्ति ता**नि**, फलानि मेदोभरभृन्ति भुक्त्वा ।
तृप्तैश्च दृप्तैर्-भवनं फलौघं, वहद्भिरागाः खलु बालकैस्त्वम्॥ ९॥

हतो हतो धेनुक इत्युपे**त्य**, फलान्य-दद्भिर्-मधुराणि लो**कैः** ।
जयेति जीवेति नुतो विभो त्वं, मरुत्पुराधीश्वर पाहि रो**गा**त् ॥ १०॥ श्री हरये नमः।

इति धेनुकासुरवधवर्णनं त्रिपञ्चसत्तमदशकं समाप्तम्॥

## **चतुष्पञ्चाशत्तम-दशकम्**-54

---

## कालिय विषबाधितानां गो गोपानां उज्जीवनम्

**Tune - Sandra**

त्वत्सेवोत्कः, सौभरिर्नाम पूर्व**म्**
कालिन्द्यन्तर्-द्वादशाब्दं तप**स्यन्** ।
मीनव्राते स्नेहवान् भोग**लो**ले
तार्क्ष्यं साक्षाद् ऐक्षता**ग्रे** क**दा**चित् ॥ १॥

त्वद्वाहं तं सक्षुधं तृक्ष**सू**नुम्
मीनं कञ्चिज् ,जक्ष**तं** लक्षयन् **सः** ।
तप्तश्चित्ते शप्त**वा**नत्र चेत्व**म्**
जन्तून् भोक्ता जीवि**तं** चापि **मो**क्ता ॥ २॥

तस्मिन्-काले, कालियःक्ष्वेल-द**र्पा**त्
सर्पारातेः, कल्पितं भागम**श्नन्** ।

तेन क्रोधात् ,त्वत्पदा**म्भो**जभा**जा**

पक्ष-क्षिप्तस्तद्दुरापं प**योऽगा**त् ॥ ३॥

घोरे तस्मिन्-सूरजा**नी**रवा**से**

तीरे वृक्षा, विक्षताः क्ष्वेल**वे**गा**त्** ।

पक्षिव्राताः पेतुरभ्रे पत**न्तः**

कारुण्यार्-द्रम् ,त्वन्मनस्तेन **जा**तम् ॥ ४॥

काले तस्मिन्, एक**दा** सीर**पा**णिम्

मुक्त्वा याते, यामु**नं** कान**ना**न्तम् ।

त्वय्युद्दाम, ग्रीष्म-भी**ष्मो**ष्मत**प्ता**

गोगोपाला, व्यापिबन्, क्ष्वेल**तो**य**म्** ॥ ५॥

नश्यज्जीवान् ,विच्युतान्, क्ष्मातले **ता**न्

विश्वान् पश्यन् , अच्यु**त** त्वं दया**र्द्रः** ।

प्राप्योपान्तं, जीव**या**मासिथ **द्रा**क्

पीयूषाम्भो, वर्षि**भिः**, श्रीकटा**क्षैः** ॥ ६॥

किं किं जातो, हर्षव**र्षा**ति-रे**कः**

सर्वाङ्गेषु, वित्युत्थि**ता**, गोपस**ङ्घाः** ।

दृष्ट्वाऽग्रे त्वां, त्वत्कृ**तं**, तद्विद**न्तः**

त्वामा-लिङ्गन्, दृष्टना**ना**, प्रभा**वाः** ॥ ७॥

गावश्चैवं, लब्धजी**वाः** क्ष**णे**न

स्फीतानन्दास्, त्वाम् च दृष्ट्वा, पुर**<u>स्ता</u>**त् ।

द्रागावव्रुः, सर्व**<u>तो</u>** हर्ष-**<u>बा</u>**ष्पम्

व्यामुञ्चन्त्यो, मन्द-मुद्यन्नि**<u>नादाः</u>** ॥ ८॥

रोमाञ्चोऽयं, सर्व**<u>तो</u>** नः श**<u>री</u>**रे

भूयस्य**<u>न्तः</u>**, काचिदानन्द**<u>मू</u>**र्छा ।

आश्चर्योऽयं, क्ष्वेलवे**<u>गो</u>** मुकुन्देति

उक्तो गोपैर् , नन्दि**<u>तो</u>** वन्दितोऽ**<u>भूः</u>** ॥ ९॥

एवं भक्तान् , मुक्तजी**<u>वा</u>**नपि त्वम्

मुग्धापाङ्गैर् , अस्त-रो**<u>गां</u>**स्त**<u>नो</u>**षि ।

तादृग्भूत, स्फीत-कारु**<u>ण्य</u>**भू**<u>मा</u>**

रोगात्पाया, वायुगे**<u>हा</u>**धि**<u>ना</u>**थ ॥ १०॥ श्री हरये नमः।

इतिकालियोपाख्याने गोगोपानामुज्जीवन वर्णनं चतुर्पञ्चाशत्तमदशकं समाप्तम्॥

## पञ्चपञ्चाशत्तम-दशकम्-55

---

# कालिय मर्दनम्

**<u>Tune - Dance</u>**

अथ वारिणि घोरतरं फणिनं, प्रतिवारयितुं कृतधीर्-भगवन् ।

द्रुतमारिथ तीरगनीपतरुं, विषमारुत-शोषित-पर्णचयम् ॥ १॥

अधिरुह्य पदाम्बुरुहेण च तं, नवपल्ल-वतुल्य-मनोज्ञरुचा ।

ह्रदवारिणि दूरतरं न्यपतः, परिघूर्णितघोर-तरङ्गगणे॥२॥

भुवनत्रय-भारभृतो भवतो, गुरुभारवि-कम्पि-विजृम्भिजला ।
परिमज्जयति स्म धनुः शतकं, तटिनी झटिति स्फुट-घोषवती ॥

अथ दिक्षु विदिक्षु परिक्षुभित, भ्रमितो-दरवारिनि-नादभरैः ।
उदकादुदगा-दुरगाधिपतिस्, त्वदुपान्तम-शान्त-रुषान्धमनाः॥

फणशृङ्ग-सहस्र-विनिस्सृमर, ज्वलदग्नि-कणोग्र-विषाम्बुधरम्
पुरतः फणिनं समलोकयथा, बहुशृङ्गिण-मञ्जनशैलमिव ॥ ५॥

ज्वलदक्षि-परिक्षर-दुग्रविषश् , वसनोष्मभरः स महाभुजगः
परिदश्य भवन्तमनन्तबलं, समवेष्टय-दस्फुट-चेष्टमहो ॥ ६॥

अविलोक्य भवन्त-मथाकुलिते, तटगामिनि बालकधेनुगणे ।
व्रजगेहतलेऽप्य-निमित्त-शतं, समु-दीक्ष्य गता यमुनां पशुपाः ॥७॥

अखिलेषु विभो भवदीयदशाम् , अवलोक्य जिहासुषु जीवभरम् ।
फणिबन्धनमाशु विमुच्य जवाद् , उदगम्यत हासजुषा भवता॥ ८॥

अधिरुह्य ततः फणिराज-फणान्, ननृते भवता मृदुपादरुचा ।
कलशिञ्चित-नूपुरमञ्चुमिलत्, करकङ्कणसङ्कुल-सङ्क्-वणितम् ॥

जहृषुः पशुपास्तुतुषुर्-मुनयो, ववृषुः कुसुमानि सुरेन्द्र-गणाः
त्वयि नृत्यति मारुतगेहपते, परिपाहि स मां त्वमदान्तगदात्॥ श्री हरये नमः।

इति कालियोपाख्याने कालियमर्दने भगवन्नर्तनवर्णनं पञ्चपञ्चाशत्तमदशकं समाप्तम्

## काळीय अनुग्रहः

**Tune – thathanu nandama**

रुचिरकम्पित-कुण्डलमण्डलः, सुचिरमीश ननर्तिथ पन्नगे ।

अमरताडित-दुन्दुभिसुन्दरं, वियति गायति दैवतयौवते॥ १॥

नमति यद्यदमुष्य शिरो हरे, परिविहाय तदुन्नत-मुन्नतम् ।

परिमथन्पद-पङ्करुहा चिरं, व्यहरथाः करताळ-मनोहरम्॥ २॥

त्वदवभग्न-विभुग्न-फणागणे, गळित-शोणित-शोणित-पाथसि

फणिपताव-वसीदति सन्नताः, स्तदबलास्तव माधव पादयोः॥

अयि पुरैव चिराय परिश्रुत, त्वदनु-भावविलीनहृदो हि ताः ।

मुनिभिरप्यन-वाप्यपथैः स्तवैर्, नुनुवुरीश भवन्तमयन्-त्रितम् ॥४॥

फणिवधूजन-भक्तिविलोकन, प्रविक-सत्करुणा-कुलचेतसा ।

फणिपतिर्-भवताच्युत जीवितः, त्वयि समर्पितमूर्तिरवानमत्॥

रमणकं व्रज वारिधिमध्यगं, फणिरिपुर्न करोति विरोधिताम् ।

इति भवद्वचनान्यति-मानयन्, फणिपतिर्-निरगादुरगैः समम्॥

फणिवधूजन-दत्तमणिव्रज, ज्वलितहार-दुकूल-विभूषितः ।

तटगतैः प्रमदाश्रु-विमिश्रितैः, समगथाः स्वजनैर्-दिवसावधौ ॥

निशि पुनस्तमसा व्रजमन्दिरं, व्रजितु-मक्षम एव जनोत्करे ।

स्वपति तत्र भवच्चरणाश्रये, दवकृशानुर-रुन्ध समन्ततः ॥ ८॥

प्रबुधितानथ पालय पालयेति, उदयदार्तरवान् पशुपालकान्

अवितुमाशु पपाथ महानलं, किमिह चित्रमयं खलु ते मुखम्॥

शिखिनि वर्णत एव हि पीतता, परिलसत् त्युधना क्रिययाऽप्यसौ ।

इति नुतः पशुपैर्-मुदितैर्-विभो, हर हरे दुरितैः सह मे गदान्॥  श्री हरये नमः।

इति कालियोपाख्याने कालियमर्दने भगवदनुग्रहवर्णनं षट्पञ्चाशत्तमदशकं समाप्तम्॥

## सप्तपञ्चाशत्तम-दशकम् -57

---

## प्रलम्बासुर वधः

Tune - Saandra

रामसखः क्वापि दिने, कामद भगवन् , गतो भवान्विपिनम् ।

सूनुभिरपि गोपानां, धेनुभिरभि, संवृतो लसद्-वेषः॥ १ ॥

सन्दर्-शयन्बलाय स्वैरं, बृन्दावनश्रियं विमलाम् ।

काण्डीरैः सह बालैः, भाण्डीरकमागमो वटं क्रीडन् ॥ २॥

तावत्तावकनिधन, स्पृहयालुर् गोपमूर्तिर्-दयालुः ।

दैत्यः प्रलम्बनामा, प्रलम्ब-बाहुम् भवन्तमापेदे ॥ ३ ॥

जानन्नप्यविजानन्निव, तेन समं निबद्धसौहार्दः ।

वटनिकटे पटुपशुपव्याबद्धं, द्वन्द्व-युद्धमारब्धाः॥ ४॥

गोपान्-विभज्य तन्वन्, सङ्घं बलभद्रकं भवत्कमपि ।

त्वद्-बलभीरुं दैत्यं, त्वद्-बल-गत, मन्वमन्यथा भगवन् ॥५॥

कल्पित-विजेतृवहने, समरे परयूथगं, स्वदयिततरम् ।
श्रीदामानमधत्थाः, पराजितो भक्तदास**तां** प्रथय**न्** ॥ ६॥

एवं बहुषु विभूमन्, बालेषु वहत्सु वाह्यमाने**षु** ।
रामविजितः प्रल**म्बो**, जहार तं, दूर**तो** भवद्-**भीत्या** ॥ ७॥

त्वद्दूरं गमयन्तं तं दृष्ट्वा, हलिनि विहितगरिमभ**रे** ।
दैत्यः स्वरूप**मागाद्** , यद्-रूपात्, सहि बलोऽपि चकि**तोऽ**भू**त्** ॥ ८ ॥

उच्चतया दैत्यतनोः, त्वन्मुखमालोक्य दूरतो रा**मः** ।
विगतभयो दृढमु**ष्ट्या**, भृशदुष्टं सपदि पिष्टवा**ने**न**म्** ॥९॥

हत्वा दानववीरं, प्राप्तं बलमालि-लिङ्गिथ **प्रेम्णा**
तावन्मिलतोर्-युव**योः**, शिरसि कृता, पुष्पवृष्टिरमरग**णैः** १०॥

आलम्बो भुवनानां, प्रालम्बं निधनमेवमारचय**न्** ।
कालं विहाय स**द्यो**, लोलम्बरुचे, हरे हरेः **क्लेशा**न्॥ श्री हरये नमः।

इति प्रलम्बासुरवधवर्णनं सप्तपञ्चाशत्तमदशकं समाप्तम्॥

### अष्टपञ्चाशत्तम-दशकम् -58

---

## दावाग्निमोक्षः, ऋतु वर्णनम् च

**Tune - Sandra**

त्वयि विहरणलोले↑, बालजा**लैः** प्रल**म्ब**
    प्रमथन-सविल**म्बे**, धेन**वः** स्वैर-चा**राः** ।

तृणकुतुकनिविष्टा, दूर-दूरं चरन्त्यः

किमपि विपिनमैषी कारव्यम्, ईषांबभूवुः ॥ १ ॥

अनधिगतनिदाघ, क्रौर्य-बृन्दावनान्ताद्

बहिरिद्-मुपयाताः, काननं धेन-वस्ताः ।

तव विरह-विषण्णा, ऊष्मल-ग्रीष्मताप

प्रसरविसरदम्भ, स्याकुलाः स्तम्भ-मापुः ॥२॥

तदनु सह सहायैर्, दूरमन्विष्य शौरे

गलितसरणि-मुञ्जारण्य सञ्जात-खेदम् ।

पशुकुलमभिवीक्ष्य, क्षिप्रमानेतुमारात्

त्वयि गतवति ही ही, सर्वतोऽग्निर्ज-जृम्भे ॥३॥

सकलहरिति दीप्ते, घोर-भाङ्कारभीमे

शिखिनि विहतमार्गा, अर्धदग्धा इवार्ताः ।

अहह भुवनबन्धो, पाहि पाहीति सर्वे

शरणमुपगतास्-त्वाम्, तापहर्तारमेकम् ॥४॥

अलमलमतिभीत्य, सर्वतो मीलयध्वम्

भृशमिति तव वाचा, मीलिताक्षेषु तेषु ।

क्वनु दवदहनोऽसौ, कुत्र मुञ्जाटवी सा

सपदि ववृतिरे ते, हन्त भाण्डीरदेशे ॥ ५॥

जय जय तव माया, केयमीशेति तेषाम्

नुतिभिरुदित-हासो, बद्धनानाविलासः ।

पुनरपि विपिनान्ते, प्राचरः पाटलादि

प्रसवनिकर**मा**त्र, ग्राह्यघ**र्मा**नु**भा**वे ॥ ६॥

त्वयि विमुखविमो**च्चैः**, तापभा**रं** वहन्त**म्**

तव भजनवद**न्तः**, पङ्क-मु**च्छो**षयन्त**म्** ।

तव भुजवदु-दञ्चत्, भूरितेजः प्र**वा**हम्

तपसमय-म**नै**षीर्, यामुनेषु स्थ**ले**षु ॥ ७॥

तदनु जलद-जा**लैः**, त्वद्-वपुस्तुल्य-भा**भिः**

विकसदमल-विद्यूत्, पीतवा**सो**विला**सैः** ।

सकलभुवन-भाजां, हर्ष**दां** वर्ष**वे**लाम्

क्षितिधर-कुह**रे**षु, स्वैरवा**सी** व्यनै**षीः** ॥ ८ ॥

कुहरतलनिविष्टं, त्वां गरिष्ठं गिरी**न्द्रः**

शिखि-कुलनव**के** का, काकुभिः स्तोत्र**का**री ।

स्फुटकुटज-कदम्बस् , तोम-पु**ष्पा**ञ्जलिं **च**

प्रविदध-दनु-**भे**जे, देव गोवर्ध**नोऽसौ** ॥ ९॥

अथ शरद-मुपेतां, तां भवद्-भक्तचे**तो**

विमलसलिल**पू**रां, मानय**न्**-कान**ने**षु ।

तृणम-मलवनान्ते, चारु स**ञ्चा**रयन् **गाः**

पवनपुरप**ते** त्वं, देहि **मे** देह**सौ**ख्यम् ॥ १०॥ श्री हरये नमः।

इति ग्रीष्म-वर्षाशरद्वर्णन-मष्टपञ्चशत्तमदशकं समाप्तम्॥

## वेणुगान वर्णनम्

**Tune - Kalyatam**

त्वद्वपुर्नवकलाय-कोमळं, प्रेमदोहनमशेष-मोहनम्

ब्रह्म तत्वपरचिन्-मुदात्मकं, वीक्ष्य सम्मु-मुहुरन्वहं स्त्रियः॥ १॥

मन्मथोन्मथित-मानसाः क्र**मा**त्, त्वद्-विलोकनरतास्त-तस्ततः ।

गोपिकास्तव न सेहिरे ह**रे**, काननोपगति-मप्यहर्-मुखे ॥ २॥

निर्गते भवति दत्तदृष्टयः, त्वद्-गतेन मनसा मृगे-क्ष**णाः**

वेणुनाद-मुपकर्ण्य दूर**तः**, त्वद्-विलासकथयाभिरेमिरे ॥ ३॥

काननान्तमितवान्-भवानपि, स्निग्धपादपतले मनोर**मे** ।

व्यत्ययाकलित-पादमास्थितः, प्रत्यपूरयत वेणुनालिकाम्॥४॥

मारबाणधुत-खेचरीकु**लं**, निर्विकार-पशुपक्षिमण्डल**म्**

द्रावणं च दृषदामपि प्र**भो,** तावकं व्यजनि वेणुकूजितम् ॥५॥

वेणुरन्ध्र-तरलाङ्गुलीदलम्, ताळसञ्चलित-पादपल्लवम्

तत्-स्थितं तव परोक्षमप्यहो, संविचिन्त्य मुमुहुर्-व्रजाङ्ग**नाः**॥

निर्-विशङ्कभव-दङ्गदर्शि**नीः**, खेचरीः खगमृगान्-पशूनपि ।

त्वत्पदप्रणयि काननं च **ताः**, धन्यधन्यमिति नन्वमानयन्॥७॥

आपिबेयमधरामृतं कदा, वेणुमुक्तरस-शेषमेकदा ।

दूरतो बत कृतं दुराशयेति, आकुला मुहुरिमाः समामुहन्॥ ८ ॥

प्रत्यहं च पुनरित्थमङ्ग**नाः**, चित्तयोनि-जनिता-दनुग्रहात् ।

बद्धराग-विवशास्त्वयि प्रभो, नित्यमापुरिह कृत्यमूढताम्॥ ९॥

**Tune - Saandra**

रागस्-तावज्जायते हि स्व**भावा**न्

मोक्षोपायो, यत्नतः स्यान्न **वा** **स्या**त् ।

तासां त्वेकं तद्-द्वयं लब्ध**मा**सीद्

भाग्यं भाग्यं पाहि **मां** मारु**ते**श ॥ १०॥ श्री हरये नमः।

इति वेणुगानवर्णनं एकोनषष्टितमदशकं समाप्तम्॥

## षष्टितम-दशकम्-60

## गोपी वस्त्र अपहरणम्

**Tune - Kalyatam**

मदनातुर-चेतसोऽन्व**हं**, भवदङ्-घ्रिद्-वयदास्य-काम्यया ।

यमुनातट-सीम्नि सैकतीं, तरलाक्ष्यो गिरिजां समार्-चिच**न्** ॥

तव नामकथारताः समं, सुदृशः प्रातरुपागताः नदीम् ।

उपहारशतैर-पूजयन् , दयितो नन्दसुतो भवेदिति॥ २ ॥

इति मासमुपाहित-व्रताः, तरलाक्षीरभि-वीक्ष्य ता भवान् ।

करुणामृदुलो नदीतटं, समयासीत्त-दनुग्र-हेच्छया॥ ३ ॥

नियमावसितौ निजाम्बरं, तटसीमन्य-वमुच्य तास्तदा

यमुनाजल-खेलनाकुलाः, पुरतस्-त्वामवलोक्य लज्जिताः॥४ ॥

त्रपया नमितान-नास्वथो, वनितास्वम्बर-जालमन्तिके ।
निहितं परिगृह्य भूरुहो, विटपं त्वं तरसाधि-रूढवान् ॥ ५॥

इह तावदुपेत्य नीयतां, वसनं वः सुदृशो यथायथम् ।
इति नर्ममृदुस्-मिते त्वयि, ब्रुवति व्यामु-मुहे वधूजनैः ॥६॥

अयि जीव चिरं किशोर नः, स्तव दासीरवशीकरोषि किम् ।
प्रदिशाम्बरमम्बु-जेक्षणेति, युदितस्त्वं स्मितमेव दत्तवान्॥ ७ ॥

अधिरुह्य तटं कृताञ्जलीः, परि-शुद्धाः स्वगतीर्-निरीक्ष्यताः
वसनान्यखिलान्-यनुग्रहं, पुनरेवं गिरमप्यदा मुदा ॥ ८ ॥

विदितं ननु वो मनीषितं, वदितारस्-त्विह योग्यमुत्तरम्
यमुनापुलिने सचन्द्रिकाः, क्षणदा इत्यबलात्-वमूचिवान्॥ ९॥

उपकर्ण्य भवन्मुखच्च्युतं, मधुनिष्यन्दि वचो मृगीदृशः ।
प्रणयादयि वीक्ष्य वीक्ष्यते, वदनाब्जं शनकैर्-गृहं गताः॥ १०॥

इति नन्वनुगृह्य बल्लवीर्, विपिनान्तेषु पुरेव सञ्चरन् ।
करुणाशिशिरो हरे हर, त्वरया मे सकलामयावलिम् ॥११॥ श्री हरये नमः।

इति चीलहरणलीलायां गोपीवस्त्रापहरणवर्णनं षष्टितमदशकं समाप्तम्॥

## विप्र पत्नी अनुग्रहः

**Tune – Evam chaturdasa**

ततश्च वृन्दावनतोऽति-दूर**तो**, वनं गतस्त्वं खलु गोपगोकु**लैः**

हृदन्तरे भक्ततरद्-विजाङ्गना, कदम्ब-कानुग्रहणाग्रहं वहन् ॥१॥

ततो निरीक्ष्या-शरणे वनान्त**रे**

किशोरलोकं, क्षुधितं तृषा-कुलम् ।

अदूरतो यज्ञपरान् द्विजान्प्रति

व्यसर्-जयो दीदि-वियाचनाय तान् ॥ २॥

गतेष्वथो तेष्-वभिधाय तेऽभि**धा**म्

कुमार-केष्वोदनयाचिषु प्रभो ।

श्रुतिस्थिरा अप्यभिनिन्द्युर्-श्रुतिम्

न किञ्चिदूचुश्च महीसुरोत्त**माः** ॥ ३॥

अनादरात् खिन्नधियो हि बाल**काः**

समाययुर्-युक्तमिदं हि यज्वसु ।

चिरादभ**क्ताः** खलु ते महीसुराः

कथं हि भक्तं त्वयि तैः समर्-प्यते ॥ ४॥

निवेदयध्वं गृहिणीजनाय **माम्**

दिशेयुरन्नं करुणाकुला इ**माः** ।

इति स्मितार्-द्रम्, भवतेरिता गताः

ते दारका दारजनं ययाचिरे ॥ ५॥

गृहीतनाम्नि त्वयि सम्भ्रमाकु<u>**लाः**</u>

चतुर्विधं भोज्यरसं प्रगृह्य ताः ।

चिरं धृतत्वत्-प्रविलोकनाग्रहाः

स्वकैत्-निरुद्धा अपि तूर्णमाय<u>**युः**</u> ॥ ६॥

विलोलपिञ्छं चिकुरे कपोल<u>**योः**</u>

समुल्लसत्-कुण्डल-मार्द्रमीक्षिते ।

निधाय बाहुं सुहृदं-ससीमनि

स्थितं भवन्तं समलोकयन्त <u>**ताः**</u> ॥ ७॥

तदा च काचित्-त्वदुपागमोद्य<u>**ता**</u>

गृहीत-हस्ता दयितेन यज्वना ।

तदैव सञ्चिन्त्य भवन्त-मञ्जसा

विवेश कैवल्यमहो कृतिन्यसौ ॥ ८॥

आदाय भोज्यान्-अनुगृह्य ताः <u>पु**नः**</u>

त्वदङ्गसङ्गस्-पृहयोज्झतीर्-गृहम् ।

विलोक्य यज्ञाय विसर्जयन्निमाः

चकर्थ भर्तॄनपि तास्वगर्हणान् ॥ ९॥

निरूप्य दोषं निजमङ्गनाज<u>**ने**</u>

विलोक्य भक्तिं च पुनर्-विचारिभिः ।

प्रबुद्धतत्-त्वैस्-त्वमभिष्टुतोद्-विजैः

मरुत्पुराधीश निरुन्धि मे गदान् ॥ १०॥ श्री हरये नमः।

इति द्विजपत्नी-मोक्षवर्णनं एकषष्टितम-दशकं समाप्तम्॥

## द्विषष्टितम दशकम् -62

## गोवर्द्धन बलिः

Tune - Saandra

कदाचिद्-गोपालान् विहितमख-सम्भार-विभवान्

निरीक्ष्य त्वं शौरे, मघवमद-मुध्वंसितुमनाः ।

विजानन्नप्येतान्, विनय-मृदु नन्दादिपशुपान्

अपृच्छः को वायं, जनक भवता-मुद्यम इति ॥१॥

बभाषे नन्दस्त्वाम् , सुत ननु विधेयो मघवतो

मखो वर्षे वर्षे, सुखयति स वर्षेण पृथिवीम् ।

नृणां वर्षायत्तं, निखिल-मुपजीव्यं महितले

विशेषा-दस्माकं, तृणसलिलजीवा हि पशवः॥ २॥

इति श्रुत्वा वाचं, पितुरयि भवानाह सरसम्

धिगेतन्नो सत्यं, मघवजनिता वृष्टिरिति यत् ।

अदृष्टं जीवानां, सृजति खलु वृष्टिं समुचिताम्

महारण्ये वृक्षाः, किमिव बलि-मिन्द्राय ददते ॥ ३॥

इदं तावत्सत्यं, यदिह पशवो नःकुलधनम्

तदाजीव्या-यासौ, बलिरचलभर्त्रे समुचितः ।
सुरेभ्योऽप्युत्कृष्टा, ननु धरणिदेवाः क्षितितले
ततस्तेऽप्या-राध्या, इति जगदिथ त्वं निज-जनाम्॥ ४ ॥

भवद्वाचं श्रुत्वा, बहुमति-युतास्तेऽपि पशुपाः
द्विजेन्द्रानर्चन्तो, बलिमद-दुरुच्चैः क्षितिभृते ।
व्यधुः प्रादक्षिण्यं, सुभृश-मनमन्नादरयुताः
त्वमादः शैलात्मा, बलिमखिलमाभीर-पुरतः ॥ ५ ॥

अवोचश्चैवं तान्, किमिह वितथं मे निगदितम्
गिरीन्द्रो नन्वेष, स्वबलिमुपभुङ्क्ते स्ववपुषा ।
अयं गोत्रो गोत्रद्विषि च, कुपिते रक्षितुमलम्
समस्तानित्युक्ता, जहृषुरखिला गोकुलजुषः ॥६॥

परिप्रीताः याताः, खलु भवदुपेता व्रजजुषो
व्रजं यावत्तावन्, निजमख-विभङ्गं निशमयन् ।
भवन्तं जानन्नपि, अधिकरजसाक्रान्त-हृदयो
न सेहे देवेन्द्रः, त्वदुपरचितात्-मोन्नतिरपि ॥७॥

मनुष्यत्वं यातो, मधुभिदपि देवेष्वविनयम्
विधत्ते चेन्नष्ट, स्त्रिदशसदसां कोऽपि महिमा ।
ततश्चध्वं-सिष्ये, पशुपहतकस्य श्रियमिति
प्रवृत्तस्त्वाम् जेतुं, स किल मघवा दुर्मदनिधिः ॥८॥

त्वदावासं हन्तुं, प्रळय-जल<u>**दा**</u>नम्बर-भु<u>**वि**</u>

प्रहिण्वन् बिभ्रा<u>**णः**</u>, कुलि-शमयम<u>**भ्रे**</u>-भगम<u>**नः**</u> ।

प्रतस्थेऽन्यैरन्तर्, दहनमरुदा<u>**द्यै**</u>र्-विहसि<u>**तो**</u>

भवन्माया नै<u>**व**</u>, त्रिभुवनप<u>**ते**</u> मोहयति क<u>**म्**</u> ॥ ९॥

सुरेन्द्रः क्रुद्धश्चेत्, द्विज-करुणया शैलकृप<u>**यापि**</u>

अनातङ्कोऽस्माकं, नियत इति वि<u>**श्वा**</u>स्य पशु<u>**पा**</u>न् ।

अहो किं नायातो, गिरिभिदिति सञ्चि<u>**न्त्य**</u> निवस<u>**न्**</u>

मरुद्-गेहाधीश, प्रणुद मुरवैरि<u>**न्**</u> मम ग<u>**दान्**</u>॥ १०॥ श्री हरये नमः।

इति इन्द्रयागविघातवर्णनं द्विषष्टितमदशकं समाप्तम्॥

**त्रिषष्टितम दशकम् -63**

---

गोवर्द्न उद्धारणम्

**<u>Tune - Kalyatam</u>**

दद्दशिरे किल तत्क्षणमक्षत

स्तनितजृम्भित-कम्पित-दिक्त<u>**टाः**</u> ।

सुषमया भवदङ्गतुलां गता

व्रजपदोपरि वारिध-रास्त्व<u>**या**</u> ॥ १॥

**<u>Tune - Saandra</u>**

विपुल-करक-मि<u>**श्रै**</u>स्, तोयधा<u>**रा**</u>-निपा<u>**तैः**</u>

दिशि दिशि पशु<u>**पानां**</u>, मण्ड<u>**ले**</u> दण्ड्य-<u>**मा**</u>ने ।

कुपित-हरि-कृता<u>**न्नः**</u>, पाहि पा<u>**ही**</u>ति ते<u>**षा**</u>म्

वचन-मजित श्रुण्वन्, माबिभीतेत्य-भाणीः ॥ २॥

**Tune - Saandra**

कुल इह खलु गोत्रो, दैवतं गोत्रशत्रो

विहितमिह स रुन्ध्यात्, कोनुः वः संशयोऽस्मिन् ।

इति सहसितवादी, देव गोवर्धनाद्रिम्

त्वरित-मुदमु-मूलो, मूलतो बाल दोर्भ्याम् ॥ ३॥

तदनु गिरिवरस्य, प्रोद्-धृतस्यास्य तावत्

सिकतिल-मृदु-देशे, दूरतो वारितापे ।

परिकर-परिमिश्रान्, धेनु-गोपानधस्ताद्

उपनिद्-धदधत्थाः, हस्त-पद्मेन शैलम् ॥ ४॥

भवति विधृत-शैले, बालिकाभिर्-वयस्यैः

अपि विहित-विलासं, केलि-लापादि-लोले ।

सविध-मिलित-धेनूः, एक-हस्तेन कण्डु

यति सति पशुपालाः तोष-मैषन्त सर्वे ॥ ५॥

**Tune - Kalyataam**

अतिमहान् गिरिरेष तु वामके

करसरोरुहि तं धरते चिरम् ।

किमिद्-मद्भुतमद्रि-बलन्विति

त्वदवलोकि-भिराकथि गोपकैः ॥ ६॥

अहह धार्ष्ट्यम-मुष्य वटोर्-गिरिम्

व्यथित-बाहु, रसाव-वरोपयेत् ।

इति हरिस्-त्वयि बद्ध-विगर्हणो

दिवस-सप्तक-मुग्रम-वर्षयत् ॥ ७॥

अचलति त्वयि देव पदात्पदम्

गलितसर्व-जले च घनोत्करे ।

अपहृते मरुता मरुतां पतिः

त्वदभि-शङ्कितधीः समुपाद्रवत् ॥ ८॥

शममुपेयुषि वर्षभरे तदा

पशु-पधेनुकुले च विनिर्गते ।

भुवि विभो समुपाहित-भूधरः

प्रमुदितैः पशुपैः परिरेभिषे ॥ ९॥

धरणिमेव पुरा धृतवानसि

क्षिति-धरोद्धरणे तव कः श्रमः ।

इति नुतस्-त्रिदशैः कमलापते

गुरुपुरालय पालय मां गदात् ॥ १०॥ श्री हरये नमः।

इति गोवर्धनोधारणवर्णनं त्रिषष्टितमदशकं समाप्तम्॥

## गोविन्द अभिषेकः

**Tune – Evam chaturdasa**

आलोक्य शैलोद्धरणादि-रू**पं**, प्रभावमुच्चैस्तव गोपलो**काः** ।
विश्वेश्वरं त्वामभिमत्य विश्वे, नन्दः भवज्ज्ञातकमन्व-पृच्छन्॥ १॥

गर्गोदितो निर्गदितो निजा**य**, वर्गाय तातेन तव प्रभावः ।
पूर्वाधिक-स्त्वय्यनुराग एषां, ऐधिष्ट तावद्-बहुमान-भा**रः**॥ २ ॥

ततोऽव-मानोदिततत्व-बो**धः**, सुराधिराजः सह दिव्यग**व्या** ।
उपेत्य तुष्टाव स नष्ट-गर्वः, स्पृष्ट्वा पदाब्जं, मणिमौलिना ते॥ ३॥

स्नेहस्तुनैस्-त्वाम् सुरभिः पयो**भिः**, गोविन्दनामाङ्कितमभ्य-षिञ्चत् ।
ऐरावतोपाहृतदिव्यगङ्गा, पाथोभिरिन्द्रोऽपि च जातहर्षः॥ ४॥

जगत्-त्रयेशे त्वयि गोकुले**शे**, तथाऽभिषिक्ते सति गोपवाटः
नाकेऽपि वैकुण्ठपदेऽप्य-ल**भ्यां**, श्रियं प्रपेदे भवतः प्रभा**वा**त् ॥

कदाचि-दन्तर्-यमुनं प्रभा**ते**, स्नायन् पिता वारुण-पूरुषे**ण** ।
नीतस्तमानेतु-मगाः पुरीं त्वां, तां वारुणीं कारणमर्त्यरू**पः**॥ ६॥

ससम्भ्रमं तेन जलाधिपे**न**, प्रपूजितस्त्वम् प्रति-गृह्य तातम् ।
उपागतस्तत्-क्षणमात्म-गेहं, पिताऽवदत्-तच्चरितं निजे**भ्यः** ॥

हरिम् विनिश्चित्य भवन्तमे**ता**न्, भवत्पदालोक-नबद्धतृ**ष्णा**न्
निरीक्ष्य विष्णो परमं पदं तद्, दुराप-मन्यैस्-त्वमदीदृश**स्ता**न् ॥

स्फुरत्-परानन्द-रसप्रवाहे, प्रपूर्ण-कैवल्य-महापयोधौ ।

चिरं निमग्नाः खलु गोपसङ्घाः, त्वयैव भूमन् पुनरुद्धृतास्ते॥९॥

**Tune - Sandra**

करबदरव-देवं, देव कुत्राव-तारे

निजपदमनवाप्यं, दर्शितं भक्तिभाजाम् ।

तदिह पशुपरूपी, त्वं हि साक्षात्-परात्मा

पवनपुरनिवासिन्, पाहिमां आमयेभ्यः ॥ १०॥ श्री हरये नमः।

इति गोविन्दाभिषेकवर्णनं नन्दानयनवर्णनं च चतुःषष्टितमदशकं समाप्तम्॥

## पञ्चषष्टितम दशकम् -65

## गोपीनाम् भगवत् समीप गमनम्

**Tune – Evam chaturdasa**

गोपीजनाय कथितं नियमावसाने

मारोत्सवं त्वमथ साधयितुं प्रवृत्तः ।

सान्द्रेण चान्द्रमहसा शिशिरीकृताशे

प्रापूरयो मुरळिकां यमुनावनान्ते ॥ १॥

सम्मूर्छनाभिरुदितस्वर-मण्डलाभिः

सम्मूर्छयन्तमखिलं भुवनान्तराळम् ।

त्वद्-वेणुनादमुप-कर्ण्य विभो तरुण्यः

तत्तादृशं कमपि चित्त-विमोहमापुः ॥ २॥

ता गेहकृत्य-निरतास्तनय-प्रसक्ताः

कान्तोपसेवन-पराश्च सरोरुहाक्ष्यः ।
सर्वं विसृज्य मुरळीरव-मोहितास्ते
कान्तार-देशमयि कान्त-तनो समे<u>ताः</u> ॥ ३॥

काश्चिन्निजाङ्ग-परिभूषण-मादधा<u>ना</u>
वेणु-प्रणादमुप-कर्ण्य कृतार्धभू<u>षाः</u> ।
त्वामागता ननु तथैव विभूषिताभ्यः
ता एव संरु-रुचिरे तव लोचनाय ॥ ४॥

हारं नितम्बभुवि काचन धारय<u>न्ती</u>
काञ्चीं च कण्ठभुवि देव समागता त्वाम् ।
हारित्वमात्म-जघनस्य मुकुन्द तुभ्यम्
व्यक्तं बभाष इव मुग्ध-मुखी विशेषात् ॥ ५॥

काचित्कुचे पुनर-सज्जित-कञ्चुली<u>का</u>
व्यामोहतः पर-वधूभिर-लक्ष्यमाणा ।
त्वामाययौ निरुपम-प्रणयातिभार
राज्याभिषेक-विधये कलशीधरेव ॥ ६॥

काश्चित् गृहात् किल निरेतुमपार-य<u>न्त्यः</u>
त्वामेव देव हृदये सुदृढं विभाव्य ।
देहं विधूय परचित्सुख-रूपमेकम्
त्वामा-विशन्परमिमा ननु धन्यध<u>न्याः</u> ॥ ७॥

जारात्मना न परमात्मतया स्मर**न्त्यो**

नार्यो गताः परमहंस-गतिं क्षणेन ।

तम्त्वाम् प्रकाश-परमात्मतनुं कथञ्चिच्

चित्ते वहन्नमृतमश्रम-मश्नुवीय ॥ ८॥

अभ्यागताभि-रभितोव्रज-सुन्दरी**भिः**

मुग्धस्मितार्द्र-वदनः करुणावलोकी ।

निस्सीमकान्ति-जलधिस्-त्वमवेक्ष्यमाणो

विश्वैकहृद्य हर मे पवनेश रोगान् ॥ ९॥ श्री हरये नमः।

इति रासक्रीडायां गोपीसमागमवर्णनं पञ्चषष्टितमदशकम् समाप्तम्॥

## षष्ट षष्टितम दशकम् -66

---

## गोपीजन आह्लादनम्

**Tune - Sandra**

उपयातानां सुदृशां, कुसुमायुध-बाणपात-विव**शाना**म् ।

अभिवाञ्छितं वि**धा**तुं, कृतमतिरपि ता, जगाथ वाममि**व**॥ १ ॥

गगनगतं मुनि-निवहं, श्रावयितुं जगिथ कुलवधू-ध**र्म**म् ।

धर्म्यं खलु ते वच**नं**, कर्म तु नो, निर्मलस्य वि**श्वा**स्यम् ॥ २॥

आकर्ण्य ते प्रतीपां, वाणी-मेणी-दृशः परं दी**नाः** ।

मा मा करुणा-सि**न्धो**, परित्यजेत्, अतिचिरं विलेपु**स्ताः** ॥ ३॥

तासां रुदितैर्-लपितैः, करुणाकुल-मानसो मुरा**रे** त्वम् ।

ताभिः समं प्रवृ<u>त्तो</u>, यमुना-पुलिनेषु, काम-मभिर<u>न्तु</u>म् ॥ ४॥

चन्द्रकरस्-यन्दलसत् सुन्दरयमुना-तटान्त-वी<u>थी</u>षु ।

गोपीजनोत्तरी<u>यैर्</u>, आपादित-संस्त<u>रो</u> न्यषीदस्त्वम् ॥ ५॥

सुमधुरनर्मा-लपनैः, कर-संग्रहणैश्च चुम्बनोल्ला<u>सैः</u>

गाढालिङ्गन-स<u>ङ्गैः</u>, त्वमङ्गनालोक-माकु<u>ली</u>च-कृ<u>षे</u>॥ ६॥

वासोहरण-दिने, यद्वासोहरणं प्रतिश्रुतं ता<u>साम्</u> ।

तदपि विभो रसविवश-स्वा<u>न्ता</u>नां, कान्त-सुभ्रुवामद<u>धाः</u>॥ ७॥

कन्दलितधर्मलेशं, कुन्द-मृदुस्मेर-वक्र-पा<u>थो</u>जम् ।

नन्दसुत त्वां त्रिजगत्-सुन्दर<u>म्</u>, उपगूह्य नन्दि<u>ता</u> बा<u>लाः</u>॥ ८॥

विरहेष्-वङ्गारम<u>यः</u>, शृङ्गारमयश्च सङ्गमेऽहि त्व<u>म्</u>

नितराम अङ्गार-मयस्तत्र पु<u>नः</u>, सङ्गमेऽ<u>पि</u> चित्रमिद<u>म्</u>॥ ९ ॥

राधा-तुङ्ग-पयोधर, साधु-परीरम्भ-लोलुपात्-<u>मा</u>नम् ।

आराधये भव<u>न्तं</u>, पवनपुराधीश शमय सकलग<u>दा</u>न्॥१०॥ श्री हरये नमः।

इति रासक्रीडायां धर्मोपदेशवर्णनं क्रीडावर्णनं च षष्टषष्टितमदशकं समाप्तम्॥

### भगवतः तिरोधानं पुनःप्रातुर्भावः च

**Tune – Evam chaturdasa**

↓स्फुरत्परानन्द्-रसात्मके**न**, त्वया समासादित-भोगली**लाः**
असीम-मानन्द्-भरं प्रपन्ना, महान्त-मापुर्मद्-मम्बुजाक्ष्यः ॥ १ ॥

निलीयतेऽसौ मयि मय्यमायं, रमापतिर्-विश्व-मनोभिरामः।
इतिस्म स**र्वाः** कलिताभि-माना, निरीक्ष्य गोविन्द तिरोहितोऽभूः ॥ २॥

राधाभिधां तावदजात-ग**र्वाम्**, अतिप्रियां गोपवधूं मुरारे ।
भवानुपादाय गतो विदूरं, तया सह स्वैर-विहारकारी ॥ ३ ॥

तिरोहितेऽथ त्वयि जातता**पाः**, समं समेताः कमलायताक्ष्यः
वने वने त्वां परिमार्गयन्त्यो, विषादमापुर्-भगवन्नपारम् ॥४॥

हा चूत हा चम्पक कर्णिका**र्**, हा मल्लिके मालति बालवल्यः।
किं वीक्षितो नो हृदयैकचोर, इत्यादि तास्त्वत्-प्रवणा विलेपुः ॥ ५॥

निरीक्षितोऽयं सखि पङ्कजा**क्षः**, पुरो ममेत्याकुल-मालपन्ती ।
त्वां भावना-चक्षुषि वीक्ष्य काचित् , तापं सखीनां द्विगुणीचकार ॥ ६॥

त्वदात्मिकास्ता यमुनातटा**न्ते**, तवानु-चक्रुः किल चेष्टितानि
विचित्य भूयोऽपि तथैव मानात्, त्वया वियुक्तां ददृशुश्च राधाम् ॥ ७॥

ततः समं ता विपिने सम**न्ता**त्, तमोवतारावधि मार्ग-यन्त्यः
पुनर्-विमि**श्रा** यमुनातटान्ते, भृशं विलेपुश्च जगुर्-गुणांस्ते॥ ८॥

तथाव्यथा-सङ्कुल-मानसा**नां**, व्रजाङ्ग-नानां करुणैक-सिन्धो ।

जगत्त्रयीमोहन-मोहनात्मा, त्वं प्रादु-रासीरयि मन्दहासी॥ ९ ॥

सन्दिग्ध-सन्दर्शनमात्म-कान्त**म्**

त्वां वीक्ष्य तन्-व्यस्सहसा तदानीम् ।

किं किं न चक्रुः प्रणयादि-भारात्

स त्वं गदात्पालय मारुतेश ॥ १०॥ श्री हरये नमः।

इति रासक्रीडायां भगवतस्तिरोभा-ववर्णनं भगवन्वेषणवर्णनं भगवताविर्भाव-वर्णनं च सप्तषष्टितमदशकं समाप्तम्॥

## अष्ट षष्टितम दशकम् -68

---

## गोपिकानां परम आह्लादः

**Tune – Gopika gitam**

तव विलोकनाद् कृष्ण गोपिकाजनाः

प्रमद-सङ्कुलाः कृष्ण पङ्कजेक्षण ।

अमृतधारया कृष्ण सम्प्लुता इवः

स्तिमिततां दधुस् कृष्ण त्वत्-पुरोगताः ॥ १॥

तदनु काचन कृष्ण त्वत्-कराम्बुजम्

सपदि गृह्णती कृष्ण निर्-विशङ्कितम् ।

घनपयोधरे कृष्ण संविधाय सा

पुलकसंवृता कृष्ण तस्थुषी चिरम् ॥ २॥

तव विभो परा कृष्ण कोमळं भुजम्

निजगलान्तरे कृष्ण पर्यवेष्टयत् ।

गल-समुद्गतं कृष्ण प्राणमारुतम्

प्रति-निरुन्धती कृष्ण वाति-हर्षुला ॥ ३॥

अपगतत्रपा कृष्ण कापि कामिनी

तव मुखाम्बुजात् कृष्ण पूगचर्वितम् ।

प्रति-गृहय्य तद् कृष्ण वक्रपङ्कजे

निदधती गता कृष्ण पूर्ण-कामताम् ॥ ४॥

विकरुणो वने कृष्ण संविहाय माम्

अपगतोऽसि का कृष्ण त्वामिह स्पृशेत् ।

इति सरोषया कृष्ण ताव-देकया

सजल-लोचनं कृष्ण वीक्षितो भवान् ॥ ५॥

इति मुदाकुलैर् कृष्ण वल्लवीजनैः

सममुपागतो कृष्ण यामुने तटे ।

मृदुकुचाम्बरैः कृष्ण कल्पितासने

घुसृण-भासुरे कृष्ण पर्य-शोभथाः ॥ ६॥

कतिविधा कृपा कृष्ण केऽपि सर्वतो

धृत-दयोदयाः कृष्ण केचिदाश्रिते ।

कतिचिदी-दृशा कृष्ण मादृशेष्वपीति

अभिहितो भवान् कृष्ण वल्लवीजनैः ॥ ७॥

अयि कुमारिका कृष्ण नैव शङ्क्यताम्

कठिनता मयि कृष्ण प्रेमकातरे ।

मयि तु चेतसो कृष्ण वोऽनु-वृत्तये

कृतमिदं मयेत् कृष्ण ऊचिवान्-भवान् ॥ ८॥

अयि निशम्यतां कृष्ण जीव-वल्लभाः

प्रियतमो जनो कृष्ण नेदृशो मम ।

तदिह रम्यतां कृष्ण रम्य-यामिनीषु

वनुपरोमिति कृष्ण आलपो विभो ॥ ९॥

इति गिराधिकं कृष्ण मोद-मेदुरैः

व्रज-वधूजनैः कृष्ण साक-मारमन् ।

कलित-कौतुको कृष्ण रासखेलने

गुरुपुरीपते कृष्ण पाहि मां गदात् ॥ १०॥ श्री हरये नमः।

इति रासक्रीडायां आनन्द-पारवश्यवर्णनं भगवत्कृत सान्त्वना-वर्णनं च अष्टषष्टितमदशकं समाप्तम्

Contd

## रासक्रीडा

**Tune - Rasakrida**

केशपाश-धृत-पिञ्छिकावि-तति सञ्चलन्-मकर-कुण्डलम्

हारजालवन-मालिका-ललित-मङ्गरा-गघन-सौरभम्

पीतचेलधृत-काञ्चि-काञ्चितमु-दञ्चदं-शुमणि-नूपुरम्

रासकेलि-परिभूषितं तव हि रूपमीश कलयामहे॥१॥

तावदेव कृतमण्डने कलित-कञ्चुलीककुच-मण्डले

गण्डलोल-मणि-कुण्डले युवति-मण्डलेऽथ परिमण्डले ।

अन्तरा सकल-सुन्दरी-युगळ-मिन्दिरा-रमण सञ्चरन्

मञ्जुलां तदनु रास-केलिमयि कञ्जनाभ समु-पादधाः॥२॥

वासुदेव तव भासमानमिह रासकेळिरस-सौरभम्

दूरतोऽपि खलु नारदा-गदित-माकलय्य कुतुकाकुलाः ।

वेषभूषण-विलासपेशल-विलासिनी-शत-समावृता

नाकतो युगप-दागता वियति वेगतोऽथ सुरमण्डली ॥ ३॥

वेणुनाद-कृत-तान-दानकल-गानराग-गतियोजना

लोभनीय-मृदु-पाद-पातकृत-ताळमेलन-मनोहरम्

पाणि-संक्वणित-कङ्कणं च मुहुरं सलम्बित-कराम्बुजम्

श्रोणि-बिम्बचल-दम्बरं भजत रासकेलि-रस-डम्बरम् ॥ ४॥

श्रद्धया विरचि-तानुगानकृत-तारतार-मधुरस्वरे

नर्तनेऽथ ललिताङ्गहार-लुलिताङ्गहार-मणिभूषणे
सम्मदेन कृत-पुष्प-वर्षमल-मुन्मिषद्दि-विषदाङ्कुलम्
चिन्मये त्वयि निलीय-मानमिव संमु-मोह सव-धूकुलम् ॥५॥

स्विन्न-सन्नतनु-वल्लरी तदनु कापि नाम पशु-पाङ्गना
कान्तमं-समव-लम्बते स्म तव तान्ति-भारमुकु-ळेक्षणा
काचि-दाचलित-कुन्तला नव-पटीर-सारगन-सौरभम्
वञ्चनेन तव सञ्चु-चुम्ब भुज-मञ्चितोरु-पुल-काङ्कुरा ॥ ६॥

कापि गण्ड-भुवि सन्निधाय निज-गण्ड-माकुलित-कुण्डलम्
पुण्य-पूरनिधि-रन्ववाप तव पूगचर्वित-रसामृतम्
इन्दिरा-विहृति-मन्दिरं भुवन-सुन्दरं हि नट-नान्तरे
त्वाम-वाप्य दधु-रङ्गनाः किमु न सम्मदोन्मद-दशान्तरम् ॥७ ॥

गानमीश विरतं क्रमेण किल वाद्यमेलन-मुपारतम्
ब्रह्म-सम्मद-रसाकुलाः सदसि केवलं ननृतु-रङ्गनाः ।
नावि-दन्नपि च नीविकां किमपि कुन्तळीमपि च कञ्चुलीम्
ज्योतिषा-मपि कदम्बकं दिवि विळम्बितं किमपरं ब्रुवे ॥ ८॥

मोद-सीम्नि भुवनं विलाप्य विहृतिं समाप्य च ततो विभो
केलिसम्मृदित-निर्मलाङ्गनव-घर्मलेश-सुभ-गात्मनाम् ।
मन्मथा-सहन-चेतसां पशुप-योषितां सुकृत-चोदित
तावदा-कलित-मूर्तिरा-दधिथ मारवीर-परमोत्सवान् ॥ ९॥

केलिभेदपरि-लोलिता-भिरति-लालिता-भिरब-लालिभिः

स्वैरमीश ननु सूरजा-पयसि चारु नाम विहृतिं व्यधाः ।

काननेऽपि च विसारि-शीतळ-किशोर-मारुत-मनोहरे

सून-सौरभमये विलेसिथ विलासिनी-शत-विमोहनम् ॥ १० ॥

कामिनीरिति हि यामिनीषु खलु कामनीय-कनिधे भवान्

पूर्णसम्मद-रसार्णवं कमपि योगि-गम्य-मनु-भावयन् ।

ब्रह्म-शङ्कर-मुखान-पीह पशुपाङ्गनासु बहु-मानयन्

भक्त-लोक-गमनीय-रूप कमनीय कृष्ण परिपाहि माम् ॥ 3x श्री हरये नमः ।

इति रासक्रीडावर्णनं एकोनसप्ततितमदशकं समाप्तम् ॥

## सप्ततितम दशकम् -70

---

## सुदर्शन शाप मोक्षः, शङ्खचूड वधः अरिष्ट वधः च

**Tune - Bavantamaya**

इति त्वयि रसाकुलं, रमित-वल्लभे वल्लवाः

कदापि पुनरम्बिका, कमितु-रम्बिका-कानने ।

समेत्य भवता समं, निशि निषेव्य दिव्योत्सवम्

सुखं सुषुवु-रग्रसीद्, व्रजप-मुग्रनागस्तदा ॥ १ ॥

समुन्मुख-मथोन्मुकैर्, अभि-हतेऽपि तस्मिन्बलाद्

अमुञ्चति भवत्पदे, न्यपति पाहि पाहीति तैः ।

तदा खलु पदा भवान्, समुपगम्य पस्पर्श तम्

बभौ स च निजां तनुं, समुपसाद्य वैद्या-धरीम् ॥ २॥

सुदर्शनधर प्रभो, ननु सुदर्श-नाख्योऽस्म्यहम्

मुनीन्-क्वचिद्-पाहसं, त इह मां व्यधुर्-वाहसम् ।

भवत्पद्-समर्पणाद्, अमलतां गतोऽस्मीत्यसौ

स्तुवन्निज-पदं ययौ व्रजपदं च गोपा मुदा ॥ ३॥

कदापि खलु सीरिणा, विहरति त्वयि स्त्रीजनैः

जहारघन-दानुगः, स किल शङ्ख-चूडोऽबलाः ।

अतिद्रुत-मनुद्रुत-स्तवमथ मुक्त-नारीजनम्

रुरोजिथ शिरोमणिं, हलभृते च तस्या-ददाः ॥ ४॥

दिनेषु च सुहृज्जनैः, सह वनेषु लीलापरम्

मनोभव-मनोहरं, रसित-वेणुनादा-मृतम् ।

भवन्त-ममरी-दृशाम् , अमृतपारणा-दायिनम्

विचिन्त्य किमु नालपन्, विरह-तापिता गोपिकाः ॥ ५ ॥

**Tune - Mokshabdi**

भोजराजभृत-कस्त्वथ कश्चित्, कष्टदुष्ट-पथदृष्टिररिष्टः

निष्ठुराकृतिरपष्ठुनिनादः, तिष्ठते स्म भवते वृषरूपी ॥ ६ ॥

शाक्-वरोऽथ जगती-धृतिहारी, मूर्तिमेष बृहतीं प्रदधानः

पङ्क्तिमाशु परिघूर्ण्य पशूनां, छन्दसां निधिम-वाप भवन्तम्॥

तुङ्ग-श्रृङ्ग-मुख-माश्वभियन्तं, संगृहैय्य रभसादभियं तम्

भद्र-रूपमपि दैत्यम-भद्रं, मर्दयन्न-मदयः सुर-लोकम्॥८ ॥

चित्रमद्य भगवन् वृषघातात्, सुस्थिराजनि वृषस्थिति-रुर्व्याम्

वर्धते च वृषचेतसि भूयान् , मोद इत्यभिनुतोऽसि सुरैस्त्वम्॥ ९॥

औक्षकाणि परिधावत दूरं, वीक्ष्यतामय-मिहोक्ष-विभेदी ।

इत्थमात्त-हसितैः सह गोपैः, गेह-गस्त्वमव वातपुरेश॥१०॥ श्री हरये नमः।

इति सुदर्शन-शापमोक्षवर्णनं शङ्खचूडवध-वर्णनं वृषभासुरवध-वर्णनं च् सप्ततितमदशकं समाप्तम्॥

**एक सप्ततितम दशकम् -71**

---

## केशी वधः,व्योमासुर वधः च

**Tune – Evam chaturdasa**

↓यत्नेषु सर्-वेष्वपि नावके**शी**, केशी स भोजे-शितुरिष्टबन्धुः

त्वं सिन्धुजावाप्य इतीव म**त्वा**, सम्प्राप्तवान्-सिन्धुजवाजिरूपः॥ १॥

गन्धर्वतामेष गतोऽपि रू**क्षैः**, नादैः समुद्-वेजित-सर्वलोकः

भवद्विलो**का**वधि गोपवाटीं, प्रमर्द्य पापः पुनरा पतत्-त्वाम् ॥२ ॥

तार्-क्ष्यार्-पिताङ्घ्रेस्तव तार्क्ष्य ए**ष**, चिक्षेप वक्षोभुवि नाम पादम् ।

भृगोः पदाघातकथां निशम्य, स्वेनापि शक्यं, तदितीव मोहात्॥

प्रवञ्चयन्नस्य खुराञ्चलं **द्राद्**, अमुं च विक्षेपिथ दूरदूरम् ।

संमूर्छितोऽपि-हतिमूर्छितेन, क्रोधोष्मणा खादितुमाद्रु-तस्त्वाम् ॥ ४ ॥

त्वं वाहदण्डे कृतधीश्च बा<u>ह्वा</u>, दण्डं-न्यधास्तस्य मुखे तदानीम् ।

तद्-वृद्धिरुद्ध-श्वसनो गतासुः, सप्तीभवन्नप्य-यमैक्यमागात् ॥

आलम्भमात्रेण पशोः सुरा<u>णां</u>, प्रसादके नूत्न इवाश्वमेधे ।

कृते त्वया हर्षवशात्-सुरेन्द्राः, त्वाम् तुष्टुवुः केशवनामधेयम् ॥

कंसाय ते शौरिसुतत्व-मु<u>क्त्वा</u>, तं तद्वधोत्कं प्रतिरुध्य वाचा ।

प्राप्तेन केशिक्षपणावसाने, श्रीनारदेन त्वमभिष्टुतोऽभूः ॥ ७ ॥

कदापि गोपैः सह कानना<u>न्ते</u>, निलायनक्रीडन-लोलुपं त्वाम्

मयात्मजः प्राप दुरन्तमायो, व्योमाभिधो व्योमचरो-पयोधी ॥

स चोरपालायित-वल्लवे<u>षु</u>, चोरायितो गोपशिशून्-पशूंश्च ।

गुहासु कृत्वा पिदधे शिलाभिः, त्वया च बुद्ध्वा परिमर्दितोऽभूत् ॥

एवंविधैश्चाद्भुत-केलिभे<u>दैः</u>, आनन्द-मू<u>र्छा</u>मतुलां व्रजस्य ।

पदे पदे नूतनयन्नसीमं, परात्मरूपिन् पवनेशपायाः ॥ श्री हरये नमः ।

इति केशिमथन-वर्णनं व्योमवध-वर्णनं च एकसप्ततितमदशकं समाप्तम् ॥

## अक्रूर आगमनम्

**Tune – Evam chaturdasa**

कंसोऽथ नारदगिरा व्रज-वासिनं **त्वा**म्

आकर्ण्य दीर्ण-हृदयः स हि गान्दिनेयम् ।

आहूय कार्मुक-मखच्छलतो भवन्तम्

आनेतुमेन-महिनोदहिनाथ-शायिन् ॥ १॥

अक्रूर एष भवदङ्घ्रि-परश्चिरा**य**

त्वद्दर्शनाक्षम-मनाः क्षितिपालभीत्या ।

तस्याज्ञयैव पुनरीक्षितु-मुद्यतस्त्वाम्

आनन्दभार-मतिभूरितरं बभार ॥ २॥

सोऽयं रथेन सुकृती भवतो निवासम्

गच्छन्मनोरथ-गणांस्त्वयि धार्यमाणान् ।

आस्वादयन्-मुहुरपाय-भयेन दैवम्

सम्प्रार्थयन्पथि न किञ्चिदपि व्यजानात् ॥ ३॥

द्रक्ष्यामि वेदशतगीत-गतिं पुमांसम्

स्प्रक्ष्यामि किंस्विदपिनाम परिष्वजेयम् ।

किं वक्ष्यते स खलु मां क्वनु वीक्षितः स्याद्

इत्थं निनाय स भवन्मयमेव मार्गम् ॥ ४॥

भूयः क्रमाद्-भिविशन्-भवदङ्घ्रि-पूत**म्**

बृन्दावनं हरविरिञ्च-सुराभिवन्द्यम् ।

आनन्द-मग्न इव लग्न इव प्रमोहे

किं किं दशान्तरमवाप न पङ्कजाक्ष ॥ ५॥

पश्यन्न-वन्दत भवद्-विहृति-स्थलानि

पांसुष्व-वेष्टत भवच्चरणाङ्कितेषु ।

किं ब्रूमहे बहुजना हि तदापि जाता

एवं तु भक्ति-तरला विरलाः परात्मन् ॥ ६॥

सायं स गोप-भवनानि भवच्चरित्र

गीतामृत-प्रसृत-कर्ण-रसायनानि ।

पश्यन्प्रमोद-सरिदेव किलोह्यमानो

गच्छन्-भवद्-भवन सन्निधि-मन्वयासीत् ॥ ७॥

तावद्-ददर्श पशुदोह-विलोक-लोलम्

भक्तोत्त-मागतिमिव प्रति-पालयन्तम् ।

भूमन् भवन्तमयमग्र-जवन्त-मन्तः

ब्रह्मानुभूति-रससिन्धु-मिवोद्वमन्तम् ॥ ८॥

सायन्तनाप्लव-विशेष-विविक्तगात्रौ

द्वौ पीतनील-रुचिराम्बर-लोभनीयौ ।

नाति-प्रपञ्चधृत-भूषणचारुवेषौ

मन्दस्मितार्-द्रवदनौ स युवां ददर्श ॥ ९ ॥

दूराद्रथात्सम-वरुह्य नमन्तमेनम्

उत्थाप्य भक्तकुल-मौलिमथोप-गूहन् ।

हर्षान्मिताक्षर-गिरा कुशलानु-योगी

पाणिं प्रगृह्य सबलोऽथ गृहं निनेथ ॥ १०॥

नन्देन साकममितादर-मर्चयि<u>त्वा</u>

तं यादवं तदुदितां निशमय्य वार्ताम् ।

गोपेषु भूपतिनिदेशकथां निवेद्य

नानाकथाभिरिह तेन निशामनैषीः ॥ ११॥

चन्द्रागृहे किमुत चन्द्रभगागृहे <u>नु</u>

राधागृहे नु भवने किमु मैत्रविन्दे ।

धूर्त्तो विलम्बत इति प्रमदाभिरुच्चैः

आशङ्कितो निशि मरुत्पुरनाथ पायाः ॥ १२॥ श्री हरये नमः।

इति अक्रूरागमन-वर्णनं द्विसप्ततितमदशकं समाप्तम्॥

**त्रिसप्ततितम दशकम् -73**

---

## भगवतः मथुरापुर यात्रा

**<u>Tune - Kalyatam</u>**

निशमय्य तवाथ यानवा<u>र्तां</u>, भृशमार्ताः पशुपालबालिकास्ताः

किमिदं किमिदं कथन्विती<u>माः</u>, समवेताः परिदेवितान्य-कुर्वन् ॥

करुणा-निधिरेषु नन्दसू<u>नुः</u>, कथमस्मान्-विसृजे-दनन्यनाथाः

बत नः किमु दैवमेवमासीद् , इति तास्त्वद्-गतमानसा विलेपुः ॥ २ ॥

चरम-प्रहरे प्रतिष्ठमा<u>**नः**</u>, सह पित्रा निजमित्र-मण्डलैश्च ।
परितापभरं नितम्बिनी<u>**नां**</u>, शमयिष्यन् व्यमुचस्सखायमेकम् ॥

अचिरा-दुपयामि सन्निधिं <u>**वो**</u>, भविता साधु मयैव सङ्गमश्रीः ।
अमृताम्-बुनिधौ निमज्जयि<u>**ष्ये**</u>, द्रुतमित्याश्वसिता वधूरकार्षीः ॥

सविषाद-भरं सयाञ्च-मु<u>**च्चैः**</u>, अति-दूरं वनिता-भिरीक्ष्य-माणः
मृदु तद्दिशि पातयन्न-पा<u>**ङ्गा**</u>न्, सबलोऽक्रूर-रथेन निर्गतोऽभूः ॥

अनसा बहुलेन वल्लवा<u>**नां**</u>, मनसा चानुगतोऽथ वल्लभानाम्
वनमार्तमृगं विषण्ण-वृक्षं, समतीतो  यमुनातटी-मयासीः ॥

नियमाय निमज्य वारिणि त्वाम्, अभि-वीक्ष्याथ रथेऽपि गान्दिनेयः ।
विवशोऽजनि किन्विदं विभोस्ते, ननु चित्रं त्वव-लोकनं समन्तात् ॥७ ॥

पुनरेष निमज्य पुण्यशाली, पुरुषं त्वां परमं भुजङ्गभोगे ।
अरिकम्बु-गदाम्बुजैः स्फुरन्तं, सुरसिद्धौघपरीतमालु-लोके॥ ८ ॥

स तदा परमात्म-सौख्यसिन्धौ, विनिमग्नः प्रणुवन्प्रकार-भेदैः
अविलोक्य पुनश्च हर्षसिन्धोः,अनुवृत्या पुलकावृतो ययौत्वाम्

किमु शीतलिमा महान्जलेयत् ,पुलकोऽसाविति चोदितेनतेन
अतिहर्ष-निरुत्तरेण सार्धं, रथवासी पवनेश पाहि मां त्वम् ॥ श्री हरये नमः।

इति मथुरापुरयात्रावर्णनं त्रिसप्ततिमदशकं समाप्तम्॥

## भगवतः मधुरापुरी प्रवेशः

**Tune - Sandra**

सम्प्राप्तो मथुरां दिनार्ध-विगमे, तत्रान्त-रस्मिन्वसन्
आरामे विहिताशनः सखिजनैर्, यातः पुरीमीक्षितुम्
प्रापो राजपथं चिरश्रुतिधृत, व्यालोक-कौतूहल
स्त्रीपुंसोद्यद-गण्यपुण्य-निगडैर्, आकृष्यमाणो नु किम्॥ १॥

त्वत्पादद्-दुतिवत्सराग-सुभगाः, त्वन्मूर्ति-वद्योषितः
सम्प्राप्ता विलसत्-पयोधररुचो, लोला भवद्-दृष्टिवत् ।
हारिण्यस्-त्वदुरस्स्थली-वदयि ते, मन्दस्मित-प्रौढिवन्
नैर्मल्योल्लसिताः कचौघ-रुचिवद्, राजत्कलापाश्रिताः॥ २॥

तासामा-कलयन्नपाङ्ग-वलनैर्, मोदं प्रहर्षाद्-भुत
व्यालोलेषु जनेषु तत्र रजकं, कञ्चित्पटीं प्रार्थयन् ।
कस्ते दास्यति राजकीयवसनं, याहीति तेनोदितः
सद्यस्तस्य करेण शीर्षम-हृथाः, सोऽप्याप पुण्यां गतिम्॥

भूयो वायकमेकमायत-मतिं, तोषेण वेषोचितम्
दाश्वांसं स्वपदं निनेथ सुकृतं, को वेद जीवात्मनाम्
मालाभिः स्तबकैः स्तवैरपि पुनर् , मालाकृता मानितो
भक्तिं तेन वृतां दिदेशिथ परां, लक्ष्मीं च लक्ष्मीपते ॥ ४॥

कुब्जामब्ज-विलोचनां पथि पुनर्, दृष्ट्वाङ्ग-रागे तया

दत्ते साधु किलाङ्ग-रागमददाः, तस्या महान्तं हृदि ।
चित्तस्था-मृजुतामथ प्रथयितुं, गा<u>त्रेऽ</u>पि तस्याः स्फुटम्
गृह्णन्मञ्जु करेण तामुदनयः, तावज्जगत्-सुन्द<u>री</u>म् ॥ ५॥

तावन्निश्चित-वैभवास्तव विभो, नात्यन्तपापा ज<u>ना</u>
यत्किञ्चिद्-ददते स्म शक्त्यनुगुणं, ताम्बूल-माल्यादिकम् ।
गृह्णानः कुसुमादि किञ्चन तदा, मार्गे निबद्धाञ्जलिः
नातिष्ठं बतहायतोऽद्य विपुलाम्, आर्तिं व्रजामि प्र<u>भो</u>॥ ६ ॥

एष्यामितिविमुक्त-यापि भगवन्, आ<u>ले</u>पदात्र्या त<u>या</u>
दूरात्कातरया निरीक्षितगतिः, त्वं प्राविशो गोपुरम् ।
आघोषानुमितत्वदागम-महा, हर्षोल्लद्-देवकी
वक्षोज-प्रगलत्पयोरस-मिषात्, त्वत्कीर्ति-रन्तर्ग<u>ता</u> ॥ ७॥

आविष्टो नगरीं, महोत्सववतीं, कोदण्ड-शालां व्रजन्
माधुर्-येण नु तेजसा नु पुरुषैर्, दूरेण दत्तान्तरः ।
स्रग्भिर्-भूषितमर्चितं वरधनुर्, मा<u>मे</u>ति वादात्पुरः
प्रागृह्णाः समरोपयः किल समाक्राङ्-क्षीर-भाङ्-क्षीरपि॥

श्वः कंसक्षपणोत्-सवस्य पुरतः, प्रारम्भ-तूर्योपमः
चापध्वंस-महाध्वनिस्तव विभो, देवान-रोमाञ्च<u>य</u>त्
कंसस्यापि च वेपथुस्त-दुदितः, कोदण्डखण्ड द्वयी
चण्डाभ्याहत-रक्षिपूरुषरवैः, उरुत्कूलितोऽभूत्-त्वया॥ ९॥

शिष्टैर्-दुष्टजनैश्च दृष्टमहिमा, प्री<u>त्या</u> च भीत्या ततः

सम्पश्यन्पुर-सम्पदं प्रविचरन्, सायं गतो वाटि<u>का</u>म् ।

श्रीदाम्ना सह राधिकाविरहजं, खे<u>दं</u> वदन्प्रस्वपन्

आनन्दन्नवतारकार्य-घटनाद् ,वातेश संरक्ष माम् ॥ १०॥ श्री हरये नमः।

इति भगवतो थुरापुरीप्रवेश-राजकनिग्रह-वायकमालाकार-कुब्जानुग्रह-धनुर्भङ्गादि-वर्णनं चतुस्सप्ततिमदशकं समाप्तम्॥

## पञ्च सप्ततितम दशकम् -75

## कंस वधः

<u>**Tune - Sandra**</u>

प्रातः सन्त्रस्त, भोजक्षितिपति-वचसा, प्रस्तु<u>ते</u> मल्ल<u>तू</u>र्ये

सङ्घे राज्ञां च मञ्चान् अभियुषि गते, नन्दगो<u>पेऽ</u>पि हर्म्यम्

कंसे सौधाधिरूढे, त्वमपि सहबलः, सानुगश्चारुवे<u>षो</u>

रङ्ग-द्वारं गतोऽभूः, कुपित-कुवलयापीडना<u>गा</u>व-<u>ली</u>ढम् ॥ १॥

पापि<u>ष्ठा</u>पेहि मार्गाद्, द्रुतमिति वचसा, निष्ठुरक्रुद्ध-बु<u>द्धेः</u>

अम्बष्ठस्य प्रणो<u>दाद्</u> , अधिकजवजुषा, हस्ति<u>ना</u> गृह्यमाणः

केलीमुक्तोऽथ गोपीकुचकलश, चिरस्पर्धि<u>नं</u> कुम्भमस्य

व्याहत्यालीय<u>था</u>स्-त्वम्, चरणभुवि पुनर्, निर्ग<u>तो</u>वल्गु<u>हा</u>सी॥

हस्तप्राप्योऽप्य-गम्यो, झटिति मुनि जनस्येव धाव<u>न्</u>गजेन्द्रम्

क्रीडन्नापात्य भूमौ, पुनरभिपततः, तस्य द<u>न्तं</u> स<u>जी</u>वम् ।

मूलादुन्मूल्य, तन्मूलगमहितमहा, मौक्तिकान्यात्ममित्रे
प्रादास्-त्वम्हारमेभिर्, ललितविरचितं, राधिकायैदिशेति॥

गृह्णानं दन्तमंसे, युतमथ हलिना, रङ्गमङ्गाविशन्तम्
त्वां मङ्गल्याङ्ग, भङ्गीरभसहृत, मनो लोचना वीक्ष्य लोकाः ।
हंहो धन्यो नु नन्दो, नहि नहि पशुपालाङ्गना नो यशोदा
नो नो धन्येक्षणाः स्मस् त्रिजगति, वयमेवेति, सर्वे शशंसुः॥

पूर्णं ब्रह्मैव साक्षान् , निरवधिपरमानन्द सान्द्र-प्रकाशम्
गोपेषु त्वं व्यलासीर्, नखलु बहुजनैः, तावदावेदितोऽभूः ।
दृष्ट्वाथ त्वां तदेदं, प्रथममुपगते, पुण्यकाले जनौघाः
पूर्णनन्दा विपापाः, सरसमभिजगुः त्वत्-कृतानि स्मृतानि ॥

चाणूरो मल्लवीरः, तदनु नृपगिरा, मुष्टिको मुष्टि-शाली
त्वां रामं चाभिपेदे, झटझटिति मिथो, मुष्टिपातातिरूक्षम् ।
उत्पाता-पातनाकर्षण, विविधरणान् , आसतां तत्र चित्रम्
मृत्योः प्रागेव, मल्लप्रभुरग-मदयं, भूरिशो बन्धमोक्षान् ॥ ६॥

हा धिक्कष्टं कुमारौ, सुललितवपुषौ, मल्लवीरौ कठोरौ
न द्रक्ष्यामो व्रजामः, त्वरितमिति जने, भाषमाणे तदानीम् ।
चाणूरं तं करोद्-भ्रामण, विगलदसुं, पोथयामासिथोर्व्याम्
पिष्टोऽभून्-मुष्टिकोऽपि, द्रुतमथ हलिना, नष्टशिष्टैर्-दधावे॥

कंसस्-सम्वार्य तूर्यं, खलमतिर्-विदन्,कार्यमार्यान् पितृंस्तान्

आहन्तुं व्याप्तमूर्तैः, तव च समशिषद्, दूरमुत्सारणाय ।

रुष्टो दुष्टोक्ति-भिस्त्वं, गरुड इव गिरिं, मञ्च-मञ्चन्नुदञ्चत्

खङ्ग-व्यावद्-गदुस् संग्रहमपि च हठात् प्राग्रहीरौग्रसेनिम्॥

सद्यो निष्पिष्ट-सन्धिं, भुवि नरपतिमापात्य, तस्योपरिष्टात्

त्वय्यापात्ये तदैव, त्वदुपरि पतिता, नाकिनां पुष्पवृष्टिः ।

किं किं ब्रूमस्तदानीं, सततमपि भिया, त्वद्गतात्मा स भेजे

सायुज्यं त्वद्-वधोत्था, परम परमियं, वासना कालनेमेः॥ ९॥

तद्-भ्रातृनष्ट पिष्ट्वा, द्रुतमथ पितरौ, सन्नमन्नुग्रसेनम्

कृत्वा राजानमुच्चैर्, यदुकुलमखिलं, मोदयन्कामदानैः ।

भक्तानामुत्तमम् चोद्धवम्, अमरगुरोर् आप्तनीतिं सखायम्

लब्ध्वा तुष्टो नगर्यां, पवनपुरपते, रुन्धि मे सर्वरोगान् ॥ १० श्री हरये नमः।

इति कम्सवधवर्णनं पञ्चसप्ततितमदशकं समाप्तम्॥

## षट् सप्ततितम दशकम् -76

---

## उद्धव दूत्यम्

**Tune - Sandra**

गत्वा सान्दीपनिमथ, चतुष्षष्टि-मात्रैरहोभिः

सर्वज्ञस्त्वं, सह मुसलिना, सर्वविद्यां गृहीत्वा ।

पुत्रं नष्टं यमनिलयनाद्, आहृतं दक्षिणार्थम्

दत्वा तस्मै निजपुरमगा, नादयन्-पाञ्चजन्यम् ॥

स्मृत्वा स्मृत्वा पशु-पसुदृशः, प्रेमभार-प्रणु**न्नाः**

कारुण्येन **त्वमपि विवशः**, प्राहि**णो**रुद्धवं तम् ।

किञ्चामुष्मै परम-सुहृदे, भक्तवर्याय ता**सा**म्

भक्त्यु-द्रेकं **सकल-भुवने**, दुर्ल**भं** दर्शयि**ष्य**न् ॥ २॥

त्वन्माहात्म्य, प्रथिमपिशुनं, गोकु**लं** प्राप्य सायम्

त्वद्-वार्ताभिर्-**बहु स रमया**, मास न**न्दं** य**शो**दाम्

प्रातर्-दृष्ट्वा मणिमयरथं, शङ्कि**ताः** पङ्कजाक्ष्यः

श्रुत्वा प्राप्तं **भवदनुचरं**, त्यक्तका**र्याः** स**मी**युः ॥ ३॥

दृष्ट्वा चैनं त्वदुपमलसद्, वेष-भू**षा**भिरामम्

स्मृत्वा स्मृत्वा **तव विलसितान्**, उच्च**कै**स्तानि **ता**नि ।

रुद्धालापाः कथमपि पुनर्, गद्ग**दां** वाचमू**चुः**

सौजन्यादीन्-**निजपरभिदाम्**, आप्य**लं** विस्मर**न्त्यः** ॥४॥

श्रीमन् किं त्वं पितृ-जनकृते, प्रेषि**तो** निर्द**ये**न

क्वासौ कान्तो **नगर-सुदृशां**, हा ह**रे** नाथ पा**याः** ।

आश्लेषाणाम् अमृत-वपुषो, हन्त **ते** चुम्ब**ना**नाम्

उन्मादानां **कुहकवचसां**, विस्म**रे**त्कान्त **का** वा ॥

रासक्री**डा**-लुलित-ललितं, विश्लथत्-केशपाशम्

मन्दोद्-भिन्न-**श्रम-जलकणं**, लोभनी**यं** त्वद**ङ्ग**म् ।

कारुण्याब्धे सकृदपि समा, लिङ्गि**तुं** दर्श**ये**ति

प्रेमोन्मादाद्-**भुवन-मदन**, त्वत्-प्रिया**स्त्वां** विले**पुः** ॥

एवम्प्रा**यै**र्-विवश-वचनैर्, आकु**ला** गोपिका**स्ताः**
त्वत्-सन्दे**शैः** **प्रकृति-मनयत्**, सोऽथ वि**ज्ञा**नग**र्भैः** ।
भूयत्साभिर्-मुदितमतिभिः, त्वन्मयीभिर्-वधूभिः
तत्-तद्वार्ता-**सरस-मनयत्**, कानि-चि**द्**-वास**रा**णि ॥ ७॥

त्वत्प्रोद्-गा**णैः** सहितमनिशं, सर्व**तो** गेहकृत्यम्
त्वद्-वार्-तैव, **प्रसरति मिथः**, सैव चो**त्स्वा**पला**पाः** ।
चेष्टाः प्रायशः, त्वदनुकृतयः, त्वन्म**यं** सर्व**मे**वम्
दृष्ट्वा तत्र, **व्यमुह-दधिकं**, विस्म**या**-दुद्ध**वोऽ**यम् ॥ ८ ॥

राधाया मे प्रियतममिदं, मत्प्रियै**वं** ब्रवीति
त्वं किं मौनं, **कलयसि सखे**, मानिनी मत्प्रि**ये**व ।
इत्याद्येव प्रवदति सखि, त्वत्प्रि**यो**, निर्जने **मा**म्
इत्थंवादैर्, **अरमयदयं** त्वत्प्रि**या**-मुत्प**ला**क्षीम् ॥ ९ ॥

एष्यामि द्राग् अनु-पगमनं, केव**लं** कार्य**भा**राद्
विश्लेषेऽपि, **स्मरण-दृढता**, सम्भ**वा**न्मास्तु खे**दः** ।
ब्रह्मानन्दे, मिलति नचिरात्, सङ्ग**मो** वा वियो**गः**
तुल्यो वः स्याद्, **इति तव गिरा**, सोऽक**रो**न्निर्-व्य**था**स्ताः॥

एवं भक्तिः सकलभुवने, नेक्षि**ता** न श्रु**ता** वा
किं शास्त्रौघैः, **किमिह तपसा** गोपिका**भ्यो** न**मो**ऽस्तु ।
इत्यानन्दाकुल-मुपगतं, गोकु**ला**-दुद्ध**वं** तम्
दृष्ट्वा हृ**ष्टो**, **गुरुपुरपते**, पाहि**माम्** माम**यौ**घात् ॥ ११ ॥ श्री हरये नमः।

इति उद्धवदौत्यवर्णनं षट्सप्ततितमदशकं समाप्तम्॥

## सप्त सप्ततितम दशकम् -77

## उपश्लोक उत्पत्तिः जरासन्धादि युद्धम् च

**Tune - Kalyatham**

सैरन्-ध्र्यास् तदनु चिरं स्मरातुरा**या**

यातोऽभूः सुललित-मुद्धवेन सार्धम् ।

आवासं त्वदुपगमोत्सवं सदैव

ध्यायन्त्याः प्रतिदिनवास-सज्जिका**याः** ॥ १॥

**Tune – Thathanu nandana**

उपगते त्वयि पूर्णमनोरथाम्

प्रमदसम्भ्रम-कम्प्रपयो-धराम् ।

विविधमान-नमा-दधतीं मुदा

रहसि तां रमयाञ्च-कृषे सुखम् ॥ २॥

**Tune – Evam chaturdasa**

पृष्टा वरं पुनरसाववृणोद्-वरा**की**

भूयस्-त्वया सुरतमेव निशान्तरेषु ।

सायुज्यमस्-त्विति वदेत् बुध एव कामम्

सामीप्यमस्-त्वनिशं-मित्यपि नाब्रवीत्-किम् ॥ ३ ॥

**Tune – Evam chaturdasa**

ततो भवान्देव निशासु कासुचि**न्**

मृगीदृशं तां निभृतं विनोदयन् ।

अदा-दुपश्लोक इति श्रुतं सुतम्

स नारदात्-सात्वत-तन्त्र-विद्-बिभौ ॥ ४॥

अक्रूर-मन्दिरमितोऽथ बलोद्ध-वा**भ्याम्**

अभ्यर्चितो बहु नुतो, मुदितेन तेन ।

एनं विसृज्य विपिना, गतपाण्डवेय

वृत्तं विवेदिथ तथा धृतराष्ट्रचेष्टाम् ॥ ५॥

**Tune - sandra**

विघाताज्जामातुः, परमसुहृदो, भोजनृप**तेः**

जरासन्धे रु**न्धत्**, अनवधि-रुषान्धेऽथ मथु**राम्** ।

रथाद्यैर्-द्योलब्धैः, कतिपयबल**स्त्वं** बलयु**तः**

त्रयोविंशत्-यक्षौहि**णि**, तदुप**नी**तं समह**थाः** ॥ ६॥

**Tune – Evam chaturdasa**

बद्धं बलादथ बलेन बलोत्तरं त्व**म्**

भूयो बलोद्यमरसेन मुमोचिथैनम् ।

निश्शेषदिग्जय-समाहृत-विश्वसैन्यात्

कोऽन्यस्ततो हि बलपौरुषवांस्त-दानीम् ॥ ७॥

भग्नस्स लग्न-हृदयोऽपि नृपैः प्रणु**न्नो**

युद्धं त्वया व्यधित षोडशकृत्व एवम् ।

अक्षौहिणीः शिव शिवास्य जघन्थ विष्णो

सम्भूय सैकनवति-त्रिशतं तदानीम् ॥ ८॥

अष्टादशेऽस्य समरे समुपेयुषि त्व<u>**म्**</u>

दृष्ट्वा पुरोऽथ यवनं यवन-त्रिकोट्या ।

त्वष्ट्रा विधाप्य पुरमाशु पयोधिमध्ये

तत्राथ योगबलतः स्वजनाननैषीः ॥ ९॥

**<u>Tune - Sandra</u>**

पद्-भ्यां त्वं पद्ममाली, चकितयिव पुरान्, निर्ग<u>**तो**</u> धाव<u>**मा**</u>नो

म्लेच्छे-शेनानु<u>**या**</u>तो, वधसुकृतविहीनेन, शै<u>**ले**</u> न्य<u>**लै**</u>षीः

सुप्तेनाङ्-घ्र्याहतेन, द्रुतमथ मुचुकुन्देन, भ<u>**स्मी**</u>कृतेऽस्मिन्

भूपायास्मै गुहान्ते, सुललित-वपुषा, तस्थि<u>**षे**</u> भक्ति<u>**भा**</u>जे॥

ऐक्ष्वाकोऽहं विरक्तोऽमि, अखिलनृपसुखे, त्वत्प्रसा<u>**दै**</u>क-काङ्क्षी

हा देवेति स्तुवन्तं, वरविततिषु तं, निस्पृहं वीक्ष्य <u>**हृ**</u>ष्यन्

मुक्तेस्तुल्यां च भक्तिं, धुतसकलमलां, मोक्षम<u>**प्या**</u>शु द<u>**त्वा**</u>

कार्यं हिंसाविशु<u>**द्ध्यै**</u>, तप इति च तदा, प्रास्थ लोकप्र<u>**ती**</u>त्यै ॥

तदनु मथुरां गत्वा, ह<u>**त्वा**</u> चमूं यवना<u>**हृता**</u>म्

मगधपतिना <u>**मा**</u>र्गे, सैन्यैः पुरेव निवारितः ।

चरमविजयं दर्पायास्मै, प्रदाय पलायि<u>**तो**</u>

जलधिनगरीं <u>**या**</u>तो, वातालयेश्वर पाहि<u>**मा**</u>म्॥ १२॥ श्री हरये नमः।

इति उपश्लोकोत्पत्ति-वर्णनं जरासन्धादि-युद्धवर्णनं मुचुकुन्दानुग्रह-वर्णनं सप्तसप्ततितमदशकं समाप्तम्

## द्वारका वासः रुक्मिणी सन्देश प्राप्तिः च

**78 & 79 Rukmini Kalyanam – Continuous Recitation**

**Tune – thathanu nandana**

त्रिदशवर्धकि-वर्धितकौश**लं**, त्रिदशदत्त-समस्तविभूतिमत् ।

जलधिमध्यगतं त्वमभूष**यो**, नवपुरं वपुरञ्चितरोचिषा ॥ १॥

ददुषिरेवतभूभृति रेव**तीं**, हलभृते तनयां विधिशासनात् ।

महितमुत्सव-घोषमपूपुषः, समुदितैर्-मुदितैः सह यादवैः॥२॥

अथ विदर्-भसुतां खलु रुक्मि**णीं**, प्रणयिनीं त्वयि देव सहोदरः ।

स्वयमदित्सत चेदिमहीभु**जे**, स्वतमसा तमसाधुमुपाश्रयन्॥ ३॥

चिरधृतप्रणया त्वयि बालिका, सपदि काङ्क्षित-भङ्गसमाकुला

तव निवेदयितुं द्विजमादिशत्, स्वकदनं कदनङ्गविनिर्-मितम् ॥

द्विजसुतोऽपि च तूर्णमुपाययौ, तव पुरं हि दुराशदुरासदम् ।

मुदमवाप च सादरपूजितः, स भवता भवतापहृता स्वयम्॥५॥

स च भवन्तमवोचत कुण्डिने, नृपसुता खलु राजति रुक्मिणी

त्वयि समुत्सुकया निजधीरता, रहितया हि तया प्रहितोऽस्म्यहम् ॥

तव हृतास्मि पुरैव गुणैरहं, हरति मां किल चेदिनृपोऽधुना ।

अयि कृपालय पालय मामिति, प्रजगदे जगदेकपते तया॥ ७ ॥

अशरणां यदि मां त्वमुपेक्षसे, सपदि जीवितमेव जहाम्यहम्

इति गिरा सुतनोरतनोद्-भृशं, सुहृदयं हृदयं तव कातरम्॥८॥

अकथयस्-त्वमथैनमये सखे, तदधिका मम मन्मथवेदना ।

नृपसमक्षमुपेत्य हराम्यहं, तदयि तां दयितामसितेक्षणाम् ॥९॥

प्रमुदितेन च तेन समं तदा, रथगतो लघु कुण्डिनमेयिवान् ।

गुरुमरुत्पुरनायक मे भवान्,वितनुतां तनुताम् निखिलापदाम्॥ श्री हरये नमः।

इति रुक्मिणिस्वयम्वरं अष्टसप्ततितमदशकं समाप्तम्॥

**Cont**

## एकोनाशीतितम दशकम् -79

---

## रुक्मिणी हरणम्

**Tune – Thathanu nandana**

बलसमेत-बलानुगतो भ**वान्** , पुरमगाहत भीष्मकमानि**तः** ।

द्विजसुतं त्वदुपागमवादि**नं**, धृतरसा तरसा प्रणनाम सा ॥ १॥

भुवनकान्तमवेक्ष्य भवद्-वपुः, नृपसुतस्य निशम्य च चेष्टितम्

विपुलखेदजुषां पुरवासि**नां**, सरुदितै-रुदितैरगमन्निशा॥ २॥

तदनु वन्दितुमिन्दुमुखी शिवां, विहितमङ्गळ-भूषणभासुरा ।

निरगमद्-भवदर्पितजीविता, स्वपुरतः पुरतः सुभटावृता॥ ३॥

कुलवधूभिरुपेत्य कुमारि**का**, गिरिसुतां परिपूज्य च सादरम् ।

मुहुरयाचत तत्पदपङ्क**जे**, निपतिता पतितां तव केवलम् ॥ ४॥

समवलोक कुतूहलसङ्कु**ले**, नृपकुले निभृतं त्वयि च स्थिते ।

नृपसुता निरगात् गिरिजाल<u>या</u>त् , सुरुचिरं रुचिरञ्जितदिङ्-मुखा॥

भुवनमोहनरूपरुचा त<u>दा</u>, विवशिताखिल-राजकदम्बया ।

त्वमपि देव कटाक्षविमोक्ष<u>णैः</u>, प्रमदया मदयाञ्च-कृषे म<u>ना</u>क् ॥

क्वनु गमिष्यसि चन्द्रमुखीति <u>तां</u>, सरसमेत्य करेण हरन्क्ष<u>णा</u>त्

समधिरोप्य रथं त्वमपाहृ<u>था</u>, भुवि ततो विततो निनदो द्वि<u>षा</u>म् ॥

क्वनु गतः पशुपाल इति क्रु<u>धा</u>, कृतरणा यदुभिश्च जिता नृपाः

न तु भवानुद-चाल्यत तैर<u>हो</u>, पिशुनकैः शुनकैरिव केसरी॥८॥

तदनु रुक्मिण-मागतमाह<u>वे</u>, वधमुपेक्ष्य निबध्य विरूपयन् ।

हृतमदं परिमुच्य बलोक्ति<u>भिः</u>, पुरमया रमया सह कान्तया ९॥

नवसमागम-लज्जितमान<u>सां</u>, प्रणयकौतुक-जृम्भितमन्मथाम्

अरमयः खलु नाथ यथासुखं, रहसि तां हसितांशुल-सन्मुखीम् ॥ १० ॥

विविधनर्मभिरेव-महर्निशं, प्रमदमाकलयन्-पुनरेकदा ।

ऋजुमतेः किल वक्रगिरा भवान्, वरतनोरत-नोदतिलोलताम् ॥

तदधिकैरथ लालनकौश<u>लैः</u>, प्रणयिनीमधिकं शुकयन्निमाम् ।

अयि मुकुन्द भवच्चरितानि <u>नः</u>, प्रगदतां गदतान्तिमपाकुरु॥ श्री हरये नमः।

इति रुक्मिणिस्वयम्वरं एकोनाशीतितमदशकं समाप्तम्॥

கௌரி கல்யாண வைபோகமே
லக்ஷ்மி கல்யாண வைபோகமே
ருக்மிணி கல்யாண வைபோகமே

## स्यमन्तकोपाख्यानम्

**<u>Tune – Evam chaturdasa</u>**

सत्राजितस्-त्वमथ लुब्ध-वदर्कलब्ध<u>म्</u>

दिव्यं स्यमन्तक-मणिं, भगवन्नयाचीः ।

तत्कारणं बहुविधं मम भाति नूनम्

तस्यात्मजां त्वयि रतां छलतो विवोढुम् ॥ १॥

**<u>Tune - Sandra</u>**

अदत्तं तं तुभ्यं, मणिवरम-नेनाल्पमन<u>सा</u>

प्रसेनस्तद् <u>भ्रा</u>ता, गळभुवि वहन्प्राप मृग<u>या</u>म् ।

अहन्नेनं सिंहो, मणिमहसि मांस-भ्रमव<u>शा</u>त्

कपीन्द्रस्तं ह<u>त्वा</u>, मणिमपि च बा<u>ला</u>य ददि<u>वा</u>न्॥ २॥

शशंसुः सत्राजिद्, गिरमनुजना<u>स्त्वां</u> मणिह<u>रम्</u>

जनानां पीयूषं भवति, गुणि<u>नां</u> दोषकणि<u>का</u> ।

ततः सर्वज्ञोऽपि, स्वजनसहितो मार्गणप<u>रः</u>

प्रसेनं तं <u>दृष्ट्वा</u>, हरिमपि गतो<u>ऽभूः</u> कपिगु<u>हा</u>म् ॥ ३॥

**<u>Tune – Bavanta mavi</u>**

भवन्तमवितर्कयन्, अतिवयाः स्वयं जाम्ब<u>वा</u>न्

मुकुन्दशरणं हि मां, क इह रोद्धुमित्यालपन् ।

विभो रघुपते, हरे जय जयेत्यलं मुष्टिभिः

चिरं तव समर्चनं, व्यधित भक्तचूडाम<u>णिः</u> ॥ ४॥

**Tune - Sandra**

बुद्ध्वाथ तेन दत्तां, नवरम**णीं** वरमणीं च परिगृह्ण**न्** ।

अनुगृह्णन्नमुमा**गाः**, सपदि च सत्राजि**ते** मणिं प्रा**दाः** ॥५ ॥

तदनु स खलु व्रीडालोलो, विलोलविलोच**ना**म्

दुहितरमहो **धी**मान्, भामां गिरैव परार्-पि**ता**म् ।

अदित मणिना तुभ्यं, लभ्यं समेत्य भवान**पि**

प्रमुदित-मनास्तस्यैवा**दा**न्, मणिं गहनाश**यः** ॥६॥

**Tune – Evam chaturdasa**

व्रीडाकुलां रमयति त्वयि सत्यभा**मा**म्

कौन्तेयदाह-कथयाथ कुरून्प्रयाते ।

ही गान्दिनेयकृत-वर्मगिरा निपात्य

सत्राजितं शतधनुर्-मणिमाजहार ॥ ७॥

शोकात्कुरू, नुपगतामवलोक्य का**न्ता**म्

हत्वा द्रुतं शतधनं समहर्षयस्ताम् ।

रत्ने सशङ्क इव मैथिलगेहमेत्य

रामो गदां समशिशिक्षित धार्तराष्ट्रम् ॥ ८॥

अक्रूर एष भगवन् भवदिच्छयै**व**

सत्राजितः कुचरितस्य युयोज हिंसाम् ।

अक्रूरतो मणिमनाहृतवान्-पुनस्त्वम्

तस्यैव भूतिमुपधातुमिति ब्रुवन्ति ॥ ९॥

भक्तस्त्वयि स्थिरतरः स हि गान्दिने**यः**

तस्यैव कापथमतिः कथमीश जाता ।

विज्ञानवान्-प्रशमवान् अहमित्युदीर्णम्

गर्वं ध्रुवं शमयितुं भवता कृतैव ॥ १०॥

यातं भयेन कृतवर्मयुतं पुनस्त**म्**

आहूय तद्-विनिहितं च मणिं प्रकाश्य ।

तत्रैव सुव्रतधरे विनिधाय तुष्यन्

भामा-कुचान्तरशयः पवनेश पा**याः** ॥ ११॥ श्री हरये नमः।

इतिस्यमन्तकोपाख्यानं अशीतितमदशकं समाप्तम्॥

**एकाशीतितम दशकम् -81**

---

## कालिन्दी आदिपरिग्रह पारिजात हरणम् च

**Tune - Sandra**

स्नि**ग्धां** मु**ग्धां**, सततमपि **तां**, लालयन् सत्य**भा**माम्

यातो भूयः **सह खलु तया**, याज्ञसे**नी**-वि**वा**हम्

पार्थप्रीत्यै पुनरपि, मनागास्थि**तो** हस्तिपु**र्या**म्

शक्रप्रस्थं **पुरमपि विभो** संविधा**या**गतोऽ**भूः** ॥ १ ॥

भद्रां भद्रां भवदवरजां, कौरवे**णार्**-थ्य**माना**म्

त्वद्वाचा तामहृत, कुहनामस्क**री** शक्रसू**नुः** ।

तत्र क्रुद्धं बलमनुनयन् प्रत्यगा**स्ते**न **सा**र्धम्

शक्रप्रस्थं **प्रियसखमुदे**, सत्यभा**मा**सहा**यः** ॥ २ ॥

तत्र क्रीडन्नपि च, यमुनाकूलदृष्टां गृही**त्वा**

तां कालिन्दीं **नगरमगमः** खाण्ड**व**-प्रीणिता**ग्निः** ।

भ्रातृत्रस्तां प्रणयविवशां, देव पैतृष्वसे**यीम्**

राज्ञां मध्ये **सपदिजहृषे**, मित्रवि**न्दा**मव**न्ती**म्॥

सत्यां गत्वा पुनरुदवहो, नग्न-जिन्नन्द**नां** ताम्

बध्वा सप्तापि च **वृषवरान्**, सप्तमूर्तिर्-नि**मे**षात् ।

भद्रां नाम प्रददुरथ ते, देव सन्तर्दना**द्याः**

तत्सोदर्यां **वरद भवतः**, सापि पैतृष्व**से**यी ॥ ४॥

पार्थाद्यैरप्य-कृतलवनं, तोयमा**त्रा**भिलक्ष्यम्

लक्षं छित्वा **शफरमवृथा**, लक्ष्म**णां** मद्रक**न्या**म् ।

अष्टावेवं तव समभवन्, वल्ल**भा**स्तत्र म**ध्ये**

शुश्रोथ त्वं **सुरपतिगिरा**, भौमदुश्चेष्टि**ता**नि ॥ ५ ॥

स्मृतायातं पक्षिप्रवरम्, अधिरूढस्त्वमग**मो**

वहन्नङ्के **भामा**म्, उपवनमिवाराति-भवनम् ।

विभिन्दन् दुर्गाणि, त्रुटितपृतना-शोणितर**सैः**

पुरं तावत् प्राग्ज्योतिष**म्**, अकुरु**था**श्शोणित-पुरम् ॥

मुरस्त्वां पञ्चा**स्यो**, जलधिवनमध्यादु-दपत**त्**

स चक्रे च**क्रे**ण, प्रदलितशि**रा** मङ्क्षु भव**ता** ।

चतुर्दन्तैर्-दन्तावल पतिभिरि**न्धा**नसम**र**म्

**रथाङ्केनच्छित्वा**, नरकमक**रो**स्तीर्णनरक**म्** ॥ ७॥

स्तुतो भूम्या राज्यं, सपदि भगदत्तेऽस्य तनये

गजञ्चैकं दत्वा, प्रजिघयिथ नागान्निजपुरीम्

खलेनाबद्धानां, स्वगतमनसां षोडश पुनः

सहस्राणि स्त्रीणामपि च, धनराशिं च विपुलम् ॥ ८ ॥

भौमापाहृत-कुण्डलं तददितेः, दातुं प्रयातो दिवम्

शक्राद्यैर्-महितः समं दयितया, द्युस्त्रीषु दत्तह्रिया ।

हृत्वा कल्पतरुं रुषाभिपतितं, जित्वेन्द्र-मभ्यागमः

तत्तु श्रीमद-दोष ईदृश इति, व्याख्यातु-मेवाकृथाः ॥ ९ ॥

कल्पद्रुं सत्यभामा, भवनभुवि सृजन्, व्यष्ट-साहस्रयोषाः

स्वीकृत्य प्रत्यगारं, विहितबहुवपुर्, लालयन्केलिभेदैः

आश्चर्यान्नारदालोकित, विविधगतिः, तत्र तत्रापि गेहे

भूयः सर्वासु कुर्वन्, दश दश तनयान्, पाहि वातालयेश ॥ श्री हरये नमः ।

इति सुभद्राहरणं कालिन्द्यादिविवाहवर्णनं नरकासुरवधवर्णनं च एकशीतितमदशकं समाप्तम् ॥

## बाणासुर युद्धम्, नृग मोक्षः च

**Tune – Sandra**

प्रद्युम्नो रौक्मिणेयः, स खलु तव कला, शम्बरेणाहृतस्तम्

हत्वा रत्या सहाप्तो, निजपुरमहरद्-रुक्मिकन्यां च धन्याम्

तत्पुत्रोऽथानिरुद्धो, गुणनिधिरवहद्, रोचनां रुक्मिपौत्रीम्

तत्रोद्वाहे गतस्त्वं, न्यवधि मुसलिना, रुक्म्यपि द्यूतवैरात् ॥

**Tune – Evam chaturdasa**

बाणस्य सा बलिसुतस्य सहस्रबाहोः

माहेश्वरस्य महिता दुहिता किलोषा ।

त्वत्पौत्रमेनमनि-रुद्धमदृष्टपूर्वम्

स्वप्नेऽनुभूय भगवन् विरहातुराऽभूत् ॥ २ ॥

योगिन्यतीव कुशला खलु चित्रलेखा

तस्याः सखी विलिखती तरुणानशेषान् ।

तत्रानिरुद्ध-मुषया विदितं निशायाम्

आनेष्ट योगबलतो भवतो निकेतात् ॥ ३॥

कन्यापुरे दयितया सुखमारमन्तम्

चैनं कथञ्चन बबन्धुषि शर्वबन्धौ ।

श्रीनारदोक्त-तदुदन्त-दुरन्तरोषैः

त्वं तस्य शोणितपुरं, यदुभिर्-न्य रुन्धाः ॥ ४ ॥

**Tune - Sandra**

पुरीपालः शैलप्रियदुहितृ, नाथोऽस्य भगवान्

समं भूतव्रातैर्, यदुबलमशङ्कं निरुरुधे ।

महाप्राणो बाणो, जटिति युयुधानेन युयुधे

गुहः प्रद्युम्नेन, त्वमपि पुरहन्त्रा जघटिषे ॥ ५॥

निरुद्धाशेषास्त्रे, मुमुहुषि तवास्त्रेण गिरिशे

द्रुता भूता भीताः, प्रमथकुलवीराः प्रमथिताः ।

परास्कन्दत्स्कन्दः, कुसुमशरबाणैश्च सचिवः

स कुम्भाण्डो भाण्डं, नवमिव बलेनाशु बिभिदे ॥ ६॥

चापानां पञ्चशत्या, प्रसभमुपगते, छिन्नचापेऽथ बाणे

व्यर्थे याते समेतो, ज्वरपतिरशनैर् अज्वरि त्वज्ज्वरेण

ज्ञानी स्तुत्वाथ दत्वा, तव चरितजुषां, विज्वरं सज्वरोऽगात्

प्रायोऽन्तर्-ज्ञानवन्तोऽपि च, बहुतमसा, रौद्रचेष्टा हि रौद्राः ॥

बाणं नानायुधोग्रं, पुनरभिपतितं, दर्पदोषाद्-वितन्वन्

निर्लूनाशेषदोषं, सपदि बुबुधुषा, शङ्करेणोपगीतः

तद्-वाचा शिष्टबाहु, द्वितयमुभयतो, निर्भयं तत्प्रियं तम्

मुक्त्वा तद्दत्तमानो, निजपुरमगमः, सानिरुद्धः सहोषः॥ ८ ॥

मुहुस्तावच्छक्रं, वरुणमजयो नन्दहरणे

यमं बालानीतौ, दवदहनपानेऽ, निलसखम् ।

विधिं वत्सस्तेये, गिरिशमिह बाणस्य समरे

विभो विश्वोत्कर्षी, तदयमवता**रो** जयति **ते** ॥ ९ ॥

**Tune - Kalyatam**

द्विजरुषा कृकलासवपुर्धरं, नृगनृपं त्रिदिवालयमापयन् ।

निजजने द्विजभक्तिमनुत्तमा-उपदिशन्, पवनेश्वर पाहि माम्॥ श्री हरये नमः।

इति बाणयुद्धं नृगमोक्षं च द्वयशितितमदशकं समाप्तम्॥

## त्र्यशीतितम दशकम् -83

## पौन्ड्रक वधः, विविद वधः च

**Tune – Evam chaturdasa**

रामेऽथगोकुलगते प्रमदा-प्रस**क्ते**

हूतानुपेतयमुनादमने मदान्धे ।

स्वैरं समारमति सेवकवादमूढो

दूतं न्ययुङ्क्त तव पौण्ड्रकवासुदेवः ॥ १॥

नारायणोऽहमवतीर्ण इहास्मि भू**मौ**

धत्से किल त्वमपि मामकलक्षणानि ।

उत्सृज्य तानि शरणं व्रज मामिति त्वाम्

दूतो जगाद सकलैर्-हसितः सभायाम् ॥ २॥

दूतेऽथ यातवति यादवसैनिकस्त्व**म्**

यातो ददर्शिथ वपुः किल पौण्ड्रकीयम् ।

तापेन वक्षसि कृताङ्कमनल्प मूल्य

श्रीकौस्तुभं मकरकुण्डलपीतचेलम् ॥ ३॥

कालायसं निज-सुदर्शनमस्यतोऽ<u>स्य</u>

कालानलोत्कर-किरेण सुदर्शनेन ।

शीर्षं चकर्तिथ ममर्दिथ चास्य सेनाम्

तन्मित्रकाशि-पशिरोऽपि चकर्थ काश्याम् ॥ ४॥

जाड्येन बालकगिराऽपि किलाहमे<u>व</u>

श्रीवासुदेव इति रूढमतिश्चिरं सः ।

सायुज्यमेव भवदैक्यधिया गतोऽभूत्

को नाम कस्य सुकृतं कथमित्यवेयात् ॥ ५॥

काशीश्वरस्य तनयोऽथ सुदक्षिणा<u>ख्यः</u>

शर्वं प्रपूज्य भवते विहिताभिचारः ।

कृत्यानलं कमपि बाणरणातिभीतैः

भूतैः कथञ्चन वृतैः सममभ्यमुञ्चत् ॥ ६॥

तालप्रमाण-चरणामखिलं दह<u>न्ती</u>म्

कृत्यां विलोक्य चकितैः कथितोऽपि पौरैः ।

द्यूतोत्सवे कमपि नो चलितो विभो त्वम्

पार्-श्वस्थमाशु विससर्जिथ कालचक्रम् ॥ ७॥

अभ्यापतत्यमित-धाम्नि भवन्महा<u>स्त्रे</u>

हा हेति विद्रुतवती खलु घोरकृत्या ।

रोषात्-सुदक्षिणमदक्षिण-चेष्टितं तम्

पुप्लोष चक्रमपि काशिपुरी-मधाक्षीत् ॥ ८॥

**Tune - Sandra**

स खलु विविदो रक्षोघाते, कृतोपकृतिः पु**रा**

तव तु कलया मृ**त्युं**, प्राप्तुं तदा खलतां ग**तः** ।

नरकसचिवो देशक्लेशं, सृजन् नगरान्ति**के**

झटिति हलिना युध्यन्न**द्धा**, पपात त**ला**हतः ॥

साम्बं कौरव्यपुत्री, हरणनियमितं, सान्त्वना**र्थी** कुरू**णा**म्

यातस्तद्-वाक्यरो**षोद्**, धृतकरिनगरो, मोच**या**मास रा**मः**

ते घात्याः पाण्डवेयैरिति, यदुपृतनां, नामुचस्त्वम् त**दानी**म्

तं त्वां दुर्-बोध**ली**लं, पवनपुरपते, तापशान्त्यै नि**षे**वे ॥ श्री हरये नमः।

इतिपौन्ड्रकवधवर्णनं काशीपुरीदाहवर्णनं द्विवुदवधवर्णनं च त्र्यशीतितमदशकं समाप्तम् ॥

## चतुर शीतितम दशकम् -84

---

## समन्त पञ्चक यात्रा बन्धु मित्र आदि समागमःच

**Tune - Kalyatam**

क्वचिदथ तपनोपराग-का**ले**, पुरि निदधत्-कृतवर्मकामसूनू ।

यदुकुलमहिलावृतः सुतीर्थं, समुपगतोऽसि समन्तपञ्च-कार्व्यम्॥

बहुतरजनताहिताय तत्र, त्वमपि पुनन्-विनिमज्ज्य तीर्थतोयम्

द्विजगणपरिमुक्तवित्तराशिः,सममिलथाःकुरुपाण्डवादिमित्रैः॥

तव खलु दयिताजनैः समेता, द्रुपदसुता त्वयि गाढभक्तिभारा

तदुदित-भवदाहृतिप्रकारैः, अतिमुमुदे सममन्यभामिनीभिः॥ ३॥

तदनु च भगवन् निरीक्ष्य गोपान्, अतिकुतुकादुपगम्य मानयित्वा ।

चिरतरविरहा-तुराङ्गरेखाः, पशुपवधूः सरसं त्वमन्वयासीः ॥४॥

सपदि च भवदीक्षणोत्सवेन, प्रमुषितमानहृदां नितम्बिनीनाम्

अतिरस-परिमुक्तकञ्चुलीके, परिचयहृद्यतरे कुचे न्यलैषीः॥५ ॥

रिपुजनकलहैः पुनः पुनर्मे, समुपगतैरियती विलम्बनाभूत् ।

इति कृतपरिरम्भणे त्वयि द्राग्,अतिविवशाखलु राधिका निलिल्ये ॥6॥

अपगत-विरहव्यथास्तदा ता, रहसि विधाय ददाथ तत्वबोधम्

परमसुख-चिदात्मकोऽहमात्मेति, उदयतु वः स्फुटमेव चेतसीति॥7॥

सुखरसपरि-मिश्रितो वियोगः, किमपि पुराभवदुद्धवोपदेशैः ।

समभवदमुतः परं तु तासां, परमसुखैक्यमयी भवद्-विचिन्ता॥ ८॥

मुनिवरनिवहैस्तवाथ पित्रा, दुरितशमाय शुभानि पृच्छ्यमानैः

त्वयि सति किमिदं शुभान्तरैरिति, उरुहसितैरपि याजितस्तदासौ ॥

सुमहति यजने वितायमाने, प्रमुदितमित्रजने सहैव गोपाः ।

यदुजनमहितास्-त्रिमासमात्रं, भवदनुषङ्गरसं पुरेव भेजुः॥१०॥

व्यपगमसमये समेत्य राधां, दृढमुपगूह्य निरीक्ष्य वीतखेदाम्

प्रमुदितहृदयः पुरं प्रयातः, पवनपुरेश्वर पाहि मां गदेभ्यः॥ श्री हरये नमः।

इति समन्तपञ्चक-यात्रावर्णनं चतुरशीतितमदशकं समाप्तम्॥

## झरासन्ध वधः शिशुपाल वधः च

**Tune - Yogamaya**

ततो मगधभूभृता, चिरनिरोध-संक्लेशितम्

शताष्टकयुतायुत, द्वितयमीश भूमीभृताम् ।

अनाथशरणाय ते, कमपि पूरुषं प्राहिणोद्

अयाचत स मागध, क्षपणमेव किं भूयसा ॥ १॥

इयासुरभिमागधं, तदनु नारदो-दीरिताद्

युधिष्ठिर-मखोद्यमाद्, उभयकार्यपर्याकुलः ।

विरुद्ध-जयिनोऽध्वराद्, उभयसिद्धिरित्युद्धवे

शशंसुषि निजैः समं, पुरमियेथ यौधिष्ठिरीम् ॥ २॥

अशेषदयितायुते, त्वयि समागते धर्मजो

विजित्य सहजैर्महीं, भवदपाङ्ग-संवर्धितैः ।

श्रियं निरुपमां वहन्, अहह भक्तदासायितम्

भवन्तमयि मागधे, प्रहितवान्सभीमार्जुनम् ॥ ३॥

गिरिव्रजपुरं गताः, तदनु देव यूयं त्रयो

ययाच समरोत्सवं, द्विजमिषेण तं मागधम् ।

अपूर्ण-सुकृतं त्वमुं, पवनजेन संग्रामयन्

निरीक्ष्य सह जिष्णुना, त्वमपि राजयुध्वा स्थितः॥ ४॥

अशान्त-समरोद्धतं, विटप-पाटनासंज्ञया

निपात्य जरसस्सुतं, पवनजेन निष्पाटितम् ।

विमुच्य नृपतीन्मुदा, समनुगृह्य भक्तिं पराम्

दिदेशिथ गतस्पृहान् , अपि च धर्मगुप्त्यै भुवः ॥ ५॥

प्रचक्रुषि युधिष्ठिरे, तदनु राजसूयाध्वरम्

प्रसन्न-भृतकीभवत्, सकल-राजकव्याकुलम् ।

त्वमप्ययि जगत्पते, द्विजपदावनेजादिकम्

चकर्थ किमु कथ्यते, नृपवरस्य भाग्योन्नतिः ॥ ६॥

ततः सवनकर्मणि, प्रवरमग्रय-पूजाविधिम्

विचार्य सहदेववाग, अनुगतस्स धर्मात्मजः ।

व्यधत्त भवते मुदा, सदसि विश्व-भूतात्मने

तदा ससुरमानुषं, भुवनमेव तृप्तिं दधौ ॥ ७॥

ततस्सपदि चेदिपो, मुनिनृपेषु तिष्ठत्स्वहो

सभाजयति को जडः, पशुपदुर्-दुरूढं वटुम् ।

इति त्वयि स दुर्वचो, विततिमुद्ध-मन्नासनाद्

उदापतदुदायुधः, समपतन्नमुं पाण्डवाः ॥ ८॥

निवार्य निजपक्षगान्, अभिमुखस्य विद्वेषिणः

त्वमेव जहृषे शिरो, दनुज-दारिणा स्वारिणा ।

जनुस्त्रितय-लब्धया, सततचिन्तया शुद्धधीः

त्वया स परमेकताम, अधृत योगिनां दुर्लभाम्॥ ९॥

ततस्सुमहिते त्वया, क्रतुवरे निरूढे जनो

ययौ जयति धर्मजो, जयति कृष्ण इत्यालपन् ।

खलः स तु सुयोधनो, धुतमनाः सपत्नश्रिया

मयार्पित-सभामुखे, स्थलजल-भ्रमादभ्रमीत् ॥ १०॥

तदा हसितमुत्थितं, द्रुपदनन्द-नाभीमयोः

अपाङ्गकलया विभो, किमपि तावदुज्जृम्भयन् ।

धराभरनिराकृतौ, सपदि नाम बीजं वपन्

जनार्दन मरुत्पुरी, निलय पाहि मामामयात् ॥ ११॥ श्री हरये नमः।

इति जरासन्धवधवर्णनं राजसूयवर्णनं च पञ्चाशीतितमदशकं समाप्तम्॥

## षड शीतितम दशकम् -86

---

## साल्वादि वधः भारत युद्धम् च

**Tune - Sandra**

साल्वो भैष्मीविवाहे, यदुकुलविजितश्, चन्द्रचूडाद्-विमानम्

विन्दन्सौभं स मायी, त्वयि वसति कुरूंस्, त्वत्पुरीमभ्य-भाङ्क्षीत् ।

प्रद्युम्नस्तं निरुन्धन् , यखिलयदुभटैर्, न्यग्रहीद्-उग्रवीर्यम्

तस्यामात्यं द्युमन्तं, व्यजनि च समरः, सप्तविंशत्यहान्तम् ॥

तावत्वम् रामशाली, त्वरितमुपगतः, खण्डितप्रायसैन्यम्

सौभेशं तं न्यरुन्धाः, स च किल गदया, शार्ङ्गमभ्रं-शयत्ते ।

मायातातं व्यहिंसीद् ,अपि तव पुरतः, तत्वयापि क्षणार्धम्

नाज्ञायीत्याहुरेके, तदिदमवमतं, व्यास एव न्यषेधीत् ॥ २॥

क्षिप्त्वा सौभं गदाचूर्णितं उदकनिधौ, मङ्क्षु साल्वेऽपि चक्रे
णोत्कृत्ते दन्त-वक्रः, प्रसभमभिपतन्, अभ्यमुञ्चद्-गदां ते
कौमोदक्या हतोऽसावपि, सुकृतनिधिः चैद्यवत्-प्रापदैक्यम्
सर्वेषामेष पूर्वं, त्वयि धृतमनसां, मोक्षणार्थोऽवतारः ॥ ३॥

त्वय्यायातेऽथ जाते, किल कुरुसदसि, द्यूतके संयतायाः
क्रन्दन्त्या याज्ञसेन्याः, सकरुणमकृथाः, चेलमालामनन्ताम्
अन्नान्तप्राप्त, शर्वांशजमुनिचकित, द्रौपदी चिन्तितोऽथ
प्राप्तश्शाकान्न-मश्नन्, मुनिगणमकृथाः, तृप्तिमन्तं वनान्ते ॥

युद्धोद्योगेऽथ मन्त्रे, मिलति सति वृतः, फल्गुनेन त्वमेकः
कौरव्ये दत्तसैन्यः, करिपुरमगमो, दूत्य-कृत्पाण्डवार्थम् ।
भीष्म-द्रोणादिमान्ये, तव खलु वचने, धिक्कृते कौरवेण
व्यावृण्वन्-विश्वरूपं, मुनिसदसि पुरीं, क्षोभयित्वा,गतोऽभूः ॥

जिष्णोस्त्वं कृष्ण सूतः, खलु समरमुखे, बन्धुघाते दयालुम्
खिन्नं तं वीक्ष्य वीरं, किमिदमयि सखे, नित्य एकोऽयमात्मा
को वध्यः कोऽत्र हन्ता, तदिह वधभियं, प्रोज्य मय्यर्पितात्मा
धर्म्यं युद्धं चरेति, प्रकृतिमनयथा, दर्शयन्-विश्वरूपम् ॥ ६॥

भक्तोत्तंसेऽथ भीष्मे, तव धरणिभरक्षेप, कृत्यैकसक्ते
नित्यं नित्यं विभिन्दन्, अयुतसमधिकं, प्राप्तसादे च पार्थे ।

निश्शस्त्रत्व-प्रतिज्ञां, विजहदरिवरं, धारयन्-क्रोध<u>**शाली**</u>
वाधावन्-प्राञ्जलिं तं, नतशिरसमथो, वीक्ष्य मो<u>**दा**</u>दपा<u>**गाः**</u>॥

युद्धे द्रोणस्य, हस्ति-स्थिररण, भगद<u>**त्ते**</u>रितं वैष्ण<u>**वास्त्र**</u>म्
वक्षस्याधत्त चक्र-स्थगितरविमहाः, प्रार्दय<u>**त्**</u>-सिन्धु<u>**रा**</u>जम्
नागास्त्रे कर्णमुक्ते, क्षितिमवनमयन्, केव<u>**लं**</u> कृत्तमौलि<u>**म्**</u>
तत्रे तत्रापि <u>**पा**</u>र्थं, किमिव न हि भवान्, पाण्डवा<u>**ना**</u>म<u>**का**</u>र्षीत् ॥

युद्धादौ, तीर्थगामी, स खलु हलधरो, नैमिश-क्षेत्रमृच्छ<u>**न्**</u>
अप्रत्युत्थायिसूतः, क्षयकृदथ सुतं, तत्प<u>**दे**</u> कल्पयि<u>**त्वा**</u> ।
यज्ञघ्नं बल्वलं पर्वणि, परिदळयन्, स्नातती<u>**र्थो**</u> <u>**र**</u>णा<u>**न्ते**</u>
सम्प्राप्तो भीमदुर्योधनरण<u>**म्**</u>, अशमं वीक्ष्य यातः <u>**पुरीं ते**</u>॥९॥

संसुप्तद्रौपदेय, क्षपणहतधियं, द्रौणिमेत्य, त्वदु<u>**क्त्या**</u>
तन्मुक्तं ब्राह्ममस्<u>**त्रं**</u>, समहृत विजयो, मौलिरत्नं च ज<u>**ह्रे**</u> ।
उच्छित्यै पाण्डवानां, पुनरपि च विशत्, उत्त<u>**रा**</u>गर्भम<u>**स्त्रे**</u>
रक्षन्नङ्गुष्ठमात्रः, किल जठरम<u>**गाः**</u>, चक्रपाणिर्-वि<u>**भो**</u> त्वम् ॥

धर्-मौघं धर्मसूनोः, अभिदधदखिलं, छन्दमृत्युः स भी<u>**ष्मः**</u>
त्वाम् पश्यन् भक्ति-भून्नैव हि, सपदि ययौ, निष्क<u>**ळ**</u>ब्रह्म<u>**भू**</u>यम्
संया-ज्याथाश्वमेधैः, स्त्रिभिरतिमहितैर्, धर्म<u>**जं**</u> पूर्ण<u>**का**</u>म<u>**म्**</u>
सम्प्राप्तो द्वार<u>**कां**</u> त्वं, पवनपुरपते पाहि मां सर्व<u>**रोगा**</u>त् ॥ श्री हरये नमः।

इति शाल्वादिवधवर्णनं भारतयुद्धवर्णनं च षडशीतितमदशकं समाप्तम्॥

## कुचेल वृत्तान्तः

**Tune – Evam chaturdasa**

कुचेलनामा भवतः सतीर्थ्य**तां**, गतः स सान्दीपनिमन्दिरे द्विजः ।
त्वदेकरागेण धनादि-निःस्पृहो, दिनानि निन्ये प्रशमी गृहाश्रमी॥ १॥

समान-शीलाऽपि तदीयवल्ल**भा**, तथैव नो चित्तजयं समेयुषी
कदाचिदू**चे** बत वृत्तिलब्धये, रमापतिः किं न सखा निषेव्यते ॥ २॥

इतीरितोऽयं, प्रियया क्षुधार्त**या**, जुगुप्-समानोऽपि धने मदावहे ।
तदा त्वदालोकन-कौतुकाद्ययौ, वहन्पटान्ते पृथुकानुपायनम् ॥

गतोऽयमाश्चर्यमयीं भवत्**पुरीं**, गृहेषु शैब्या-भवनं समेयिवान्
प्रविश्य वैकुण्ठमिवाप निर्वृतिं, तवातिसम्भावनया तु किं पुनः॥

प्रपूजितं तं, प्रियया च वीजि**तं**, करे गृहीत्वाऽकथयः पुरा कृतम् ।
यदिन्धनार्थं, गुरुदार-चोदितैः, अपर्तुवर्षं तदमर्षि कानने ॥५॥

त्रपाजुषोऽस्मात् ,पृथुकं बलाद**थ**, प्रगृह्य मुष्टौ सकृदाशिते त्वया ।
कृतं कृतं नन्वियतेति सम्भ्रमाद्, रमा किलोपेत्य करं रुरोध ते ॥

भक्तेषु भक्तेन स मानितस्त्व**या**, पुरीं वसन्नेकनिशां महासुखम्
बतापरेद्युर् द्रविणं विना ययौ, विचित्र-रूपस्तव खल्वनुग्रहः॥७॥

यदि ह्ययाचिष्यमदास्य-दच्यु**तो**, वदामि भार्यां किमिति व्रजन्नसौ ।
त्वदुक्ति-लीलास्मितमग्नधीः पुनः, क्रमादपश्यन्मणि-दीप्रमालयम्॥

किं मार्ग-विभ्रंश इति भ्रमन्क्ष**णं**, गृहं प्रविष्टः स ददर्श वल्लभाम् ।

सखीपरीतां मणिहेमभूषितां, बुबोध च त्वत्करुणां महाद्-भुताम्॥

स रत्नशालासु-वसन्नपि स्व**यं**, समुन्नमद्-भक्तिभरोऽमृतं ययौ

त्वमेवमापूरित-भक्तवाञ्छितो, मरुत्पुराधीश हरस्व मे गदान् ॥ १०॥ श्री हरये नमः।

इति कुचलोपाख्यानं सप्तशीतितमदशकं समाप्तम्॥

## अष्ट शीतितम दशकम् -88

---

### श्रीसन्तान गोपालः

**Tune - Sandra**

प्रागेवाचार्य पुत्राहृति निशमनयास् , वीयष**ट्**-**सू**नुवी**क्षा**म्

कांक्षन्त्या मातुरु**क्त्या**, सुतलभुवि बलिं, प्राप्य तेनार्चि**त**स्त्व**म्**

धातुश्शापाद्धिरण्यान्वित, कशिपुभवान्, शौरि**जा**न् कंसभ**ग्ना**न्

आनीयैनान् प्रद**र्श्य**, स्वपदमनयथाः, पूर्वपु**त्रा**न्मरी**चेः** ॥

**Tune - Kalyatam**

श्रुतदेव इति श्रुतं द्विजेन्द्रं, बहुलाश्वं नृपतिं च भक्तिपूर्णम् ।

युगपत्व-मनुग्रहीतुकामो, मिथिलां प्रापिथ तापसैः समेतः॥२॥

**Tune – Evam chaturdasa**

गच्छन्-द्विमूर्तिरुभयोर्-युगपन्निकेत**म्**

एकेन भूरिविभवैर् , विहितोपचारः ।

अन्येन तद्दिनभृतैश्च फलौदनाद्यैः

तुल्यं प्रसेदिथ ददाथ च मुक्तिमाभ्याम् ॥ ३॥

**Tune - Sandra**

भूयोऽथ द्वारवत्यां, द्विजतनयमृतिं, तत्-प्रलापानपि त्वम्

को वा दैवं निरुन्ध्याद्, इति किल कथयन् ,विश्व-वोढाऽप्यसोढाः ।

जिष्णोर्गर्वं विनेतुं, त्वयि मनुजधिया, कुण्ठितां चास्य बुद्धिम्

तत्वारूढां विधातुं, परमतमपद, प्रेक्षणेनेति मन्ये ॥ ४॥

नष्टा अष्टास्य पुत्राः, पुनरपि तव तूपेक्षया कष्टवादः

स्पष्टो जातो जनानाम्, अथ तदवसरे, द्वारकामाप पार्थः ।

मैत्र्या तत्रोषितोऽसौ, नवमसुतमृतौ, विप्रवर्य-प्ररोदम्

श्रुत्वा चक्रे प्रतिज्ञाम्, अनुपहृतसुतः, सन्निवेक्ष्ये कृशानुम् ५॥

मानी स त्वामपृष्ट्वा, द्विजनिलयगतो, बाणजालैर्-महास्त्रै

रुन्धानः सूतिगेहं, पुनरपि सहसा, दृष्टनष्टे कुमारे

याम्यामैन्द्रीं तथान्याः, सुरवरनगरीर्, विद्ययाऽऽसाद्य सद्यो

मोघोद्योगः पतिष्यन्, हुतभुजि भवता, सस्मितं वारितोऽभूत् ॥

सार्धं तेन प्रतीचीं, दिशमतिजविना, स्यन्दने-नाभियातो

लोकालोकं व्यतीतः, तिस्तिमिरभरमथो, चक्रधाम्ना निरुन्धन्

चक्रांशुक्लिष्ट-दृष्टिं, स्थितमथ विजयं, पश्य पश्येति वाराम्

पारे त्वं प्राददर्शः, किमपि हि तमसां, दूरदूरं पदं ते ॥ ७॥

तत्रासीनं भुजङ्गाधिप, शयनतले, दिव्य-भूषायुधाद्यैः

आवीतं पीतचेलं, प्रतिनवजलद श्यामळम् श्रीमदङ्गम् ।

मूर्तीनामीशितारं, परमिह तिसृणा, मेकमर्थं श्रुतीनाम्

त्वामेव त्वं परात्मन् , प्रियसखसहितो, नेमि**थ** क्षेम**रू**पम्॥ ८॥

युवां मामेव, द्वावधिक विवृतान्तर्-हिततया
विभिन्नौ संद्र**ष्टुं**, स्वयमहमहार्षं द्विजसु**ता**न् ।
नयेतं द्रागेतान् , इति खलु विती**र्णा**न्-पुनर**मू**न्
द्विजायादाया**दाः**, प्रणुतमहि**मा**, पाण्डुजनु**षा** ॥ ९॥

एवं नानाविहारैर् , जगदभिरमयन्, वृष्णिवं**शं** प्रपुष्णन्
ईजानोयज्ञभे**दैः**, अतुल-विहृतिभिः, प्रीणयन्नेणने**त्राः** ।
भूभारक्षे-पदम्भात्, पदकमलजुषां, मोक्षणा**या**वती**र्णः**
पूर्णं ब्रह्मैव **सा**क्षाद्, यदुषु मनुजता ऊषित**स्त्वं** व्यला**सीः**॥१०॥

प्रायेण द्वारवत्याम्, अवृतदयि तदा, नारदस्-त्वद्रसा**र्द्रः**
तस्माल्लेभे कदाचित्, खलु सुकृतनिधिः, त्वत्पि**ता** तत्व**बो**धम्
भक्तानामग्रयायी, स च खलु मतिमान्, उद्ध**व**स्-त्वत्त **एव**
प्राप्तो विज्ञानसारं, स किल जनहिता, याधुनाऽ**स्ते** वद**र्या**म्॥११॥

सोऽयं कृष्णावतारो, जयति तव विभो, यत्र सौ**हा**र्दभी**ति**
स्नेहद्वेषानुराग, प्रभृतिभिरतुलैर्, अश्रमैर्-योगभे**दैः** ।
आर्तिं तीत्वा समस्ताम्, अमृतपदमगुः, सर्वतः सर्वलो**काः**
स त्वं विश्वार्-तिशा**न्त्यै**, पवनपुरपते, भक्तिपू**र्त्यै** च भूयाः॥ १२॥ श्री हरये नमः।

इति सन्तानगोपालोपाख्यानमष्टाशीतितमदशकं समाप्तम्॥

## वृकासुर कथा, भृगु परीक्षणं च

**Tune - Sandra**

रमाजाने जाने, यदिह तव भक्तेषु विभवो

न सद्यस् सम्पद्यः, तदिह मदकृत्वा-दशमिनाम् ।

प्रशान्तिं कृत्वैव, प्रदिशसि ततः काममखिलम्

प्रशान्तेषु क्षिप्रं, न खलु भवदीयेच्युति-कथा ॥ १॥

**Tune – Evam chaturdasa**

सद्यःप्रसाद्-रुषितान्, विधि-शङ्करादीन्

केचिद्विभो निजगुणानुगुणं भजन्तः ।

भ्रष्टा भवन्ति बत कष्टमदीर्घ-दृष्ट्या

स्पष्टं वृकासुर उदाहरणं किलास्मिन् ॥ २॥

**Tune - Kalyatam**

शकुनिजः स तु नारदमेकदा

त्वरिततोषम-पृच्छदधीश्वरम् ।

स च दिदेश गिरीशमुपासितुम्

न तु भवन्तमबन्धुम-साधुषु ॥ ३॥

**Tune - Sandra**

तपस्तप्त्वा घोरं, स खलु कुपितः सप्तमदिने

शिरश्छित्वा सद्यः, पुरहर-मुपस्थाप्य पुरतः ।

अतिक्षुद्रं रौद्रं, शिरसि करदानेन निधनम्

जगन्नाथाद्वव्रे, भवति विमुखानां क्व शुभधीः ॥ ४॥

मोक्तारं बन्धमुक्तो, हरिणपतिरिव, प्राद्रव**त्सोऽ**थ रुद्र**म्**

दैत्याद्-भीत्या स्म **दे**वो, दिशि दिशि वलते, पृष्ठ**तो** दत्तद**ृष्टिः**

तूष्णीके सर्वलोके, तव पदमधिरोक्ष्यन्त मुद्वीक्ष्य शर्व**म्**

दूरादेवाग्रतस्त्वं, पटुवटुवपुषा, तस्थि**षे** दान**वा**य ॥ ५॥

भद्रं ते शाकुनेय, भ्रमसि किमधुना, त्वं पिशाचस्य **वाचा**

सन्देहश्चेन्मदु**क्तौ**, तव किमु न करोष्-यङ्गु**ली**मङ्ग **मौ**लौ ।

इत्थं त्वद्-वाक्यमूढः, शिरसि कृतकरः, सोऽपतच्छिन्न**पा**त**म्**

भ्रंशो ह्येवं परोपासितुरपि च गतिः, शूलिनोऽपि त्व**मे**व ॥ ६॥

**Tune - Yogamaya**

भृगुं किल सरस्व**ती**, निकट-वासिनस्ताप**साः**

त्रिमुर्-तिषु समादिश**न्**, अधिकसत्वतां वेदितुम् ।

अयं पुनरनादराद्, उदितरुद्धरोषे विधौ

हरेऽपि च जिहिंसिषौ, गिरिजया धृते त्वामगात् ॥

**Tune – Evam chaturdasa**

सुप्तं रमाङ्कभुवि पङ्कजलोचनं **त्वा**म्

विप्रे विनिघ्नति पदेन मुदोत्थितस्-त्वम् ।

सर्वं क्षमस्व मुनिवर्य भवेत्सदा मे

त्वत्पादचिह्नमिह भूषणमित्यवादीः ॥ ८॥

निश्चित्य ते च सुदृढं त्वयि बद्धभा**वाः**

सारस्वता मुनिवरा दधिरे विमोक्षम् ।

त्वामेवमच्युत पुनश्च्युति-दोषहीनम्

सत्वोच्चयैक-तनुमेव वयं भजामः ॥ ९॥

**Tune -Sandra**

जगत्-सृष्ट्यादौ त्वां, निगमनिवहैर् वन्दिभिरि<u>व</u>

स्तुतं विष्णो सच्चित्, परमरसनिर्-**द्वै**तवपुष**<u>म्</u>** ।

परात्मानं भूमन्, पशुपवनिता-भाग्यनिवहम्

परीतापश्रान्त्यै, पवनपुरवा**<u>सिन्</u>** परिभजे ॥ १०॥ श्री हरये नमः।

इति वृकासुरवधवर्णनं एकोननवतितमदशकं समाप्तम्॥

## नवतितम दशकम् -90

## विष्णु महत्व स्थापनम्

**Tune - Sandra**

वृकभृगु- मुनिमोहिन्यम्बरी<u>षा</u>दि-वृ<u>त्ते</u>षु

अयि तव हि महत्वम्, सर्वश**<u>र्वा</u>**दि-**<u>जै</u>**त्रम् ।

स्थितमिह परमात्मन्, निष्क**<u>लार्</u>**-वागभि**<u>न्न</u>**म्

किमपि यदव**<u>भा</u>**तं तद्धि रूपं त**<u>वै</u>**व ॥ १॥

**Tune – Evam chaturdasa**

मूर्तित्रयेश्वर-सदाशिवपञ्चकं य**<u>त्</u>**

प्राहुः परात्मवपुरेव सदाशिवोऽस्मिन् ।

तत्रेश्वरस्तु स विकुण्ठपदस्त्वमेव

त्रित्वं पुनर्भजसि सत्यपदे त्रिभागे ॥ २॥

तत्रापि सात्विकतनुं तव विष्णुमा**<u>हुः</u>**

धाता तु सत्वविरलो रजसैव पूर्णः ।

सत्वोत्-कटत्वमपि चास्ति तमोविकार

चेष्टादिकं च तव शङ्करनाम्नि मूर्तौ ॥ ३॥

तं च त्रिमूर्त्यतिगतं परपूरुषं त्वाम्

शर्वात्मनापि खलु सर्वमयत्व-हेतोः ।

शंसन्त्युपासनविधौ तदपि स्वतस्तु

त्वद्रूपमित्यति-दृढं बहु नः प्रमाणम् ॥ ४॥

श्रीशङ्करोऽपि-भगवान्-सकलेषुतावत्

त्वामेव मानयति यो न हि पक्षपाती ।

त्वन्निष्ठमेव स हि नामसहस्रकादि

व्याख्यद्-भवत्-स्तुतिपरश्च गतिं गतोऽन्ते ॥ ५॥

मूर्ति-त्रयातिगमुवाच च मन्त्रशास्त्रः

आदौ कलायसुषमं सकलेश्वरं त्वाम् ।

ध्यानं च निष्कलमसौ प्रणवे खलूक्त्वा

त्वामेव तत्र सकलं निजगाद नान्यम् ॥ ६॥

समस्तसारे च पुराणसंग्रहे

विसंशयं त्वन्महिमैव वर्ण्यते ।

त्रिमूर्तियुक्सत्यपद-त्रिभागतः

परं पदं ते कथितं न शूलिनः ॥ ७॥

यद्-ब्राह्मकल्प इह भागवतद्वितीय

स्कन्धोदितं वपुरनावृतमीश धात्रे ।

तस्यैव नाम हरिशर्वमुखं जगाद

श्रीमाधवः शिवपरोऽपि पुराणसारे ॥ ८॥

ये स्व-प्रकृत्यनुगुणा गिरिशं भजन्ते

तेषां फलं हि दृढयैव तदीयभक्त्या ।

व्यासो हि तेन कृतवा-नधिकारिहेतोः

स्कान्दादिकेषु तव हानि-वचोऽर्थवादैः ॥ ९॥

भूतार्थकीर्तिरनुवाद-विरुद्धवादौ

त्रेधार्थवादगतयः खलु रोचनार्थाः ।

स्कान्दादिकेषु बहवोऽत्र विरुद्धवादाः

त्वत्तामसत्वपरिभूत्युप-शिक्षणाद्याः ॥ १०॥

यत्-किञ्चिदप्य-विदुषापि विभो मयोक्तम्

तन्मन्त्रशास्त्र-वचनाद्यभि-दृष्टमेव ।

व्यासोक्ति-सारमय-भागवतोपगीत

क्लेशान्विधूय कुरु भक्तिभरं परात्मन् ॥ ११॥ श्री हरये नमः।

इति आगमादीनां परमतात्पर्यनिरूपणं नवतितमदशकं समाप्तम्॥

## भक्ति महत्वम्

**Tune - Sandra**

श्रीकृष्ण त्वत्पदो पासनम् अभयतमं, बद्ध मिथ्यार्थ-दृष्टेः
मर्त्यस्यार्-तस्य मन्ये, व्यपसरति भयं, येन सर्वात्मनैव ।
यत्ताव-त्वत्प्रणीतानिह, भजन-विधीन्, आस्थितो मोहमार्गे
धावन्नप्या-वृताक्षः, खलति न कुहचिद्, देव-देवाखिलात्मन् ॥

भूमन् कायेन वाचा, मुहुरपि मनसा, त्वद्-बल-प्रेरितात्मा
यद्यत्कुर्वे समस्तं, तदिह परतरे, त्वय्यसा-वर्पयामि ।
जात्यापीह श्वपाकस्, त्वयि निहितमनः, कर्म-वागिन्द्रियार्थ
प्राणो विश्वं पुनीते, न तु विमुखमनाः, त्वत्पदाद्-विप्रवर्यः ॥ २ ॥

भीतिर्नाम द्वितीयाद् भवति, ननु मनः कल्पितं च द्वितीयम्
तेनैक्याभ्यासशीलो, हृदयमिह यथा, शक्ति बुद्ध्या निरुन्ध्याम्
मायाविद्धे तु तस्मिन्, पुनरपि न तथा, भाति मायाधिनाथम्
तं त्वां भक्त्या महत्या, सततमनु-भजन्, ईशभीतिं विजह्याम् ॥

भक्तेरुत्पत्ति-वृद्धी, तव चरणजुषां, सङ्गमेनैव पुंसाम्
आसाद्ये पुण्यभाजां, श्रिय इव जगति, श्रीमतां सङ्गमेन ।
तत्सङ्गो देव भूयान्, मम खलु सततं, तन्मुखाद् उन्मिषद्भिः
त्वन्माहात्म्य-प्रकारैः, भवति च सुदृढा, भक्ति-रुद्धूतपापा ॥ ४ ॥

श्रेयोमार्गेषु , भक्तावधिक-बहुमतिर्, जन्म-कर्माणि भूयो

गायन्क्षेमाणि नामान् यपि तदुभयतः, प्रद्रुतं प्रद्रुतात्मा
उद्यद्धासः कदचित्, कुहचिदपि रुदन् ,क्वापि गर्जन्प्रगायन्
उन्मादीव प्रनृत्यन्, अयि कुरु करुणां, लोक-बाह्यश्चरेयम्॥५॥

भूतान्येतानि, भूतात्मक-मपि सकलं, पक्षिमत्स्यान्-मृगादीन्
मर्त्यान्-मित्राणि शत्रूनपि, यमितमतिः, त्वन्मयान्यानमानि
त्वत्सेवायां हि सिध्येन्, मम तव कृपया, भक्ति-दार्ढ्यं विरागः
त्वत्तत्वस्याव-बोधोऽपि च, भुवनपते, यत्नभेदं विनैव ॥ ६॥

नो मुह्यन्क्षुत्-तृडाद्यैः, भवसरणि-भवैः, त्वन्नि-लीनाशयत्वात्
च्चिन्तासातत्य-शाली, निमिष-लवमपि, त्वत्पदाद्-प्रकम्पः ।
इष्टानिष्टेषु, तुष्टिव्यसन-विरहितो, मायिकत्वा-वबोधात्
ज्योत्स्नाभिस्-त्वन्नखेन्दोः, अधिकशिशिरितेन, आत्मना सञ्चरेयम्॥

भूतेष्वेषु त्वदैक्यस्मृति-समधिगतौ, नाधि-कारोऽधुना चेत्
त्वत्प्रेम-त्वत्कमैत्री, जडमतिषु कृपा, द्-विट्-सु भूयादुपेक्षा ।
अर्चायां वा समर्चा, कुतुकमुरुतर, श्रद्धया-वर्धतां मे
त्वत्संसेवी तथापि, द्रुतमुप-लभते, भक्त-लोकोत्तमत्वम् ॥ ८॥

आवृत्य त्वत्स्वरूपं, क्षितिजलमरुदाद्, आत्मना विक्षिपन्ती
जीवान्भूयिष्ठ-कर्मावलि, विवशगतीन्, दुःखजाले क्षिपन्ती ।
त्वन्माया माभिभून्माम्, अयि भुवनपते, कल्पते तत्प्रशान्त्यै
त्वत्पादे भक्तिरेवे त्यवददयि विभो, सिद्धयोगी प्रबुद्धः ॥ ९॥

दुःखान्यालोक्य, जन्तुष्-वलमुदित-विवेकोऽहम् आ**चा**र्यवर्याल्-

लब्ध्वा त्वद्रूपतत्वम्, गुणचरितकथाः, उद्-भवत्भक्ति**भू**मा ।

मायामेनां तरित्वा, परमसुखमये, त्वत्प**दे** मोदि**ता**हे

तस्यायं पूर्वरङ्गः, पवनपुरपते, नाश**या**शेष-**रो**गान्॥ १०॥ श्री हरये नमः।

इति भक्तिस्वरूपवर्णनं एकनवतितमदशकं समाप्तम्॥

## द्विनवतितम दशकम् - 92

## कर्म मिश्र भक्तिः

**Tune – Sandra**

वेदैःसर्वाणि कर्माण्यफल-परतया, वर्णिता**नी**ति बु**ध्वा**

तानि त्वय्यर्पितान्येव हि, समनुचरन्, यानि नैष्कर्म्य**मी**श ।

मा भूद्-वेदैर्-निषिद्धे, कुहचिदपि मनः, कर्मवा**चाः** प्रवृ**त्तिः**

दुर्वर्जं चेद**वा**प्तं, तदपि खलु भवत्, अर्प**ये** चित्प्र**का**शे ॥

यस्त्वन्यः कर्मयोगः, तव भजनमयः तत्र चा**भी**ष्टमूर्ति**म्**

हृद्यां सत्वैक**रूपां**, दृषदि हृदि मृदि, क्वापि **वा** भावयि**त्वा**

पुष्पैर्-गन्धैर्-निवेध्यैः,अपि च विरचितैः, शक्ति**तो** भक्ति**पू**तैः

नित्यं वर्यां सपर्यां, विदध-दयि विभो, त्वत्प्रसा**दं** भ**जे**यम् ॥२॥

स्त्रीशूद्रा-स्त्वत्कथादि, श्रवण-विरहिता, आस**तां** ते दया**र्हाः**

त्वत्पादा-सन्न**याता**न्, द्विजकुलजनुषो, हन्त शो**चा**म्य**शान्ता**न्

वृत्यर्थं ते यजन्तो, बहुकथितमपि, त्वाम**ना**-कर्ण-य**न्तो**

दृप्ता विद्याभिजात्यैः, किमु न विदधते, तादृशम् मा कृथामाम्॥

पपोऽयं कृष्ण रामेत्यभिलपति, निजं गूहितुं दुश्चरित्रम्
निर्-लज्जस्यास्य वाचा, बहुतरकथनी यानि मे विघ्नितानि ।
भ्राता मे वन्ध्यशीलो, भजति किल सदा, विष्णुमित्थं बुधांस्ते
निन्दन्त्युच्चैर्-हसन्ति, त्वयि निहितमतीं, तादृशं मा कृथामाम् ॥

श्वेतच्छायं कृते त्वां, मुनिवरवपुषं, प्रीणयन्ते तपोभिः
स्त्रेतायां स्रुक्स्रु-वाद्यङ्कितम् , अरुणतनुं, यज्ञरूपं यजन्ते
सेवन्ते तन्त्र-मार्गैर्, विलसदरिगदं, द्वापरे श्यामळाङ्गम्
नीलं सङ्कीर्-तनाद्यैः, इह कलिसमये, मानुषास्त्वां भजन्ते॥ ५॥

सोऽयं कालेयकालो, जयति मुररिपो, यत्र सङ्कीर्तनाद्यैः
निर्यत्नैरेव मार्गैः, अखिलद नचिरात् , त्वत्-प्रसादं भजन्ते ।
जातास्त्रेता-कृतादौ, अपि हि किल कलौ, सम्भवं कामयन्ते
दैवात्तत्रैव जातान्, विषय-विषरसैर्, माविभो वञ्चयास्मान्॥ ६॥

भक्तास्तावत्-कलौ स्युः, द्रमिळभुवि ततो, भूरिशस्तत्र चोच्चैः
कावेरीं ताम्रपर्णीम्, अनुकिल धृतमालाञ्च, पुण्यां प्रतीचीम् ।
हा मामप्येतदन्तर् , भवमपि च विभो, किञ्चिदञ्चि-द्रसं त्वयि
आशापाशैर्-निबध्य, भ्रमय न भगवन्, पूरय त्वन्निषेवाम्॥ ७॥

दृष्ट्वा धर्मद्रुहं तं, कलिमपकरुणं, प्राङ्-महीक्षित्परीक्षि
अन्तुं व्याकृष्ट खड्गोऽपि न विनीहतवान्, सारवेदी गुणांशात् ।

त्वत्सेवाद्याशु सिध्ये, असदिह न तथा, त्वत्प**रे** चैष भी**रुः**

यत्तु प्रागेव रो**गा**दिभिरपहरते, तत्र **हा** शिक्ष**यै**नम् ॥ ८॥

ग**ङ्गा** गीता च, गायत्र्यपि च, तुलसि**का** गोपि**का**-चन्दनं तत्

साल-ग्रामाभि-पू**जा**, परपुरुष, तथैकाद**शी** नामव**र्णाः** ।

एतान्यष्टाप्ययत्नान्, अयि कलिसमये, त्वत्प्रसाद-प्रवृ**द्ध्या**

क्षिप्रं मुक्ति-प्र**दा**नीत् , यभिदधुर् ऋषयः तेषु **मां** सज्जये**थाः**॥ ९॥

देवर्षीणां पितृणामपि च, न पुनः ऋणी, किङ्**रो** वा स भूम**न्**

योऽसौ सर्वात्म**ना** **त्वां**, शरण-मुपगतः, सर्व-कृ**त्या**नि हि**त्वा**

तस्योत्पन्नं विकर्-माप्यखिल, अपनुद**स्ये**व चित्त-स्थितस्त्वम्

तन्मे पापोत्थ-तापान्, पवनपुरपते, रुन्दि भक्तिं प्रणी**याः**॥ १०॥श्री हरये नमः।

इति कर्ममिश्रभक्तिस्वरूपवर्णनं द्विनवतितमदशकं समाप्तम्॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

## त्रीनवतितम दशकम् -93

---

चतुर्विम्शतिःगुरवः

**Tune - Sandra**

बन्धुस्नेहं विजह्यां, तव हि करुणया, त्वय्यु-**पा**वेशि**ता**त्मा

सर्वं त्वक्त्वा च**रे**यं, सकलमपि जगद्, वीक्ष्य मा**या**वि**ला**सम् ।

नानात्वाद्-भ्रान्तिजन्यात्, सति खलु गुणदोषावबो**धे** विधि**र्वा**

व्यासेधो वा कथं <u>**तौ**</u>, त्वयि निहितमतेर्-वीत-वैषम्य-बु<u>**द्धेः**</u>॥१॥

क्षुत्तृष्णालोपमात्रे, सततकृतधियो, जन्तवस् सन्त्यन<u>**न्ताः**</u>

स्तेभ्यो विज्ञानव<u>**त्वा**</u>त्, पुरुष इह वरः, तज्जनि<u>**र्**</u>-दुर्ल<u>**भै**</u>व ।

तत्राप्यात्मा-आत्मनःस्यास्, सुहृदपि च रिपुर् ,यस्त्व<u>**यि**</u> न्यस्तचे<u>**ताः**</u>

तापोच्छित्तेरु<u>**पा**</u>यं, स्मरति स हि सुहृत् , स्वात्मवै<u>**री**</u> ततोऽ<u>**न्यः**</u> ॥२॥

त्वत्कारुण्ये प्रवृत्ते, क इव न हि गुरुर्, लोक-वृ<u>**त्ते**</u><u>**ऽ**</u>पि भूमन्

सर्वाक्रान्तापि भूमिर् , नहि चलति ततः, सत्क्ष<u>**मां**</u> शिक्ष<u>**ये**</u>यम्

गृह्णीयामीश तत्तद् , विषयपरिचितेऽपि, अप्रस<u>**क्तिं**</u> समी<u>**रा**</u>द्

व्याप्तत्-वच्चात्म<u>**नो**</u> मे, गगन-गुरुवशाद्,भातु नि<u>**र्ले**</u>प<u>**ता**</u> च॥३ ॥

स्वच्छः स्यां पावनोऽहं, मधुर उदकवद्, वह्निव<u>**न्मा**</u> स्म गृ<u>**ह्णा**</u>म्

सर्वान्नीनोऽपि <u>**दो**</u>षं तरुषु तमिव मां, सर्व-भू<u>**ते**</u>ष्व<u>**वेया**</u>म् ।

पुष्टिर्-नष्टिःकलानां, शशिन इव तनोर्, नात्म<u>**नोऽ**</u>स्तीति वि<u>**द्या**</u>म्

तोयादिव्यस्त-मार्ताण्डवदपि च, तनुष्वेक<u>**तां**</u> त्वत्-प्र<u>**सादा**</u>त् ॥४॥

स्नेहाद्-व्याधास्तपुत्र प्रणयमृत, कपोतायितो <u>**मा**</u> स्म भूवम्

प्राप्तं प्राश्नन्सह<u>**हे**</u>य, क्षुधमपि शयुवत्, सिन्धु-व<u>**त्स्या**</u>म-गाधः।

मा पप्तं योषिदादौ, शिखिनि शलभवद्, भृङ्गवत्सार<u>**भा**</u>गी

भूयासं किन्तु तद्-वद् ,धनचयनवशान्, माहमीश प्र<u>**णे**</u>शम् ॥५ ॥

मा बध्यासं तरुण्या, गज इव वशया, नार्जये<u>**यं**</u> धनौ<u>**घम्**</u>

हर्तान्यस्तं हि <u>**मा**</u>ध्वी, हर इव मृगवन्, मा गुहं ग्राम्यगी<u>**तैः**</u> ।

नात्यासज्जेय भोज्ये, झष इव बडिशे, पिङ्गळा-वन्निराशः
सुप्यां भर्तव्ययोगात् , कुरर इव विभो, सामि-षोऽन्यैर्न हन्यै ॥

वर्तेय त्यक्तमानः, सुखमति-शिशुवन्, निस्सहायश्चरेयम्
कन्याया एकशेषो, वलय इव विभो, वर्जितान्योन्यघोषः ।
त्वच्चित्तो नावबुध्यै, परमि-षुकृदिव, क्ष्माभृदायान-घोषम्
गेहेष्वन्य-प्रणीतेषु, अहिरिव निवसान्, युन्दुरोर्-मन्दिरेषु॥ ७॥

त्वय्येव त्वत्कृतं त्वं, क्षपयसि जगदित्यूर्ण, नाभात्-प्रतीयाम्
त्वच्चिन्ता त्वत्स्वरूपं, कुरुत इति दृढं, शिक्षये पेशकारात् ।
विड्-भस्मात्मा च देहो, भवति गुरुवरो, यो विवेकं विरक्तिम्
धत्ते सञ्चिन्त्यमानो, मम तु बहुरुजा,पीडितोऽयं विशेषात्॥ ८॥

ही ही मे देहमोहं त्यज, पवनपुराधीश, यत्प्रेम-हेतोः
गेहे वित्ते कलत्रादिषु च, विवशिताः, त्वत्पदं विस्मरन्ति ।
सोऽयं वह्नेः शुनो वा, परमिह परतः, साम्प्रतश्चाक्षि-कर्ण
त्वग्-जिह्-वाद्या विकर्षन्, त्यवशमत इतः, कोऽपि न त्वत्पदाब्जे॥

दुर्वारो देहमोहो, यदि पुनरधुना, तर्हि निश्शेष-रोगान्
हृत्वा भक्तिं द्रढिष्ठां, कुरु तव पद पङ्केरुहे पङ्कजाक्ष ।
नूनम् नानाभवान्ते, समधिगतमिमं, मुक्तिदं विप्र-देहम्
क्षुद्रे हा हन्त मा मा क्षिप विषयरसे, पाहि मां मारुतेश ॥ १०॥ श्री हरये नमः।

इति गुरुशिक्षावर्णनं त्रिनवतितमदशकं समाप्तम्॥

## तत्वज्ञान उत्पतीः

Tune - Sandra

शुद्धा निष्कामधर्मैः, प्रवर-गुरुगिरा, तत्स्वरूपं परंते
शुद्धं देहेन्द्रियादि, व्यपगत-मखिल, व्याप्तमा-वेदयन्ते।
नानात्वस्थौल्य, कार्श्यादि तु गुणजवपुः, सङ्गतोऽध्यासितं ते
वह्नेर्-दारुप्रभेदेष्विव, महदणुता-दीप्तता, शान्त-तादि॥ १ ॥

आचार्याख्या-धरस्थारणि, समनुमिलच्,छिष्यरूपोत्तरारण्य
आवेधोद्-भासितेन स्फुटतर-परिबोधाग्निना, दह्यमाने ।
कर्मालीवासना तत्कृत, तनुभुवन, भ्रान्ति-कान्तारपूरे
दाह्याभावेन विद्याशिखिनि च विरते, त्वन्मयी खल्ववस्था॥ २॥

एवं त्वत्प्राप्ति-तोऽन्यो, नहि खलु निखिल, क्लेशहाने-रुपायो
नैकान्तात्यन्ति-कास्ते, कृषि-वदगद, षाड्गुण्य-षड्कर्मयोगाः
दुर्वैकल्यैरकल्या, अपि निगमपथाः, तत्फलान्-यप्यवाप्ता
मत्तास्त्वां विस्मरन्तः, प्रसजति पतने,यान्त्यनन्तान्विषादान् ॥

त्वल्लोकादन्य-लोकः, क्वनु भय-रहितो, यत्परार्धद्-वयान्ते
त्वद्-भीतस्सत्यलोकेऽपि न, सुखवसतिः, पद्मभूः पद्मनाभ ।
एवम्भावे त्वधर्मार्-जित, बहुतमसां, का कथा नारकाणाम्
तन्मे त्वं छिन्धि बन्धं↓, वरद कृपणबन्धो, कृपापूरसिन्धो॥ ४॥

याथार्थ्या-त्वन्मयस्यैव हि, मम न विभो, वस्तुतो बन्ध-मोक्षौ

मायाविद्या-तनुभ्यां, तव तु विरचितौ, स्वप्नबोधो-पमौ तौ
बद्धे जीवद्वि-मुक्तिं, गतवति च भिदा, तावती तावदेको
भुङ्क्ते देहद्रुमस्थो, विषय-फलरसान्, नापरो निर्व्यथात्मा ॥५॥

जीवन्मुक्त-त्वमेवं, विधमिति वचसा, किं फलं दूर-दूरे
तन्नामा-शुद्धबुद्धेर् , न च लघु मनसः, शोधनं भक्ति-तोऽन्यत्
तन्मे विष्णो कृषीष्ठाः, त्वयि कृतसकल, प्रार्पणं भक्तिभारम्
येन स्यां मङ्क्षु किञ्चिद् , गुरुवचनमिलत् , त्वत्प्रबोधस्त्वदात्मा॥

शब्द-ब्रह्मण्यपीह, प्रयतितमनसः, त्वां न जानन्ति केचित्
कष्टं बन्ध्यश्रमास्ते, चिरतरमिह, गां बिभ्रते निष्प्रसूतिम्।
यस्यां विश्वाभिरामाः, सकलमलहरा, दिव्यलीलावताराः
सच्चित्सान्द्रं च रूपं, तव न निगदितं, तां न वाचं भ्रियासम्॥ ७॥

यो यावान्यादृशो वा, त्वमिति किमपि, नैवावगच्छामि भूमन्
एवञ्चानन्यभावः , त्वदनु-भजन मेवाद्रिये चैद्यवैरिन् ।
त्वल्लिङ्गानां त्वदङ्घ्रिप्रिय, जनसदसां, दर्शनस्पर्शनादिः
भूयान्मे त्वत्प्रपूजा, नतिनुतिगुण, कर्मानु-कीर्त्यादरोऽपि ॥ ८॥

यद्यल्-लभ्येत, तत्तत् तव समुपहृतं, देव दासोऽस्मि तेऽहम्
त्वद्-गेहोन्मार्जनाद्यं, भवतु मम मुहुः, कर्म निर्मायमेव ।
सूर्याग्नि-ब्राह्मणात् मादिषु, लसितचतुर्बाहुम् आराधये त्वाम्
त्वत्प्रेमार्-द्रत्वरूपो, मम सतत-मभिष्यन्दतां भक्ति-योगः॥९॥

ऐक्यं ते दान-होम व्रत-नियमतपः, साङ्ख्य-यो**गै**र्-दुरापम्

त्वत्सङ्गेनैव गोप्यः, किल सुकृततमाः, प्रापुरानन्द-**सा**न्द्रम् ।

भक्तेष्वन्येषु, भूयस्स्वपि बहुमनुषे, भक्तिमेव त्व**मासा**म्

तन्मे त्वद्-भक्ति**मे**व, दृढय हर गदान्, कृष्ण वातालये**श**॥१०॥श्री हरये नमः।

इति तत्व-ज्ञानोत्पत्ति-प्रकारादि-वर्णनं समाप्तम्॥

## पञ्च नवतितम दशकम् -95

---

## ध्यान योगः

**Tune - Sandra**

आदौ हैरण्यगर्भी, तनुमविकल जी**वा**त्मिका-मास्थि-तस्त्व**म्**

जीवत्वं प्राप्य **माया**, गुणगण-खचितो, वर्त**से** विश्व**यो**ने

तत्रोद्-वृद्धेन, सत्वेन तु गुणयुगळं, भक्तिभा**वं** ग**ते**न

छित्वा सत्वम् च हि**त्वा**, पुनरनुपहितो, वर्तिता**हे** त्व**मे**व॥ १॥

सत्वोन्मेषात्-कदाचित्, खलु विषयरसे, दोषबो**धेऽ**पि-भूम**न्**

भूयोऽप्येषु प्रवृत्तिः, सतमसि रजसि, प्रोद्ध**ते** दुर्नि**वारा** ।

चित्तं तावद्-गुणाश्च, ग्रथितमिह मिथस्तानि, स**र्वा**णि रोद्धु**म्**

तुर्ये त्वय्येकभक्तिः, शरणमिति भवान्, हम्सरू**पी** न्य**गादी**त्॥

सन्ति श्रेयांसि, भूयांस्यपि रुचिभिदया, कर्मि**णां** निर्मि**ता**नि

क्षुद्रानन्दाश्च **सा**न्ता, बहुविध-गतयः, कृष्ण ते**भ्यो** भवे**युः** ।

त्वञ्चा-आख्याथ सख्ये, ननु महिततमां, श्रेय**सां** भक्ति-**मेका**म्

त्वद्भक्त्यानन्दतुल्यः,खलु विषयजुषां,सम्मदः केन वा स्यात्॥

त्वद्-भक्त्या तुष्टबुद्धेः, सुख-मिह चरतो, विच्युताशस्य चाशाः
सर्वास्युः सौख्य-मय्यः, सलिलकुह-रगस्येव, तोयैकमय्यः
सोऽयं खल्विन्द्र-लोकं, कमलज-भवनं, योगसिद्धीश्चहृद्या
नाकाङ्क्षत्येत-दास्तां, स्वय-मनुपतिते, मोक्ष-सौख्येऽप्यनीहः

त्वद्भक्तो बाध्यमानोऽपि च, विषयरसैर्, इन्द्रियाशान्ति-हेतोः
भक्त्यैवाक्रम्यमाणैः, पुनरपि खलु तैर्, दुर्-बलैर् नाभिजय्यः
सप्तार्-चिर्-दीपितार्-चिर् ,दहति किल यथा, भूरिदारुप्रपञ्चम्
त्वद्-भक्त्योघे तथैव, प्रदहति दुरितं, दुर्मदः क्वेन्द्रियाणाम्॥ ५॥

चित्तार्-द्री भावमुच्चैः, वपुषि च पुलकं, हर्ष-बाष्पञ्च हित्वा
चित्तं शुद्ध्येत्कथं वा, किमु बहुतपसा, विद्यया वीत-भक्तेः ।
त्वद्-गाथास्वाद, सिद्धाञ्जनसत-तमरी, मृज्यमानोऽय-मात्मा
चक्षुर्-वतत्वसूक्ष्मं,भजति न तु तथा,अभ्यस्तया तर्ककोट्या॥

ध्यानं ते शीलयेयं, समतनु-सुख-बद्धासनो नासि-काग्र
न्यस्ताक्षः पूरकाद्यैः, जित-पवनपथ, चित्त-पद्मम्-त्ववाञ्चम्
ऊर्ध्वाग्रं भावयित्वा, रविविधुशिखिनस्, सम्विचिन्त्योपरिष्टात्
तत्रस्थं भावये त्वां, सजल-जलधर,श्यामळं कोमळाङ्गम्॥७ ॥

आनीलश्लक्ष्णकेशं, ज्वलितमकर सत्, कुण्डलं मन्दहास
स्यन्दार्द्रं -कौस्तुभश्री, परिगत, वनमालोरु-हाराभिरामम् ।

श्रीवत्साङ्कं सुबाहुं, मृदुल-सदुदरं, काञ्चनच्छाय-**चे**लम्

चारुस्निग्धोरुमम्भोरुह, ललितपदं, भावये**हं** भव**न्त**म् ॥ ८॥

सर्वाङ्गेष्वङ्ग-रङ्गत्कुतुकमति, मुहुर्-धारय**न्नी**श चित्तम्

तत्राप्येकत्र-युञ्जे, वदन-सरसिजे, सुन्द**रे** मन्द**हा**से ।

तत्रालीनन्तु चेतः, परमसुख चिदद्वैतरू**पे** वितन्वन्

अन्यन्नो चिन्तयेयं, मुहुरिति समुपारूढ यो**गो** भ**वे**यम् ॥ ९॥

इत्थं त्वद्-ध्यानयोगे, सति पुनरणि**मा**द्यष्ट-संसि**द्ध**य**स्ता**

दूरश्रुत्यादयोऽपि, ह्यमहमिकया, सम्पतेयु**र्**-मु**रा**रे ।

त्वत्सम्प्राप्तौ विलम्बावहम् ,अखिलमिदं, नाद्रि**ये** काम**येऽ**हम्

त्वामेवानन्दपूर्णं, पवनपुरपते, पाहि **मां** सर्व**ता**पात् ॥ १०॥ श्री हरये नमः।

इति भगवत्स्वरूप-ध्यानयोग्यता-वर्णनं पञ्चनवतितमदशकं समाप्तम्॥

## षण्णवतितम दशकम् -96

## भगवत् विभूतयः ज्ञान कर्म भक्ति योगः च

**Tune - Sandra**

त्वं हि ब्रह्मैव साक्षात् , परमुरु-महिमन्, अक्षरा**णा**मका**रः**

तारो मन्त्रेषु **रा**ज्ञां, मनुरसि मुनिषु त्वं भृगुर्-नार**दो**ऽपि ।

प्रह्लादो दानवानां, पशुषु च सुरभिः, पक्षि**णां** वैनते**यो**

नागानामस्यनन्तः, सुरसरिदपि च, स्रोत**सां** विश्व**मू**र्ते॥ १ ॥

ब्रह्मण्यानां बलिस्त्वम्, क्रतुषु च जपयज्ञोऽपि, वी**रे**षु पा**र्थो**

भक्तानां उद्धवस्त्वम्, बलमसि बलिनां, धाम तेजस्विनां त्वम्

नास्त्यन्तस्त्वद्-विभूतेः, विकसदतिशयं, वस्तु सर्वं त्वमेव

त्वं जीवस्त्वं प्रधानं, यदिह भवदृते, तन्न किञ्चित्प्रपञ्चे॥ २ ॥

धर्मं वर्णाश्रमाणां, श्रुति-पथविहितं, त्वत्-परत्वेन भक्त्या

कुर्वन्तोऽन्तर्-विरागे, विकसति शनकैः, सन्त्यजन्तो लभन्ते

सत्तास्फूर्ति-प्रियत्वात्मकं, अखिल-पदार्थेषु, भिन्नेष्व-भिन्नम्

निर्मूलं विश्वमूलं, परममहमिति, त्वत्-विबोधं विशुद्धम्॥ ३॥

ज्ञानं कर्मापि भक्तिः त्रितयमिह, भवत्प्रापकं तत्र तावन्

निर्विण्णानामशेषे, विषय इह भवेत्, ज्ञानयोगेऽधिकारः

सक्तानां कर्मयोगः, त्वयि हि विनिहितो, ये तु नात्यन्त-सक्ता

नाप्यत्यन्तं विरक्ताः, त्वयि च धृत, भक्तियोगो ह्यमीषाम्॥ ४॥

ज्ञानं त्वद्-भक्ततां वा, लघु सुकृतवशान्, मर्त्यलोके लभन्ते

तस्मात्-तत्रैव जन्म, स्पृहयति भगवन्, नाकगो नारको वा

आविष्टं मां तु दैवाद्, भवजलनिधि, पोतायिते मर्त्यदेहे

त्वं कृत्वा कर्णधारं, गुरुमनुगुण वातायितस्-तारयेथाः॥ ५॥

अव्यक्तं मार्गयन्तः, श्रुति-भिरपि नयैः, केवलज्ञान-लुब्धाः

क्लिश्यन्तेऽतीव सिद्धिं, बहुतर-जनुषां, अन्त एवाप्नुवन्ति

दूरस्थः कर्मयोगोऽपि च, परमफले नन्वयं भक्तियोगः

त्वामूलादेव हृद्यः, त्वरितमयि भवत्, प्रापको वर्धतां मे ॥ ६॥

**The above sloka 6 is equalent to Vishwarupa darshanam in Bhagawat Gita**

ज्ञानायैवाति-यत्नं, मुनिरपवदते, ब्रह्मतत्वम् तु श्रुण्वन्

गाढं त्वत्पादभक्तिं, शरणमयति यः, तस्य मुक्तिः कराग्रे ।

त्वद्-ध्यानेऽपीह तुल्या, पुनरसुकरता, चित्त-चाञ्चल्यहेतो

अभ्या-सादाशु शक्यं, ददपि वशयितुं, त्वत्कृपा-चारुताभ्याम् ॥

निर्विण्णः कर्ममार्गे, खलु विषमतमे, त्वत्कथादौ च गाढम्

जातश्रद्धोऽपि कामान् , अयि भुवनपते, नैव शक्नोमि हातुम्

तद्भूयो निश्चयेन, त्वयि निहित-मना, दोष-बुध्या भजंस्तान्

पुष्णीयां भक्तिमेव, त्वयि हृदयगते, मङ्क्षु नङ्क्ष्यन्ति सङ्गाः॥ ८॥

कश्चित्क्लेशार्जितार्थ, क्षयविमलमतिर्, नुद्यमानो जनौघैः

प्रागेवं प्राह विप्रो, न खलु मम जनः, कालकर्म-ग्रहा वा ।

चेतो मे दुःख-हेतुः, तदिह गुणगणं, भावयत्-सर्वकारीति

उक्त्वा शान्तो गतस्त्वां, मम च कुरु विभो, तादृशीं चित्तशान्तिम् ॥

ऐलः प्रागुर्वशीं, प्रत्यतिविवशमनाः, सेवमानश्चिरं ताम्

गाढं निर्विद्य भूयो, युवति-सुखमिदं, क्षुद्रमेवेति गायन्

त्वद्-भक्तिं प्राप्य पूर्णः, सुखतरमचरत्, तद्-वदुद्धूत सङ्गम्

भक्तोत्तम्सम् क्रिया मां, पवनपुरपते, हन्त मे रुन्धिरोगान्॥ **श्री हरये नमः।**

इति भगवद्विभूति-वर्णनादि षन्नवतितमदशकं समाप्तम्॥

## उत्तम भक्ति प्रार्थना, मार्कण्डेय कथा च

**Tune - Sandra**

त्रैगुण्याद्-भिन्नरूपं, भवति हि भुवने, हीनमध्योत्तमं यत्
ज्ञानं श्रद्धा च कर्ता, वसति-रपि सुखं, कर्म चाहारभेदाः ।
त्वत्क्षेत्र-त्वन्निषेवादि तु, यदिह पुनः, त्वत्परं तत्तु सर्वम्
प्राहुर्-नैर्-गुण्यनिष्ठं, तदनुभजनतो, मङ्क्षु सिद्धो भवेयम्॥ १॥

त्वय्येव न्यस्तचित्तः, सुखमयि विचरन् , सर्व-चेष्टास्त्वदर्थम्
त्वद्-भक्तैस्सेव्यमानानपि चरितचरान्, आश्रयन् पुण्यदेशान्
दस्यौ विप्रे मृगादिष्वपि च, सममतिर्, उच्चमानावमान
स्पर्धासूयादि-दोषः, सततमखिल-भूतेषु, सम्पूजये त्वाम्॥ २॥

त्वद्-भावो यावदेषु, स्फुरति न विशदं, तावदेवं ह्युपास्तिम्
कुर्वन्नैकात्म्यबोधे, झटिति विकसति, त्वन्मयोऽहं चरेयम्
त्वद्धर्मस्यास्य तावत्, किमपि न भगवन्, प्रस्तुतस्य प्रणाशः
तस्मात्-सर्वात्मनैव, प्रदिश मम विभो, भक्तिमार्गं मनोज्ञम्॥ ३॥

तं चैनं भक्तियोगं, द्रढयितुमयि मे, साध्यमारोग्य-मायुः
दिष्ट्या तत्रापि सेव्यं, तव चरणमहो, भेषजायेव दुग्धम् ।
मार्कण्डेयो हि पूर्वं, गणकनिगदित, द्वादशाब्दायु-रुच्चैः
सेवित्वा वत्सरं त्वां, तव भटनिवहैर्, द्रावयामास मृत्युम्॥ ४॥

मार्कण्डेयश्चिरायुः, स खलु पुनरपि, त्वत्परः पुष्पभद्रा

तीरे निन्ये तपस्यन्, अतुल-सुखरतिः, षट् तु मन्वन्तराणि ।
देवेन्द्रस्-सप्तमस्त्वं, सुरयुवतिमरून्, मन्मथैर्-मोहयिष्यन्
योगोष्-मप्लुष्यमाणैर्, नतु पुनर-शकत्, त्वज्जनं निर्जयेत् कः

प्रीत्या नारायणाख्यः, त्वमथ नर-सखः, प्राप्त-वानस्य पार्श्वम्
तुष्ट्या तोष्टूयमानः, स तु विविध-वरैर्, लोभितो नानुमेने
द्रष्टुं मायां त्वदीयां, किल पुनरवृणोद्, भक्ति-तृप्तान्तरात्मा
माया-दुःखानभिज्ञः, तदपि मृगयते, नूनमाश्चर्य-हेतोः ॥ ६ ॥

करारविन्देन पदारविन्दं, मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं, बालं मुकुन्दं मनसा स्मरामि ॥

याते त्वय्याशु, वाताकुलजल-दगळत् , तोयपूर्णाति-घूर्ण
सप्तार्णोराशि मग्ने, जगति स तु जले, सम्भ्रमन्-वर्षकोटीः ।
दीनः प्रैक्षिष्ट दूरे, वटदल-शयनं, कञ्चिदाश्चर्य-बालम्
त्वामेव श्यामळाङ्गं, वदनसरसिज, न्यस्तपादाङ्गुलीकम्॥ ७॥

दृष्ट्वा त्वां हृष्टरोमा, त्वरितमभिगतः, स्प्रष्टु-कामो मुनीन्द्रः
श्वासेनान्-तर्निविष्टः, पुनरिह सकलं, दृष्टवान् विष्टपौघम् ।
भूयोऽपि श्वासवातैर्, बहिरनुपतितो, वीक्षितस्-त्वत्कटाक्षैः
मोदा-दाश्लेष्टुकामः, स्त्वयि पिहिततनौ, स्वाश्रमे प्राग्वदासीत्

गौर्या सार्धं तदग्रे, पुरभिदथ गतः, त्वत्प्रिय-प्रेक्षणार्थी
सिद्धानेवास्य दत्वा, स्वयमयमजरा, मृत्यु-तादीन् गतोऽभूत्

एवं त्वत्-सेवयैव, स्मर-रिपुरपि स, प्रीय**ते** येन त**स्मा**न्

मूर्ति-त्रय्यात्-मकस्त्वं, ननु सकल-नियन्तेति, सुव्यक्त**मासी**त्

त्र्यंशेऽस्मिन्-सत्यलोके, विधिहरि-पुरभिन्, मन्दि**रा**ण्-यूर्ध्वमूर्ध्व**म्**

तेभ्योऽप्यूर्ध्वं तु **मा**या, विकृति-विरहितो, भाति वैकुण्ठ-लो**कः** ।

तत्र त्वं कारणाम्भस्यपि, पशुपकुले, शुद्ध-स**त्वै**क-**रू**पी

सच्चिद्-ब्रह्माद्-व**या**त्मा, पवनपुरपते, पाहि **मां** सर्व**रोगा**त्॥ १०॥श्री हरये नमः।

इत्युत्तमभक्तिप्राथनामार्कण्डेयोपाख्यानं च सप्तनवतितमदशकं समाप्तम्॥

## अष्टनवतितम दशकम् -98

## निष्कल ब्रह्म उपासनम्

**Tune - Sandra**

यस्मिन्नेतद्-विभातं, यत इदमभवद्, येन चे**दं** य एतद्

योऽस्मादुत्तीर्णरूपः, खलु सकलमिदं, भासि**तं** यस्य **भासा** ।

यो वाचां दूरदूरे, पुनरपि मनसां, यस्य दे**वा** मुनी**न्द्रा**

नो विद्युस्-तत्वरूपं, किमु पुनरपरे, कृष्ण त**स्मै** नम**स्ते**॥ १॥ **श्रीगुरुवायुरप्पा शरणम्॥**

जन्माथो कर्म नाम, स्फुटमिह गुणदोषादिकं, वा न य**स्मिन्**

लोकानामूतये यः, स्वयमनु-भजते, तानि मा**या**नु**सा**री ।

बिभ्रच्छक्तीररूपोऽपि च, बहुतररूपोऽव-भात्यद्-उ**ता**त्मा

तस्मै कैवल्य**धा**म्ने, पररस-परिपूर्णाय वि**ष्णो** नमस्ते ॥ २ ॥ **श्रीगुरुवायुरप्पा शरणम्॥**

नो तिर्यञ्च**न्न म**र्त्यं, न च सुरमसुरं, न स्त्रियं नो पु**मां**स**म्**

न द्रव्यं कर्म जातिं, गुणमपि सदसद्वापि <u>ते</u>, रूपमा<u>हुः</u> ।

शिष्टं यत्स्यान्निषेधे, सति निगमशतैर्, लक्ष<u>णा</u>वृत्ति-तस्तत्

कृच्छ्रेणावेद्य<u>मा</u>नं, परमसुखमयं, भाति त<u>स्मै</u> नमस्ते ॥ ३॥ श्रीगुरुवायुरप्पा शरणम्॥

मायायां बिम्बितस्त्वं, सृजसि महदहङ्कार त<u>न्मा</u>त्रभे<u>दैः</u>

भूतग्रामेन्द्रियादैः, अपि सकल जगत्, स्वप्नस<u>ङ्क</u>ल्प-कल्प<u>म्</u> ।

भूयः संहृत्य सर्वं, कमठ इव पदान्, यात्म<u>ना</u> काल-श<u>क्त्या</u>

गम्भीरे जाय<u>मा</u>ने, तमसि वितिमिरो, भासित<u>स्मै</u> नम<u>स्ते</u> ॥ ४॥ श्रीगुरुवायुरप्पा शरणम्॥

शब्दब्रह्मेति, कर्मेत् यणुरिति भगवन्, काल <u>इत्या</u>लपन्ति

त्वामेकं विश्व<u>हे</u>तुं, सकलमयतया, सर्व<u>था</u> कल्प्य<u>मा</u>नम् ।

वेदान्तैर्-यत्तु गीतं, पुरुषपरचि-दात्माभिधं तत्तु तत्व<u>म्</u>

प्रेक्षामात्रेण मूलप्रकृति-विकृतिकृत्, कृष्ण त<u>स्मै</u> नमस्ते॥ ५॥ श्रीगुरुवायुरप्पा शरणम्॥

सत्वेनासत्तया वा, न च खलु सदसत्वेन, नि<u>र्वा</u>च्य-रू<u>पा</u>

धत्ते यासावविद्या, गुण-फणिमतिवद् , विश्व-दृ<u>श्या</u>व-<u>भा</u>सम्

विद्यात्वं सैव याता, श्रुति-वचनलवैः, यत्कृ<u>पा</u>स्यन्द<u>ला</u>भे

संसारारण्य सद्यस् तृटन,परशुतामेति त<u>स्मै</u> नमस्ते ॥ ६॥ श्रीगुरुवायुरप्पा शरणम्॥

भूषासु स्वर्णवद्वा, जगति घटशरा ,वादि<u>के</u> मृत्तिकावत्

तत्वे सञ्चिन्त्य<u>मा</u>ने, स्फुरति तदधुनापि, अयद्वितीयं व<u>पु</u>स्ते ।

स्वप्नद्रष्टुः प्रबोधे, तिमिरलयविधौ, जीर्णर<u>ज्जो</u>श्च यद्-व<u>द्</u>

विद्यालाभे तथैव, स्फुटमपि विकसेत्, कृष्ण त<u>स्मै</u> नमस्ते॥ ७॥ श्रीगुरुवायुरप्पा शरणम्॥

यद्भीत्योदेति सूर्यो, दहति च दहनो, वाति वायुस्-त**था**न्ये

यद्भीताः पद्मजा**द्याः**, पुनरुचितबलीन् , आह**रन्तेऽ**नु**का**लम्

येनैवा-रोपिताः, प्राङ्-निजपदमपि ते, च्यावितारश्च प**श्चा**त्

तस्मै विश्वं नियन्त्रे, वयमपि भवते, कृष्ण कुर्मः प्र**णा**मम् ॥ ८॥ **श्रीगुरुवायुरप्पा शरणम्॥**

त्रैलोक्यं भावयन्तं, त्रिगुणमयमिदं, त्र्यक्ष-रस्यैक**वा**च्य**म्**

त्रीशानाम्-ऐक्यरूपं, त्रिभिरपि निग**मैः**, गीयमान-स्व**रू**पम् ।

तिस्रोऽवस्था विदन्तं, त्रियुगजनिजुषं, त्रिक्रमा**क्रा**न्त-विश्व**म्**

त्रैकाल्ये भेदहीनं, त्रिभिरहमनिशं, योगभेदै**र्**-भ**जे** **त्वा**म्॥ ९॥ **श्रीगुरुवायुरप्पा शरणम्॥**

सत्यं शुद्धं विबुद्धं, जयति तव वपुः, नित्य-मु**क्तं** नि**री**हम्

निर्-द्वन्द्वं निर्वि**का**रं, निखिलगुणगण, व्यञ्ज**ना**-धार-**भू**तम् ।

निर्मूलं निर्मलं तन् निरवधि, महिमो**ल्ला**सि, नि**र्ली**न-मन्तः

निस्सङ्गानां मु**नी**नां, निरुपम-परमानन्द, सान्द्र-प्र**का**शम्॥ १०॥ **श्रीगुरुवायुरप्पा शरणम्॥**

दुर्वारं द्वादशारं, त्रिशतपरिमिलत्, षष्टिप**र्वा**भिवीत**म्**

संभ्राम्यत्-क्रूर**वे**गं, क्षणमनु जगदाछिद्य, स**न्धा**व**मा**नम्

चक्रं ते कालरूपं, व्यथयतु न तु मां, त्वत्पदै**का**वलम्बम्

विष्णो कारुण्यसि**न्धो**, पवनपुरपते, पाहि सर्वामयौघात्॥ ११ **श्रीगुरुवायुरप्पा शरणम्॥**

श्री हरये नमः ।

इति ब्रह्मणोजगदुत्पत्यादिनिरूपणं अष्टनवतितमदशकं समाप्तम्॥

## वेद-स्तुतिः

**Tune - Sandra**

विष्णोर्-वीर्याणि को वा, कथयतु धरणेः, कश्च रे**णू**न्-मि**मी**ते

यस्यैवाङ्घ्रि-त्र**ये**ण, त्रिजगदभिमितं, मोद**ते** पूर्णस**म्प**त्

योऽसौ विश्वानि धत्ते, प्रियमिह परमं, धाम त**स्या**भिया**या**म्

तद्भक्ता यत्र माद्यन्, त्यमृतरसमरन्दस्य, यत्र प्रवाहः ॥ १॥

आद्यायाशेष-कर्त्रे, प्रति-निमिषनवीनाय, भ**र्त्रे** विभू**तेः**

भक्तात्मा विष्णवे यः, प्रदिशति हविरादीनि, यज्ञार्च**ना**दौ

कृष्णाद्यं जन्म योवा, महदिह महतो, वर्ण**ये**त्, सोऽय**मे**व

प्रीतः पूर्णो यशोदिः, त्वरित-मभिसरेत्, प्राप्यम**न्ते** प**दं** ते॥२॥

हे स्तोतारः कवीन्द्राः, तमिह खलु यथा, चेतय**ध्वे** तथैव

व्यक्तं वेदस्य **सा**रं, प्रणुवत जननो, पात्त-लीलाकथाभिः ।

जानन्तश्चास्य नामान्, अखिलसुख-कराणीति, स**ङ्की**र्तयध्वम्

हे विष्णो कीर्तनाद्यैः, तव खलु महतः, तत्वबो**धं** भ**जे**यम्॥ ३॥

विष्णोः कर्माणि सम्पश्यत, मनसि सदा, यैः स ध**र्मा**न-बध्नाद्

यानीन्द्रस्यैष भृत्यः, प्रियसख इव च, व्यात**नो**त्-क्षेम**का**री ।

वीक्षन्ते योगसिद्धाः, परपदमनिशं, यस्य सम्यक्-प्र**का**शम्

विप्रेन्द्रा जागरू**काः**, कृतबहु-नुतयो, यच्च नि**र्भा**स-य**न्ते** ॥ ४ ॥

नो जातो जायमानोऽपि च, समधिगतः, त्वन्महि**म्नोऽ**-वसान**म्**

देव श्रेयांसि विद्वान्, प्रतिमुहुरपि ते, नाम शंसामि विष्णो
तं त्वां संस्तौमि, नानाविधनुतिवचनैः, अस्य लोकत्रयस्यापि
ऊर्ध्वं विभ्राजमाने, विरचितवसतिं, तत्र वैकुण्ठ-लोके॥ ५ ॥

आपः सृष्ट्यादिजन्याः, प्रथममयि विभो, गर्भदेशे दधुस्त्वाम्
यत्र त्वय्येव जीवा, जलशयन हरे, सङ्गता ऐक्य-मापन् ।
तस्याजस्य प्रभो ते, विनिहितमभवत्, पद्ममेकं हि नाभौ
दिक्पत्रं यत्किलाहुः, कनकधरणिभृत्, कर्णिकं लोकरूपम्॥ ६ ॥

हे लोका विष्णुरेतद्, भुवनमजनयत्, तन्न जानीथ यूयम्
युष्माकं ह्यन्तरस्थं, किमपि तदपरं, विद्यते विष्णु-रूपम् ।
नीहारप्रख्य, माया परिवृतमनसो, मोहिता नामरूपैः
प्राणप्रीत्यैकतृप्ता, चरथ मखपरा, हन्त नेच्छा मुकुन्दे ॥ ७॥

मूर्धामक्षणां पदानां, वहसि खलु सहस्राणि सम्पूर्य विश्वम्
तत्प्रोत्-क्रम्यापि तिष्ठन्, परिमितविवरे, भासि चित्तान्तरेऽपि
भूतं भव्यं च सर्वं, परपुरुष भवान्, किञ्च देहेन्द्रियादिषु
आविष्टोप्युद्-गतत्वाद्, अमृतसुखरसं, चानुभुङ्क्षे त्वमेव॥ ८ ॥

यत्तु त्रैलोक्यरूपं, दधदपि च ततो, निर्गतानन्त-शुद्ध
ज्ञानात्मा वर्तसे त्वं, तव खलु महिमा, सोऽपि तावान्किमन्यत् ।
स्तोकस्ते भाग, एवा अखिल-भुवनतया, दृश्यते त्र्यंशकल्पम्
भूयिष्ठं सान्द्रमोदात्मकम्, उपरि ततो, भाति तस्मै नमस्ते॥ ९॥ श्रीगुरुवायुरप्पा शरणम् ॥

अव्यक्तं ते स्वरूपं, दुरधिगमतमं, तत्तु शुद्धैकसत्त्वम्

व्यक्तञ्चाप्येतदेव, स्फुटममृत-रसाम्भोधि, कल्लोलतुल्यम् ।

सर्वोत्कृष्टामभीष्टां, तदिह गुणरसेनैव, चित्तं हरन्तीम्

मूर्तिं ते संश्रयेऽहं, पवनपुरपते, पाहि मां कृष्ण, सर्वरोगात्॥ **श्री हरये नमः।**

इति भगवन्माहात्म्य-वर्णनं एकोनशततमदशकं समाप्तम्॥

**शततम दशकम् -100**

## केशादि पाद वर्णनम्

**Tune - Sandra**

अग्रे पश्यामि तेजो, निबिडतरकला यावलीलोभनीयम्

पीयूषाप्लावितोऽहं, तदनु तदुदरे दिव्यकैशोरवेषम्

तारुण्यारम्भरम्यं परमसुखरसास्वाद, रोमाञ्चिताङ्गैः

आवीतं नारदाद्यै, विलसदुपनिषत् सुन्दरीमण्डलैश्च॥ १ ॥

नीलाभं कुञ्चिताग्रं, घनममलतरं, संयतं चारुभङ्ग्या

रत्नोत्तंसाभिरामं, वलयितमुदयच् चन्द्रकैः पिञ्छजालैः

मन्दारस्त्रङ्निवीतं, तव पृथुकबरी भारमालोकयेऽहम्

स्निग्धश्वेतोर्ध्व पुण्ड्रामपि च सुललितां, फालबालेन्दुवीथीम् २

हृद्यं पूर्णानुकम्पार्णव मृदुलहरी, चञ्चलभ्रूविलासैः

आनीलस्निग्ध-पक्ष्मावलि परिलसितं, नेत्रयुग्मं विभो ते ।

सान्द्रच्छायं विशालारुण कमलदलाकार, मामुग्धतारम्

कारुण्यालोकलीला, शिशिरितभुवनं, क्षिप्य<u>तां</u> मय्य<u>ना</u>थे॥ ३

उत्तुङ्गोल्लासिनासं हरिमणिमुकुर, प्रोल्लसद्-गण्ड<u>पा</u>ली
व्यालोलत्कर्ण-पाशाञ्चित मकरमणी कुण्डलद्वन्द्व<u>दी</u>प्रम् ।
उन्मीलद्-दन्तपङ्क्ति, स्फुरदरुणतरच्छाय, बि<u>म्बा</u>धरान्तः
प्रीतिप्रस्यन्दि मन्दस्मितमधुरतरं, वक्त्रमु<u>द्भा</u>स<u>तां</u> <u>मे</u> ॥ ४॥

बाहुद्वन्द्वेन रत्नोज्ज्वलवलयभृता, शोणपाणिप्र<u>वाळे</u>
नोपात्तां वेणुना<u>ळीं</u> प्रसृतनखमयू-खाङ्गु<u>ली</u>, सङ्ग<u>शारा</u>म् ।
कृत्वा वक्-त्रारविन्दे सुमधुर-विकसद्, राग मु<u>द्भा</u>व्यमा<u>नैः</u>
शब्दब्रह्मामृतै<u>स्त्वं</u>, शिशिरितभुव<u>नैः</u>, सिञ्च <u>मे</u> कर्णवी<u>थी</u>म्॥ ५

उत्सर्पत्-कौस्तुभश्री, ततिभिर-रुणितं, कोमळं कण्ठ<u>दे</u>शम्
वक्षः श्रीवत्सरम्यं, तरळतर-समुद्दीप्रहारप्र<u>ता</u>नम् ।
नानावर्णप्रसूना वलि किसलयिनीं वन्यमा<u>लां</u> विलोलल्
लोलम्बां लम्ब<u>मा</u>ना, मुरसि तव तथा, भाव<u>ये</u> रत्न<u>माला</u>म्॥ ६

अङ्गे पञ्चाङ्गरा<u>गैः</u>, अतिशयविकसत् सौर<u>भा</u>कृष्ट-लो<u>क</u>म्
लीनानेकत्रि<u>लो</u>की विततिमपि कृशां, बिभ्र<u>तं</u> मध्य-व<u>ल्ली</u>म् ।
शक्राश्मन्यस्त तप्तोज्वल-कनकनिभं, पीतचे<u>लं</u> द<u>धा</u>नम्
ध्यायामो दीप्तरश्मि स्फुटमणिरशना, किङ्कि<u>णी</u>मण्डितं <u>त्वा</u>म्

ऊरू चारू तवोरू, घनमसृणरुचौ, चित्तचो<u>रौ</u> रमा<u>या</u>
विश्वक्षोभं विशङ्<u>क्य</u>, ध्रुवमनिशमुभौ, पीतचे<u>ला</u>वृ<u>ता</u>ङ्गौ ।

आनम्राणां पुरस्तान् न्यसनधृत, समस्तार्थपा<u>**ली**</u>-समुद्गच् -

छायं जानुद्वयं च, क्रमपृथुल-मनोज्ञे च ज**<u>ङ्घे</u>** नि<u>**षे**</u>वे ॥ ८॥

मञ्जीरं मञ्जुनादैरिव, पदभजनं श्रेय इ<u>त्या</u>ल-पन्त<u>**म्**</u>

पादाग्रं भ्रान्ति-मज्जत्, प्रणतजनमनो मन्द<u>**रो**</u>द्धार-कू<u>**र्म**</u>म् ।

उत्तुङ्गा-ताम्रराजन्, नखरहिमकर, ज्योत्स्न<u>**या**</u> चाऽश्रि<u>**ताना**</u>म्

सन्तापध्वान्तह<u>**न्त्रीं**</u>, ततिमनु-कलये, मङ्ग<u>**ळा**</u>म् अङ्गु<u>**लीना**</u>म् ९

योगीन्द्राणां त्वदङ्गेषु, अधिकसु-मधुरं, मुक्तिभा<u>**जां**</u> निवा<u>**सो**</u>

भक्तानां कामवर्षत् द्युतरुकिसलयं, नाथ ते पाद<u>**मूलम्**</u> ।

नित्यं चित्तस्थितं मे पवनपुरपते, कृ<u>**ष्णा**</u> कारुण्यसि<u>**न्धो**</u> – 2x

हृत्वा निःशेषतापान्, <u>प्रदिशतु परमानन्द</u>-<u>स**न्दो**ह</u>ल**क्ष्मी**<u>म्</u>

अज्ञात्वा ते महत्वम् यदिह निगदितं, विश्वनाथ क्षमे<u>**थाः**</u>

स्तोत्रं चैतत्सहस्रोत्तरम्, अधिकतरं, त्वत्-प्रसादाय <u>**भूया**</u>त्

द्वेधा नारायणीयं श्रुतिषु च जनुषा, स्तुत्य<u>**ता**</u>वर्ण<u>**ने**</u>न

स्फीतं लीलावता<u>**रैः**</u>, इदमिह कुरुताम्, आयुरारोग्य<u>**सौ**</u>ख्यम्- 3x  श्रीहरये नमः

सान्द्रानन्दाव-बोधात्मकम्, अनुपमितं, कालदे<u>**शा**</u>वधि<u>**भ्या**</u>म्

निर्मुक्तं, नित्यमुक्तं, निगमशतसहस्रेण, नि<u>**र्भा**</u>स्य<u>**मा**</u>नम्

अस्पष्टं दृष्टमात्रे, पुनरुरु-पुरुषार्थात्मकं, ब्रह्म तत्व<u>**म्**</u>

तत्तावद्-भाति साक्षाद्, गुरुपवनपुरे, हन्त भा<u>**ग्यं**</u> ज<u>**ना**</u>नाम्॥ श्री हरये नमः।

## समापन स्लोकम्

नमामि नरायण पाद् पङ्कजम्

करोमि नारायण पूजनम् सदा

वदामि नारायण नाम निर्मलम्

स्मरामि नारायण तत्व मव्ययम्॥

नारायण नारायण नारायण नारायण - 4x

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः

सर्वे बद्राणि पश्यन्तु माकस्चित् दुःख बाक् भवेत्॥

श्रीकृष्ण गोविन्द् हरे मुरारे श्री नाथ नारायण वासुदेव - 3x

नारायणा अखिल गुरो भगवन् नमस्ते॥ - श्रीगुरुवायुरप्पा शरणम्

यदक्षर पदभ्रष्टम् मात्राहीनम् तु यत् भवेत्

तत् सर्वम् क्षम्यताम् देव नारायण नमोऽस्तुते ॥

विसर्ग बिन्दु मात्राणि पदपादाक्षराणि च

न्यूनानि चति रिक्तानि क्षमस्व पुरुषोत्तमा ॥

अन्यता शरणं नास्ति त्वमेव शरणं मम।

तस्मात् कारुण्य भावेन रक्ष रक्ष **जनार्दना** ॥ - श्रीगुरुवायुरप्पा शरणम्

कल्याणरूपाय कलौ जनानां कल्याणदात्रे करुणासुधाब्धे।
शङ्खादि दिव्यायुध सत्कराय वातालयाधीश नमो नमस्ते॥ १

नारायणेत्याति जपद्भिरुच्चैः भक्तैः सदापूर्ण महालयाय।
स्वतीर्थ गाङ्गोपम वारिमग्न निवर्तिताशेषरुजे नमस्ते॥ २

ब्राह्मे मुहूर्ते परिधः स्वभक्तैः संदृष्टसर्वोत्तमविश्वरूप।
स्वतैल संसेवक रोगहर्त्रे वातालयाधीश नमो नमस्ते॥ ३

बालान् स्वकीयान् तवसन्निधानेदिव्यान्नदानात्परिपालयद्भिः।
सदा पठद्भिश्च पुराणरत्नं संसेवितायास्तु नमो हरे ते॥ ४

नित्यान्नदात्रे च महीसुरेभ्यः नित्यं दिविस्थैर्निशि पूजिताय।
मात्रा च पित्रा च तथोद्धवेन संपूजितायास्तु नमो नमस्ते॥५

अनन्तरामाख्यमखि-प्रणीतम् स्तोत्रम्पठेद्यस्तुनरस्त्रिकालम्।
वातालयेशस्य कृपाबलेन लभेत सर्वाणि च मङ्गलानि॥ ६

गुरुवातपुरीश-पञ्चकाख्यम् स्तुतिरत्नम् पठताम् सुमङ्गळम् स्यात्।
हृति चापि विशेत् हरिः स्वयम् तु रतिनाथायुततुल्य-देहकान्तिः॥७

नारायण नारायण नारायण नारायण – 4x

கோவில் முன்னே கூடி நின்று கோடி ஜென்ம பாபம் தீர
குருவாயூரப்பா நமஸ்காரம் செய்கின்றோம் - 2X

திருமேனி தரிசனம் நிர்மால்யமாகவே கண்டு
கிரிதரா உன்னை நமஸ்காரம் செய்கின்றோம் -

சந்தன காப்பு கழற்றி தைலம் பூசிக் கொண்டு நிற்கும்
நந்த கோபாலனே நமஸ்காரம் செய்கின்றோம் -

எண்ணெய் ஸ்நானம் செய்து கையில் வாழைபழத்த்தோடு நிற்கும்
கண்ணா உன் பாதத்தில் நமஸ்காரம் செய்கின்றோம் –

குடம் குடமாக பாலை அபிஷேகம் செய்யும் வேளை
கோவிந்தனே உன்னை நமஸ்காரம் செய்கின்றோம் -

கொண் டை மயில் பீலி மின்ன மஞ்ச பட்டு கட்டி கொண்டு
குழலூதும் கிருஷ்ணா நமஸ்காரம் செய்கின்றோம் -

தெச்சி மந்தாரம் துளசி தாமரை பூ மாலை சார்த்தி
அசச்சுதனே உன்னை நமஸ்காரம் செய்கின்றோம் –

திவ்ய நாமம் சொல்லி கொண்டு சீவேலியில் சுற்றி வந்து
ஸ்ரீதரா உனக்கு நமஸ்காரம் செய்கின்றோம்-

தீரா வினை தீர்த்து வைத்து கோரும் வரம் அளித்திடும்
நாராயணா உன்னை நமஸ்காரம் செய்கின்றோம் - X2

குருவாயூரப்பா நமஸ்காரம் செய்கின்றோம் - X3 கோவில்

**नारायण नारायण ॐ सत्य नारायण नारायण ॐ**

**नारायण नारायण ॐ सत्य नारायण नारायण ॐ सत्य**

**नारायण नारायण ॐ सत्य नारायण नारायण ॐ**

१) श्रीकृष्णाय मुकुन्दाय श्रीराजदिव्य वर्ष्मणे

गुरुवायुपुरेशाय जगदीशाय मङ्गळम्॥

२) करुणात्र मनस्काय अरुणारुण रोदिषे

गुरुवायुपुरेशाय ऋषीकेशाय मङ्गळम्॥

३) विश्वपालन दीक्षाय विश्व सन्ताप हारिणे

गुरुवायुपुरेशाय वासुदेवाय मङ्गळम्॥

४) भवाप्ति तारकायाब्ज भवाभीष्टत कर्मणे

गुरुवायुपुरेशाय राधा कान्ताय मङ्गळम्॥

५) भयोतिकन्यापदये पयोतोपम मूर्तये

गुरुवायुपुरेशाय नन्दपुत्राय मङ्गळम्॥

६) पापावनोद् लोलाय पापारण्य दवाग्नये

गुरुवायुपुरेशाय देवदेवाय मङ्गळम्॥

७) दिव्य जोतिप्पते नित्य, कव्य दाय शरीरिणा

गुरुवायुपुरेशाय चिताकाराय मङ्गळम्॥

८) प्रपन्न जनसन्तोह मन्ताराय परात्मने

गुरुवायुपुरेशाय पुण्य रूपाय मङ्गळम्॥

९) सच्चितानन्द रूपाय सर्व भूतान्तरार्मने

गुरुवायुपुरेशाय पद्मनाभाय मङ्गळम्॥

१०) भक्त लोकावनोत्काय भुक्ति मुक्ति प्रदायिने

गुरुवायुपुरेशाय विष्वक्सेनाय मङ्गळम्॥

११) विश्वगेयापदानाय शस्वतानन्ददायिने

गुरुवायुपुरेशाय सर्व शक्ताय मङ्गळम्॥

१२) शिष्टपालन लोलाय दुष्ट सम्हार कारिणे

गुरुवायुपुरेशाय सारसाक्षाय मङ्गळम्॥

१३) यत्तु नित्यम् इदं भव्यम् वादकेहेश मङ्गळम्

पठेत्य परिपुम्सत्तु भवेत् सम्सार सागरम्॥

## नारायणीयम् आर्ति

जय जगदीश हरे कृष्ण - जय जगदीश हरे

जयगुरु मारुत मन्तिरनाथ जय जगदीश हरे कृष्ण -जय जगदीश हरे

किङ्किणि पाद कमला कृष्णा कङ्कण करयुगळा

कुङ्कुम पङ्किल वक्षस्तल कृष्ण कुवळय दळ नीला – जय जगदीश हरे

दधि नवनीत हरा कृष्ण दरुणिय चित्त हरा

दयया पालय दामोधर हर तुळसी दाम धरा कृष्ण – जय जगदीश हरे

गोवर्धन धरणा कृष्ण गोपी जन रमणा

कोमळ पल्लव सुन्दर चरणा कोकिल मधु वचना कृष्ण - जय जगदीश हरे

नन्द कुमार हरे कृष्ण नारद गीत गुणा

नारायण वर बट्टतिरी कृत स्तुतिवर सीपफलदा कृष्ण  - जय जगदीश हरे

पून्दान भक्तिप्रिया कृष्ण वृन्दावन रसिका

प्रेमिक भावुक मण्डल पूजित पाद सरोज युगा कृष्ण - जय जगदीश हरे

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोप-शान्तये॥

व्यासं वसिष्ठ-नप्तारं शक्तेः पौत्रमकल्मषम्।

पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥

व्यासाय-विष्णुरूपाय व्यासरूपाय विष्णवे।

नमोवै-ब्रह्मनिधये वाशिष्ठाय नमो नमः॥

अविकाराय शुद्धाय नित्याय परमात्मने

सदैकरूप-रूपाय विष्णवे सर्वजिष्णवे॥

यस्य-स्मरणमात्रेण जन्म-संसार-बन्धनात्।

विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे॥

ॐ नमो विष्णवे प्रभविष्णवे॥

श्रीवैशंपायन उवाच ॥

श्रुत्वा धर्मानशेषेण पावनानिच सर्वशः।

युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत॥

युधिष्ठिर उवाच ॥

किमेकं दैवतं लोके किं वाऽप्येकं परायणम्।

स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥

को धर्मः सर्व धर्माणां भवतः परमो मतः।

किं जपन्मुच्यते जन्तुर्-जन्मसंसार बन्धनात्॥

श्रीभीष्म उवाच॥

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।

स्तुवन्नामसहस्रेण-पुरुषः सततोत्थितः॥ 10

त्वमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।

ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।

लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।

लोकनाथं महत्भूतं सर्वभूतभवोत्भवम्॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।

यत्भक्त्या पुण्डरी-काक्षं स्तवैरर्चेन्नरः सदा॥

परमं यो महत्तेजः परमं यो महत्तपः।

परमं यो महत्ब्रह्म परमं यः परायणम्॥

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।

दैवतं देवतानां च भूतानां योऽव्ययः पिता॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।

यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।

विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥

यानि नामानि गौणानि विख्यातानि महात्मनः।

ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥

ऋषीर्नाम्नाम् सहस्रस्य वेदव्यासो महामुनिः।

छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः।

त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।

अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम्॥ 22

ॐ अस्य श्रीविष्णोर्दिव्य-सहस्रनामस्तोत्र-महामन्त्रस्य॥

श्रीवेदव्यासो भगवान् ऋषिः अनुष्टुप् छन्दः॥

श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता॥

अमृतांशूद्भवो भानुरिति बीजम्॥

देवकीनन्दनः श्रष्टेति शक्तिः॥

उद्भवः क्षोभणो देव इति परमो मन्त्रः॥

शङ्ख भृन्नन्दकी चक्रीति कीलकम्॥

शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ॥

रथाङ्गपाणिरक्षोभ्य इति नेत्रम्॥

त्रिसामा सामगः सामेति कवचम्॥

आनन्दं परब्रह्मेति योनिः॥

ऋतुसुदर्शनः काल इति दिग्बन्धः॥

श्रीविशवरूप इति ध्यानम्॥

श्रीमहाविष्णु प्रीत्यर्थे सहस्रनामजपे विनियोगः।

ध्यानम्

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानाम्।

मालाक्लृप्तासनस्थः स्फटिकमणीनिभैर्-मौक्तिकैर् मण्डिताङ्गः॥

शुभ्रैरभ्रै रदभ्रैरुपरिविरचितैर्-मुक्तपीयूषवर्षैः

आनन्दी नः पुनीयादरिनलिनगदा शङ्खपाणिर्मुकुन्दः॥

भूपादौयस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे

कर्णावाशाः शिरो ध्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः।

अन्तस्थं यस्य विश्वं सुरनरखग-गोभोगिगन्धर्व-दैत्यैः

चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥

ॐ नमोभगवते-वासुदेवाया॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्

विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।

लक्ष्मीकान्तं कमलनयनं योगिहृद्यानगम्यम् ।

वन्देविष्णुं भवभयहरं सर्वलोकैकनाथम्॥

मेघश्यामं पीतकौशेय-वासं श्रीवत्साङ्कं कौस्तुभोत्भासिताङ्गम्।

पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम्॥

नमः समस्तभूतानां आदिभूताय भूभृते।

अनेक रूप रूपाय विष्णवे प्रभविष्णवे॥

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्।

सहारवक्षस्थल-शोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्॥

छायायां पारिजातस्य हेमसिंहासनोपरि

आसीनमम्बुद-श्याम-मायताक्षमलङ्कृतम्।

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम् ।

रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये॥

हरिः ॐ ॥

विश्वं विष्णुर्वषट्कारो भूतभव्य भवत्प्रभुः।

भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।

अव्ययः पुरुषस्साक्षी क्षेत्रज्ञोऽक्षर एव च॥

योगो योगविदां नेता प्रधान-पुरुषेश्वरः।

नारसिंह-वपुः श्रीमान् केशवः पुरुषोत्तमः॥

सर्वश्शर्वश्शिवस्स्ताणुर्भूतादिर्निधि-रव्ययः।

संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥

स्वयम्भूश्शम्भुरादित्यः पुष्कराक्षो महास्वनः।

अनाधिनिधनो धाता विधाता धातुरुत्तमः॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमर प्रभुः।

विश्वकर्मा मनुस्त्वष्टा स्थाविष्ठस्स्थविरोधृवः॥

अग्राह्यश्शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।

प्रभूत स्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥

ईशानः प्राणदः प्राणो ज्येष्ठश्-श्रेष्ठःप्रजापतिः।

हिरण्यगर्भो भूगर्भो माधवो मधु-सूदनः॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।

अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥

सुरेशश्शरणं शर्म विश्वरेताः प्रजाभवः।

अह-संवत्सरो व्याळः प्रत्ययस्सर्वदर्शनः॥

अजस्सर्वेश्वरःसिद्ध सिद्धि सर्वादिरच्युतः।

वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः॥

वसुर्वसुमनास्सत्यस्समात्मा सम्मितस्समः।

अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिश्शुचिश्रवाः।
अमृतश्शाश्वतस्स्थाणुर्वरारोहो महातपाः॥

सर्वगः सर्व-विद्भानुः विष्वक्सेनो जनार्दनः।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः॥

लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्षः कृताकृतः।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥

उपेन्द्रो वामनः प्रांशु अमोघश्शुचिरूर्जितः।
अतीन्द्रस्सङ्ग्रहस्सर्गो धृतात्मा नियमो यमः॥

वेद्यो वैध्यस्सदायोगी वीरहा माधवो मधुः।
अत्तिन्द्रियो महामायो महोत्साहो महाबलः॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाध्युतिः।
अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृक्॥

महेष्वासो महीभर्ता श्रीनिवासस्सतां गतिः।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।
हिरण्यनाभस्सुतपाः पद्मनाभः प्रजापतिः॥

अमृत्युस्सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः।

अजो दुर्मर्षणश्शास्ता विश्रुतात्मा सुरारिहा॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः।

निमिषोऽनिमिषस्स्रग्वी वाचस्पतिरुदारधीः॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः।

सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥

आवर्तनो निवृत्तात्मा-संवृतस्संप्रमर्दनः।

अहस्संवर्तको वह्निरनिलो धरणीधरः॥

सुप्रसादः प्रसन्नात्मा विश्व-धृग्विश्वभुग्विभुः।

सत्कर्ता सत्कृत-स्साधुर्-जह्नुर्नारायणो नरः॥

असङ्ख्येयो-ऽप्रमेयात्मा विशिष्टश्-शिष्टकृच्छुचिः।

सिद्धार्थस्सिद्धसङ्कल्पः सिद्धिदस्सिद्धिसाधनः॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः।

वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।

नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः॥

ओजस्तेजो ध्युतिधरः प्रकाशात्मा प्रतापनः।

ऋद्धस्स्पष्टाक्षरो मन्त्रः चन्द्रंशुर्भास्करध्युतिः॥

अमृतांशूद्भवो भानुः शशबिन्दुस्सुरेश्वरः।
औषधं जगतस्सेतुः सत्यधर्मपराक्रमः॥

भूतभव्य-भवन्नाथः पवनः पावनोऽनलः।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः॥

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्॥

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः।
क्रोधहा क्रोध-कृत्कर्ता विश्वबाहुर्महीधरः॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।
अपान्निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः॥

स्कन्दस्स्कन्दधरो धूर्यो वरदो वायुवाहनः।
वासुदेवो बृहत्भानुरादिदेवः पुरन्दरः॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।
महर्द्धि-ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरस्सहः।
महीधरो महाभागो वेगवानमिताशनः॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।
करणं कारणं कर्था विकर्ता गहनो गुहः॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः॥

रामो विरामो विरतो मार्गो नेयो नयोऽनयः।
वीरश्शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥

ऋतुस्सुदर्शनः कालः परमेष्ठि परिग्रहः।
उग्रस्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः।

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः।
नक्षत्रनेमि र्नक्षत्री क्षमः क्षामस्समीहनः॥

यज्ञ इज्योमहेज्यश्च क्रतुस्सत्रं सताङ्गतिः।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥

सुव्रतः सुमुखस्सूक्ष्मः सुघोषः सुखदः सुहृत्।

मनोहरो जित-क्रोधो वीरबाहुर्-विदारणः॥

स्वापनस्स्ववशो व्यापी नैकात्मा नैककर्मकृत्।

वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्।

अविज्ञाता सहश्रांशुः विधाता कृतलक्षणः॥

गभस्तिनेमिः सत्वस्थः सिम्हो भूतमहेश्वरः।

आदिदेवो महादेवो देवेशो देवभृद्गुरुः॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।

शरीर भूतभृत् भोक्ता कपीन्द्रो भूरिदक्षिणः॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः।

विनयो जयः सत्यसंधो दशार्हः सात्वतां पतिः॥

जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः।

अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।

आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः।

त्रिपदस्त्रिदशाध्यक्षो महाश्रृङ्गः कृतान्तकृत्॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी।

गुह्यो गभीरो गहनो गुप्तश्चक्र-गदाधरः॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः।

वरुणोवारुणो वृक्षः पुष्कराक्षो महामनाः॥

भगवान् भगहा नन्दी वनमाली हलायुधः।

आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः॥

सुधन्वाखण्डपरशुर्-दारुणो द्रविणप्रदः।

दिवःस्पृक्सर्व-दृग्व्यासो वाचस्पतिरयोनिजः॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्।

सन्यासकृच्छमः शान्तो निष्ठा शान्ति परायणम्॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः।

गोहितोगोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥

अनिवर्तीनिवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः।

श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।

श्रीधरः श्रीकरः श्रेयः श्रीमाल्लोकत्रयाश्रयः॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।

विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्न-संशयः॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वत-स्थिरः।

भूशयोभूषणोभूतिः विशोकः शोकनाशनः॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।

अनिरुद्धोऽप्रतितथः प्रध्युम्नोऽमितविक्रमः॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः।

त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥

कामदेवः कामपालः कामी कान्तः कृतागमः।

अनिर्देश्य-वपुर्विष्णुः वीरोऽनन्तो धनञ्जयः॥

ब्रह्मण्यो ब्रह्मकृद्-ब्रह्मा ब्रह्म ब्रह्मवि-वर्धनः।

ब्रह्मविद्ब्रह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मण-प्रियः॥

महाक्रमो महाकर्मा महातेजा महोरगः।

महाक्रतुर्महायज्वा महायज्ञो महाहविः॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः।

पूर्णः पूरयिता पुण्यः पुण्यकीर्ति-रनामयः॥

मनोजवस्-तीर्थकरो वसुरेता वसुप्रदः।

वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥

सद्गदिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।

शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥

भूतावासो-वासुदेवः सर्वासुनिलयोऽनलः।

दर्पहा दर्पदोदृप्तो दुर्धरोऽथापराजितः॥

विश्वमूर्तिर्महामूर्तिः दीप्तमूर्तिरमूर्तिमान्।

अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः॥

एकोनैकः सव कः किं यत्तत्पदमनुत्तमम्।

लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।

वीरहा विषमः शून्यो धृताशीरचलश्चलः॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्।

सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥

तेजोवृषोध्युतिधरः सर्व-शस्त्रभृतां वरः।

प्रग्रहो निग्रहो व्याग्रो नैकश्रृङ्गोगदाग्रजः॥

चतुर्मूर्ति-श्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः।

चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥

समावर्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः।

दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा॥

शुभाङ्गोलोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।

इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।

अर्कोवाजसनः श्रृङ्गिजयन्तः सर्वविज्जयी॥

सुवर्णबिन्दुरक्षेभ्यः सर्ववागीश्वरेश्वरः।

महाह्रतोमहागर्तो महाभूतो महानिधिः॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः।

अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।

न्यग्रोधोदुम्बरोऽश्वत्थः चाणूरान्ध्रनिषूदनः॥

सहस्राचिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।

अमूर्चिरनघोऽचिन्त्यो भयकृद् भयनाशनः॥

अणुर्बृहत्कृतः स्थूलो गुणभृन्निर्गुणो महान्।

अधृतः स्वधृतः स्वास्यः प्राग्वंशोवंशवर्धनः॥

भारभृत्कथितो योगी योगीशः सर्वकामदः।

आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥

धनुर्धरोधनुर्वेदोदण्डो दमयिता दमः।

अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः॥

सत्ववान् सात्विकः सत्यः सत्यधर्मपरायणः।

अभिप्राय प्रियार्होऽहः प्रियकृत्प्रीतिवर्धनः॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः॥

सनात्सनातनतमः कपिलः कपिरव्ययः।
स्वस्तिदः स्वस्तिकृत्स्वति स्वस्तिभुक्स्वस्ति दक्षिणः॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जित शासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः।
विद्वत्तमो वीतभयः पुण्य-श्रवणकीर्तनः॥

उत्तारणो दुष्क्रितिहा पुण्यो दुःस्वप्ननाशनः।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः॥

अनन्तरूपोऽनन्दश्रीर्जितमन्युर्भयापहः।
चतुरश्रो गभीरात्मा-विदिशोव्यादिशो-दिशः॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिः भीमो भीमपराक्रमः॥

आधारनिलयो धाता पुष्पहासः प्रजागरः।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः।

तत्वं तत्वविदेकात्मा जन्ममृत्युजरातिगः॥

भूर्भुवः स्वस्त-रुस्तारः सविता प्रपितामहः।

यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः॥

यज्ञ भृद्यज्ञ-कृद्यज्ञी यज्ञभुग्यज्ञसाधनः।

यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च॥

आत्मयोनिः स्वयं-जातोवैखानः सामगायनः।

देवकीनन्दनः स्रष्टा क्षिदीशः पापनाशनः॥

शङ्ख भृन्नन्दकीचक्री-शार्ङ्गधन्वा गदाधरः।

रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥

सर्वप्रहरणायुध ॐ नम इति॥

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी।

श्रीमन् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु॥

श्रीवासुदेवोऽभिरक्षवों नम इति॥

इतीदं कीर्तनीयस्यकेशवस्य महात्मनः।

नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितं॥

य इदं श्रृणुयान्नित्यं यश्चापि परिकीर्तयेत्।

नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः॥

वेदान्तगो ब्राह्मणः स्यत् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाम्॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत्॥

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्य-नुत्तमम्॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति।
भवत्यरोगो ध्युतिमान् बलरूपगुणान्वितः॥

रोगार्तो मुच्यते रोगात्बद्धो मुच्येत बन्धनात्।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥

न वासुदेवभक्तानामशुभं विध्यते क्वचित्।
जन्ममृत्युजराव्याधि-भयंनैवोपजायते॥

इमं स्तवम-धीयानः श्रद्धाभक्तिसमन्वितः।

युज्येतात्मसुखक्षान्तिं श्रीधृतिस्मृतिकीर्तिभिः॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।

भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥

द्यौः सचन्द्रार्कनक्षत्रम् खं दिशो भूर्महोदधिः।

वासुदेवस्य वीर्येण विधृतानि महात्मनः॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।

जगत्वशेवर्ततेदं कृष्णस्यसचराचरम्॥

इन्द्रियाणि मनो बुद्धिः सत्वं तेजो बलं धृतिः।

वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥

सर्वागमानामाचारः प्रथमं परिकल्पते।

आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः॥

ऋषयः पितरो देवा महा भूतानि धातवः।

जङ्गमाजङ्गमं चेदं जगन्नारायणो-द्भवम्॥

योगोज्ञानं तथासाख्यं विध्याः शिल्पादि-कर्म च

वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥

एको विष्णुर्महत्भूतं पृतग्भूतान्यनेकशः।

त्रीन्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।

पठेध्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च॥

विश्वेश्वरमजं देवं जगतः प्रभु-मव्ययम्।

भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्॥

न ते यान्ति पराभवं ॐ नम इति॥

अर्जुन उवाच

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम।

भक्तानामनुरक्तानां त्राता भव जनार्दन॥

श्रीभगवानुवाच

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव।

सोऽहमेकेन श्लोकेन स्तुत एव न संशयः॥

स्तुत एव न संशय ओं नम इति॥

व्यास उवाच

वासनाद्वासुदेवस्य वासितं भुवनत्रयम्।

सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते॥

श्री वासुदेव नमोऽस्तुत ओं नम इति॥

पार्वत्युवाच

केनोपायेन लघुना विष्णोर्नामसहस्रकम्।

पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो॥

ईश्वर उवाच

श्रीराम राम रामेति रमे रामे मनोरमे।

सहस्रनाम तत्तुल्यं रामनाम वरानने॥

श्रीरामनाम वरानन ओं नम इति॥

ब्रह्मोवाच

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरुबाहवे।

सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुग धारिणे नमः॥

सहस्रकोटियुग धारिण ओं नम इति॥

सञ्जय उवाच

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।

तत्र श्रीविजयो-भूतिर्धृवानी-तिर्मतिर्मम॥

श्रीभगवानुवाच

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभि-युक्तानां योगक्षेमं वहाम्यहम्॥

परित्राणाय साधूनां विनाशायच दुष्कृताम्।

धर्मसंथापनार्थाय संभवामि युगे युगे॥

आर्ता विषण्णाः शिथिलाश्च भीताः घोरेषु च व्याधिषु वर्तमानाः।

सङ्कीर्त्य नारायण शब्दमात्रं विमुक्त दुःखाः सुखिनो भवन्तु॥

कायेन वाचा मनसेन्द्रियैर्वा बुध्य्ऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यध्यत् सकलं परस्मै नारायणायेति समर्पयामि॥ ॐ॥

## महिषासुरमर्दिनिस्तोत्रम्

अयि गिरिनंदिनि नंदितमेदिनि विश्वविनोदिनि नंदनुते
गिरिवर विंध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठ-कुटुंबिनि भूरिकुटुंबिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिष-मोषिणि घोषरते ।
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २॥

अयि जगदंब मदंब कदंब वनप्रिय वासिनि हासरते
शिखरिशिरोमणि तुङ्गहिमालय शृङ्गनिजालय मध्यगते ।
मधुमधुरे मधुकैटभगंजिनि कैटभभंजिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ३॥

अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्द गजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ।
निजभुजदण्ड निपातितखण्ड विपातितमुण्ड भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ४ ॥

अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचार धुरीणमहाशिव दूतकृत प्रमथाधिपते ।
दुरितदुरीह दुराशयदुर्मति दानवदुत कृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ५ ॥

अयि शरणागत वैरिवधुवर वीरवराभय दायकरे
त्रिभुवनमस्तक शुलविरोधि शिरोऽधिकृतामल शुलकरे ।
दुमिदुमितामर धुन्दुभिनादमहोमुखरीकृत दिङ्मकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ६ ॥

अयि निजहुङ्कृतिमात्र निराकृत धूम्रविलोचन धूम्रशते
समरविशोषित शोणितबीज समुद्भव शोणित बीजलते ।
शिवशिव शुंभनिशुंभ महाहव तर्पित भूतपिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ७॥

धनुरनुषङ्ग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटके
कनकपिशङ्ग पृषत्कनिषङ्ग रसद्भटशृङ्ग हताबटुके ।
कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ८ ॥

जय जय जप्यजये जयशब्दपरस्तुतितत्परविश्वनुते
झणझणझिञ्झिमि झिंकृत नूपुरशिञ्जित मोहित भूतपते ।
नटित नटार्थ नटी नटनायक नाटित नाट्य सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥९ ॥

अयि सुमनःसुमनः सुमनः सुमनः सुमनोहर कान्तियुते
श्रितरजनी रजनीरजनी रजनीरजनी करवक्रवृते ।
सुनयनविभ्रम रभ्रम रभ्रम रभ्रम रभ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१० ॥

सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचितवल्लिक पल्लिकमल्लिक झिल्लिक भिल्लिक वर्गवृते ।
शितकृतफुल्ल समुल्लसितारुण तल्लजपल्लव सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥११ ॥

अविरलगण्ड गलन्मदमेदुर मत्तमतङ्गज राजपते
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधि राजसुते ।
अयि सुदतीजन लालसमानस मोहन मन्मथ राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१२ ॥

कमलदलामल कोमलकान्ति कलाकलितामल भाललते
सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले ।
अलिकुलसङ्कुल कुवलयमण्डल मौलिमिलद्बकु लालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१३ ॥

करमुरलीरव वीजितकूजित लज्जितकोकिल मञ्जुमते
मिलितपुलिन्द मनोहरगुञ्जित रञ्जितशैल निकुञ्जगते ।
निजगुणभूत महाशबरीगण सद्गुण संभृत केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१४ ॥

कटितटपीत दुकूलविचित्र मयूखतिरस्कृत चन्द्ररुचे
प्रणतसुरासुर मौलिमणिस्फुर दंशुलसन्नख चंद्ररुचे ।
जितकनकाचल मौलिपदोर्जित निर्भरकुञ्जर कुंभकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १५ ॥

विजितसहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक सङ्गरतारक सङ्गरतारक सूनुसुते ।
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १६ ॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं स शिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परंपदमेवमनु-शीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १७ ॥

कनकलसत्कल सिन्धुजलैरनु सिञ्चिनुतेगुण रङ्गभुवम्
भजति स किं न शचीकुचकुंभ तटीपरिरंभ सुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणि निवासि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १८ ॥

तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूतपुरीन्दुमुखी सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १९ ॥

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथाऽनुमितासि रते ।
यदुचितमत्र भवत्युररी-कुरुतादुरुतापम-पाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २०॥

॥ इति श्रीमहिषासुरमर्दिनि स्तोत्रं सम्पूर्णम् ॥

## चिलङ्के केट्टि ओडी ओडी वैयो

चिलङ्के केट्टि ओडी ओडी वायो एन्डे तमारा कण्णा आडि आडि वायो
निन्डे पिन्ञ्चु पादं तेडि तेडि ञङ्गळ् निन्डे दिव्य नामं पाडि पाडि वन्नु - चिलङ्के केट्टि

देवकी नन्दना राधा जीवना केशवा हरि मधावा
पूतना मर्दना पाप विनाशना केशवा हरि मधावा
गोकुल बालने ओडि वायो गोपाल बालने आडि वायो - चिलङ्के केट्टि

कम्स विमर्धना काळिय नर्दना केशवा हरि माधवा
आश्रित वत्सला आबत्बान्धवा केशवा हरि माधवा
ॐ कार नादमे ओडि वायो आनन्द गीतमे आडि वायो - चिलङ्के

पाण्डव रक्षक पाप विनाशक केशवा हरि माधवा
अर्जुन रक्षका अज्ञान नाशका केशवा हरि माधवा
गीतामृतमे ओडि वायो हृदयानन्दमे आडि वायो - चिलङ्के केट्टि

கௌரி கல்யாண  வைபோகமே
லக்ஷ்மி கல்யாண  வைபோகமே
ருக்மிணி கல்யாண  வைபோகமே

வசுதேவ தவ பால அஸுர குல கால - 2x
சசி வதன ருக்மிணி சத்யபாமா லோலா

வாசுதேவ தவ பால அஸுர குல கால - 2x
கௌரி கல்யாண  வைபோகமே
லக்ஷ்மி கல்யாண  வைபோகமே
ருக்மிணி கல்யாண  வைபோகமே

கோத்தோட வாழைமரம் கொண்டு வந்து நிறுத்தி
கொப்புடைய பந்தலுக்கு மேல்கட்டு கட்டி- 2x
கௌரி கல்யாண  வைபோகமே
லக்ஷ்மி கல்யாண  வைபோகமே
ருக்மிணி கல்யாண  வைபோகமே

| | | |
|---|---|---|
| D 1 | Bhagawat Mahatmyam | Trimadhuram |
| D 25 | Narasimha Avataram | Paanagam |
| D 27 | Koorma Avatharam | Neiappam |
| D 30 | Vaamana AvatharaM | Plantain Banana |
| D 34 | SriRama Avatharam | Chitra Annam |
| D 37 | SriKrishna Avatharam | Butter, Milk, Elaichi Banana, Paal Paayasam |
| | | |
| **Wheat and $ 1.00 to be put in small Packets and distributed** | | |
| | | |
| D 51 | Vana Bhojanam | All cooked Food |
| D 78 | Rukmini Swayamvaram | Nei Paayasam |
| | | 2 Turmeric coconuts, Vetthalai Paakku, Banana, Manjal, Chandanam, Kumkumam, 2 Normal Malais, Cheeru (Kutty, Laddoo, Murukku, Neiappam, Therattippal,<br>Sari, Dress material |
| D 87 | Kuchela Upaakyaanam | Avil & Jaggery |
| D 100 | Keshadi Pada Varnanam | Chundal |
| | | |
| **Rest of the Dashakams fruits** | | |

॥ श्रीगुरुवायुरप्पा शरणम् ॥

॥ सर्वम् श्रीकृष्णार्पणमस्तु ॥

SUGGESTIONS / COMMEMTS TO - rajkrish9@gmail.com

THANK YOU
RAJAM KRISHNAN